सांख्यतत्त्वकारिकाः १
क
सांख्यतत्त्वकौमुदी ख २
राजमार्तण्डाभिधा योग
सूत्रवृत्तिः ग २

सं० ५५४२ ई

(क) सांख्यकारिका:
कर्त्ता- ईश्वरकृष्ण: [illegible] पत्राणि

(ख) सांख्यकारिका टीका
सांख्यतत्त्वकौमुदी
कर्त्ता- वाचस्पतिमिश्र: १९ पत्राणि

(ग) योगसूत्रवृत्ति:
राजमार्तण्ड:
१०८ पत्राणि
कर्त्ता- पतञ्जलि —
भोजदेव

सांख्य— योग
(क-ख) — (ग)
सम्पूर्णौ

ਸੈਖਤਤਕੋਮਦੀ ਸੰ ਥੇ सांख्यतत्त्व कारिका, पत्राणि ८
ਸੈਖਕਾਰਕਾ ਸੰ ਥੇ सांख्य तत्त्व कौमुदी पत्राणि ८९
ਜੋਗਾਂਦ੍ਰਿਤੀ ਸੰ ਥੇ योगसूत्रवृत्ति : पत्राणि १०८
नं० ६४७६-घ, समस्तपत्राणि २०६

श्रीगणेशायनमः दुःखत्रयाभिघाताज्जि
ज्ञासा तदपघातके हेतौ दृष्टे सापार्था चेन्नै
कांतात्यंततोऽभावात् १ दृष्टवदानुश्रवि
कः सह्यविशुकक्षयातिशययुक्तः तद्विप
रीतः श्रेयान्व्यक्ताव्यक्तज्ञविज्ञानात् २ मू
लप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृ
तयः सप्त षोडशकस्तु विकारो नप्रकृतिर्न
विकृतिः पुरुषः ३ दृष्टमनुमानमाप्तवचनं
चसर्वप्रमाणसिद्धत्वात् त्रिविधंप्रमाणमिष्टंप्र
मेयसिद्धिः प्रमाणाद्धि ४ प्रतिविषयाध्यवसा
योदृष्टंत्रिविधमनुमानमाख्यातम् तल्लिं
गलिंगिपूर्वकमाप्तश्रुतिराप्तवचनन्तु ५ सा
मान्यतस्तुदृष्टादतींद्रियाणांप्रतीतिरनुमा १

नात् तस्मादपिचासिद्धंपरोक्षमाप्तागमात्सि
द्धम् ६ अतिदूरात्सामीप्यादिन्द्रियघातात्
मनोनवस्थानात् सौक्ष्म्याद्व्यवधानादभिभ
वात्समानाभिहाराच्च ७ सौक्ष्म्यात्तदनुपलब्धि
र्नाभावात्कार्यतस्तदुपलब्धेः महदादितच्चकार्यं
प्रकृतिविरूपंसरूपंच ८ असदकरणादुपा
दानग्रहणात्सर्वसम्भवाभावात् शक्तस्यशक्य
करणात्कारणभावाच्चसत्कार्यम् ९ हेतुमद
नित्यमव्यापिसक्रियमनेकमाश्रितंलिंगम्
सावयवंपरतंत्रंव्यक्तंविपरीतमव्यक्तम्
१० त्रिगुणमविवेकिविषयःसामान्यम
चेतनंप्रसवधर्मि व्यक्तंतथाप्रधानंतद्विप
रीतस्तथाचपुमान् ११ प्रीत्यप्रीतिविषादा

2 त्मकाः प्रकाशप्रवृत्तिनियमार्थाः अन्योन्या
भिभवाश्रयजननमिथुनवृत्तयश्च गुणाः
१२ सत्वं लघुप्रकाशकमिष्टमुपष्टम्भकं च
लं च रजः गुरुवरणकमेव तमः प्रदीपवच्चार्थ
तो वृत्तिः १३ अविवेक्यादेः सिद्धिस्त्रैगुण्या
त्तद्विपर्ययाभावात् कारणगुणात्मकत्वात्का
र्यस्याव्यक्तमपि सिद्धम् १४ भेदानां परिमा
णात्समन्वयाच्छक्तितः प्रवृत्तेश्च कारणका
र्यविभागादविभागाद्वैश्वरूपस्य १५ का
रणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च
परिणामतः सलिलवत्प्रतिप्रतिगुणाश्र
यविशेषात् १६ संघातपरार्थत्वात्त्रिगु
णादिविपर्ययादधिष्ठानात् पुरुषोस्तिभो 2

क्तृभावात्कैवल्यार्थंप्रवृत्तेश्च १७ जननमर
णाकरणानांप्रतिनियमादयुगपत्प्रवृत्तेश्च
पुरुषबहुत्वंसिद्धंत्रैगुण्यविपर्ययाच्चैव १८
तस्माच्चविपर्ययासात्सिद्धंसाक्षित्वमस्यपुरु
षस्य कैवल्यंमाध्यस्थ्यंद्रष्टृत्वमकर्तृभावश्च
१९ तस्मात्तत्संयोगादचेतनंचेतनवदिवलि
ङ्गम् गुणकर्तृत्वेचतथाकर्त्तेवभवत्युदासी
नः २० पुरुषस्यदर्शनार्थंकैवल्यार्थंतथाप्र
धानस्य पंग्वन्धवदुभयोरपिसंयोगस्तत्कृतः
सर्गः २१ प्रकृतेर्महांस्ततोहंकारस्तस्माद्ग
णश्चषोडशकः तस्मादपिषोडशकात्पंच
भ्यः पंचभूतानि २२ अध्यवसायोबुद्धि
र्धर्मोज्ञानंविरागऐश्वर्यम् सात्विकमेतद्रू

3 पंतामसमस्माद्विपर्यस्तम् २३ अभिमानोहं
कारस्तस्माद्द्विविधः प्रवर्त्ततेसर्गः एकाद
शकश्चगणस्तन्मात्रपंचकश्चैव २३ सात्वि
कएकादशकः प्रवर्त्ततेवैकृतादहंकारात् भू
तादेस्तन्मात्रः सतामसस्तैजसादुभयम्
२४ बुद्धींद्रियाणिचक्षुः श्रोत्रघ्राणरसना
त्वगाख्यानि वाक्पाणिपादपायूपस्थाः
कर्मेंद्रियाण्याहुः २५ उभयात्मकमत्रम
नः संकल्पकमिंद्रियंचसाधर्म्यात् गुणपरि
णामविशेषान्नानात्वंबाह्यभेदाश्च २६ श
ब्दादिषुपंचानामालोचनमात्रमिष्यतेवृत्तिः
वचनादानविहरणोत्सर्गानंदाश्चपंचाना
म् २७ स्वालक्षण्यंवृत्तिस्त्रयस्यसैषाभ ३

वत्यसामान्या सामान्यकरणवृत्तिः प्राणाद्या
वायवः पंच २८ युगपच्चतुष्टयस्य तु वृत्तिः
क्रमशश्च तस्य निर्दिष्टा दृष्टे तथाप्यदृष्टे
त्रयस्य तत्पूर्विका वृत्तिः २९ स्वां स्वां प्रतिपद्यं
ते परस्पराकूतहेतुकां वृत्तिम् पुरुषार्थ ए
व हेतुर्न केनचित्कार्यते करणम् ३० कर
णं त्रयोदशविधं तदाहरणधारणप्रकाश
करम् कार्यं च तस्य दशधाहार्यं धार्यं प्रका
श्यं च ३१ अंतःकरणं त्रिविधं दशधा
बाह्यं त्रयस्य विषयाख्यम् साम्प्रत्तिकालं
बाह्यं त्रिकालमाभ्यान्तरं करणम् ३२ बुद्धी
न्द्रियाणि तेषां पञ्च विशेषाविशेषविषया
णि वाग्भवति शब्दविषया शेषाणि तु पञ्च वि

५ षयाणि ३३ सांतःकरणाबुद्धिः सर्वंविषय
मवगाहतेयस्मात् तस्मात्त्रिविधंकरणंद्वा
रिद्वाराणिशेषाणि ३४ एतेप्रदीपकल्पाः
परस्परविलक्षणागुणविशेषाः कृत्स्नंपु
रुषस्यार्थंप्रकाश्यबुद्धौप्रयच्छंति ३५ स
र्वंप्रत्युपभोगंयस्मात्पुरुषस्यसाधयतिबुद्धिः
सैवचविशिनष्टिपुनःप्रधानपुरुषांतरंसू
क्ष्मम् ३६ तन्मात्राण्यविशेषास्तेभ्योभूता
निपंचपंचभ्यः एतेस्मृताविशेषाःशांता
घोराश्चमूढाश्च ३७ सूक्ष्मामातापितृ।
जाः सहप्रभूतैस्त्रिधाविशेषाःस्युः सू
क्ष्मास्तेषांनियतामातापितृजानिवर्त्तंते ३८
पूर्वोत्पन्नमसक्तंनियतंमहदादिसूक्ष्मप ४

र्यंतम् संसरति निरुपभोगं भावैरधिवासितं लिङ्गम् ३९ चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथाच्छाया तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम् ४० पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसंगेन प्रकृतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठते लिङ्गम्
४१ सांसिद्धिकाश्च भावाः प्राकृतिका वैकृताश्च धर्माद्याः दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः ४२ धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण ज्ञानेन चापवर्गो विपर्ययादिष्यते बंधः
४३ वैराग्यात् प्रकृतिलयः संसारो भवति राजसाद्रागात् ऐश्वर्यादविघातो वि

5 पर्ययात्तद्विपर्यासः ४४ एषप्रत्ययसर्गो
विपर्ययाशक्तितुष्टिसिद्ध्याख्यः गुणवैष
म्यविमर्दात्तस्यचभेदास्तुपञ्चाशत् ४५
पंचविपर्ययभेदाभवन्त्यशक्तिश्चकरणवै
कल्यात् अष्टाविंशतिभेदातुष्टिर्नवधा
ष्टधासिद्धिः ४६ भेदस्तमसोष्टविधोमो
हस्यचदशविधोमहामोहः तामिस्रोष्टा
दशधातथाभवत्यन्धतामिस्रः ४७ ए
कादशेन्द्रियवधाःसहबुद्धिवधैरशक्तिरुद्दि
ष्टा सप्तदशधाचबुद्धेर्विपर्ययात्तुष्टिसिद्धी
नाम् ४८ आध्यात्मिकाश्चतस्रः प्रकृत्यु
पादानकालभाग्याख्याः बाह्याविषयोप
रमात्पञ्चनवतुष्टयोभिमताः ४९ ऊहः

शब्दोध्ययनंदुःखविघातास्त्रयःसुहृत्प्राप्तिः
दानंचसिद्धयोष्टौसिद्धेःपूर्वोङ्कुशस्त्रिविधः
५० नविनाभावैर्लिङ्गंनविनालिङ्गेनभाव
निर्वृत्तिः लिङ्गाख्योभावाख्यस्तस्माद्द्विविधः
प्रवर्त्ततेसर्गः ५१ अष्टविकल्पोदैवस्तैर्य्य।
ग्योनश्चपंचधाभवति मानुष्यश्चैकविधः
समासतोभौतिकःसर्गः ५२ ऊर्द्धंसत्ववि
शालस्तमोविशालश्चमूलतःसर्गःमध्येर
जोविशालोब्रह्मादिस्तम्बपर्यन्तः ५३ तत्र
जरामरणकृतंदुःखंप्राप्नोतिचेतनःपुरुषः
लिङ्गस्याविनिवृत्तेस्तस्माद्दुःखंस्वभावे
न ५४ इत्येषप्रकृतिकृतोमहदादिविशे
षभूतपर्यन्तः प्रतिपुरुषविमोक्षार्थंस्वार्थ

6 इवपरार्थआरंभः ५५ वत्सविवृद्धिनिमि
त्तंक्षीरस्ययथाप्रवृत्तिरज्ञस्य पुरुषविमोक्ष
निमित्तंतथाप्रवृत्तिःप्रधानस्य ५६ औत्सु
क्यनिवृत्त्यर्थंयथाक्रियासुप्रवर्त्ततेलोकः पु
रुषस्यविमोक्षार्थंप्रवर्त्ततेतद्वदव्यक्तम् ५७
रङ्गस्यदर्शयित्वायथानिवर्त्ततेनर्त्तकीनृत्या
त् पुरुषस्यतथात्मानंप्रकाश्यविनिवर्त्तते
प्रकृतिः ५८ नानाविधैरुपायैरुपका
रिण्यनुपकारिणःपुंसः गुणवत्यगुणस्य
सतस्तस्यार्थमपार्थकंचरति ५९ प्रकृ
तेःसुकुमारतरंनकिंचिदस्तीतिमेमतिर्भव
ति यादृष्टास्मीतिपुनर्नदर्शनमुपैतिपुरु
षस्य ६० तस्मान्नबध्यतेद्धानमुच्यतेना ६

पिसंसरतिकश्चित् संसरतिवध्यतेमुच्यते
चनानाश्रयाप्रकृतिः ६१ रूपैःसप्तभिरे
वतुवध्नात्यात्मानमात्मनाप्रकृतिः सैवचपु
रुषार्थंप्रतिविमोचयत्येकरूपेण ६२ ए
वंतत्वाभ्यासान्नास्मिनमेनाहमित्यपरिशे
षम् अविपर्ययाद्विशुद्धंकेवलमुत्पद्यते
ज्ञानम् ६३ तेननिवृत्तप्रसवामर्थवशा
त्सप्तरूपविनिवृत्ताम् प्रकृतिंपश्यति
पुरुषप्रेक्षकवदवस्थितःस्वच्छः ६४
दृष्टामयेत्युपेक्षतएकोदृष्टाहमित्युपर
मत्यन्या सतिसंयोगेपितयोः प्रयोजनं
नास्तिसर्गस्य ६५ सम्यग्ज्ञानाधिगमा
द्धर्मादीनामकारणप्राप्तौतिष्ठतिसंस्कार

7 वशाच्चक्रभ्रमिवद्धृतशरीरः ६६ प्राप्ते
शरीरभेदेचरितार्थत्वात्प्रधानविनिवृत्तौ ऐ
कान्तिकमात्यंतिकमुभयंकैवल्यमाप्नोति
६७ परमार्थज्ञानमिदंगुह्यंपरमर्षिणा
समाख्यातम् स्थित्युत्पत्तिप्रलयाश्चिंत्यं
तेयत्रभूतानाम् ६८ एतत्पवित्रमग्र्यंमुनि
रासुरयेऽनुकम्पयाप्रददौ आसुरिरपिपं
चशिखायतेनचबहुधाकृतंतंत्रम् ६९
शिष्यपरम्परयागतमीश्वरकृष्णेनचैतदा
र्याभिः संक्षिप्तमार्यमतिनासम्यग्विज्ञाय
सिद्धांतम् ७० सप्तत्यांखलुयेर्थास्तेर्थाः
कृत्स्नस्यषष्टितंत्रस्य आख्यायिकावि
रहिताःपरवादविवर्जिताश्चापि ७१ ७

इतिश्रीश्वरकृष्णविरचितंसांख्यकारिका
समाप्तम् ॥ छ ॥ ॥ ॥

सांख्यतत्त्वकौमुदी

पत्राणि १-९१

श्रीगणेशायनमः अजामेकांलोहित
१ । शुक्लकृष्णांबह्वीःप्रजाःसृजमानांनमामः
अजायेतांजुषमाणांभजंतेजहत्येनांभुक्तभो
गांनुमस्तान् १ कपिलायमहामुनयेशि
ष्यायतस्यचासुरये पंचशिखायतथेश्व
रकृष्णायैतेनमस्यामः २ दुःख
त्रयाभिघाताज्जिज्ञासातदपघातकेहेतौ
दृष्टेसापार्थाचेन्नैकांतात्यंततोभावात्
१ इहखलुप्रतिपित्सितमर्थंप्रतिपा
दयन्प्रतिपादयताऽवधेयवचनोभवति
प्रेक्षावतां अप्रतिपित्सितंतुप्रतिपादयन्ना
यंलौकिकोनपरीक्षकइतिप्रेक्षावद्भिरुन्म
त्तवदुपेक्षेत सचैषांप्रतिपित्सितोर्थोयो १

ज्ञातः सन्परमपुरुषार्थायकल्प्यत इतिप्रा
रिप्सितशास्त्रविषयज्ञानस्यपरमपुरुषा
र्थसाधनहेतुत्वात्तद्विषयजिज्ञासामवता
रयति दुःखत्रयाभिघाताज्जिज्ञासा
तदपघातकेहेताविति एवंहिशास्त्रवि
षयोनजिज्ञास्येतयदिदुःखंनामजगति
नस्यात् सद्वानजिहासितंजिहासितंवा अश
क्यसमुच्छेदं अशक्यसमुच्छेदताचद्वेधा
दुःखस्यनित्यत्वाद्वातदुच्छेदोपायापरि
ज्ञानाद्वा शक्यसमुच्छेदत्वेपिचशास्त्र
विषयज्ञानस्यानुपायत्वाद्वासुकरस्योपायां
तरस्यसद्भावाद्वा तत्रनतावद्दुःखंनास्ति
नाप्यजिहासितमित्यतउक्तंदुःखत्रया

भिघातादिति दुःखानांत्रयंदुःखत्रयंतत्ख
२ 2 लुआध्यात्मिकमाधिदैविकमाधिभौति
कंच तत्राध्यात्मिकंद्विविधंशारीरंमान
संच शारीरंवातपित्तश्लेष्मणांवैषम्य
निमित्तं मानसंकामक्रोधलोभमोहेर्ष्या
द्वेषविषयविशेषादर्शननिबंधनं सर्वंचै
तदांतरोपायसाध्यत्वादाध्यात्मिकंदुःखं
बाह्योपायसाध्यंदुःखंद्वेधा आधि
भौतिकमाधिदैविकंच तत्राधिभौति
कंमानुषपशुमृगपक्षिसरीसृपस्थाव
रनिमित्तं आधिदैविकंयक्षसविना
यकग्रहाद्यावेशनिबं तदेतत्प्रत्यात्म
वेदनीयंदुःखंरजःपरिणामभेदोनश २

कयतमस्याख्यतुं तदनेनदुःखत्रयेणां
तःकरणावर्तिनाचेतनाशक्तेः प्रतिकूल
तयाऽभिसंबंधोऽभिघातइति एतावता
प्रतिकूलवेदनीयत्वंजिहासाहेतुरुक्तः
यद्यप्यिचनसन्निरुध्यतेदुःखंतथापितद
भिभवःशक्यःकर्त्तुमित्युपरिष्टान्निवेद
यिष्यते तस्मादुपपन्नंतदपघातके
हेताविति तस्यदुःखत्रयस्यापघातक
स्तदपघातकः उपसर्जनस्यापिबुद्ध्या
समाकृष्टस्यतदायरामर्शः अपघात
कश्चहेतुःशास्त्रप्रतिपाद्योनान्यइत्याश
यः अत्राशंकते दृष्टेसापार्थाचेत् अ
यमर्थः अस्तुदुःखत्रयंजिहासितंचत

न्दवतुभवतुचतच्छक्यहानंसहतांचशास्त्र
३ 3 गम्यउपायस्तदुच्छेत्तुंतथाप्यत्रप्रेक्षावताम
युक्ताजिज्ञासादृष्टस्यैपयस्यतदुच्छेदकस्यवि
द्यमानत्वात् तत्वज्ञानस्यत्वनेकजन्मपरंप
रायास्साध्यतयातिदुःकरत्वात् तथाचलौ
किकानामाभाणकः अर्केचेन्मधुविंदेतकि
मर्थंपर्वतंव्रजेत् इष्टस्यार्थस्यसंसिद्धौको
विद्वान्यत्नमाचरेत् संतिचोपायाः शतशः
शारीरदुःखप्रतीकारायेषत्कराःभिषजांव
रैरुपदिष्टाः मानस्यासेपितापस्यप्रतीका
रायमनोज्ञस्त्रीपानभोजनविलेपनवस्त्रालं
कारादिविषयसंप्राप्तिरुपायःसुकरः ए
वमाधिभौतिकस्यापिदुःखस्यनीतिशा २

स्त्राभ्यासकुशलतानिरत्ययस्यानाध्यासना
दिःप्रतीकारहेतुरीषत्करः तथाधिदैविकस्य
दुःखस्यमणिमंत्रौषधाद्युपयोगःसुकरःप्र
तीकारोपायइति निराकरोति नकुतःएकां
तात्यंततोभावात् एकांतोदुःखनिवृत्तेरव
श्यंभावः अत्यंतोदुःखस्यनिवृत्तस्यपुनर
नुत्पादः तयोरेकांतात्यंतयोरभावएकांता
त्यंततोभावः षष्ठीस्थानेसार्वविभक्तिकस्तसिः
एतदुक्तंभवति यथाविधिरसायनादिका
मिनीनीतिशास्त्राभ्यासमंत्राद्युपयोगेपितस्य
तस्याऽध्यात्मिकादेर्दुःखस्यनिवृत्तेरदर्श
नादनैकांतिकत्वं निवृत्तस्यापिपुनरुत्पत्ति
दर्शनात् अनात्यंतिकत्वमिति सुकरोप्येकां

तिकासंतिकदुःखनिवृत्तेर्नदृष्टउपायइति
४ । नापार्थोजिज्ञासेत्यर्थः यद्यपिदुःखममांग
स्यंतथापितत्परिहारार्थत्वेननदपघातोमांग
स्यएवेतियुक्तंशास्त्रादौतत्कीर्तनमिति दृ
ष्टवदानुश्रविकःसह्यविशुद्धिक्षयातिशय
युक्तः तद्विपरीतःश्रेयान्व्यक्ताव्यक्तज्ञवि
ज्ञानात् २ स्यादेतत् माभूदृष्टउ
पायोवैदिकस्तुज्योतिष्टोमादिःसहस्रवर्ष
पर्य्यतःकर्मकलापस्तापत्रयमेकांतमसंतं।
व्यपनेष्यति श्रुतिश्चस्वर्गकामोयजेतेति
स्वर्गश्चयन्नदुःखेनसंभिन्नंनचग्रस्तमनं
तरं अभिलाषोपनीतंचसुखंतत्स्वःपदा
स्पदमिति दुःखविरोधीचसुखविशेषः ४

स्वर्गः सत्त्वस्वसत्तया समूलघातमपहंतिदुः खं
नचैषक्षयी तथाहि अपामसोमममृताअ
भूमेति तत्क्षयेकुतोऽमृतसंभवः तस्माद्दृ
ष्टिकस्योपायस्यतापत्रयप्रतीकारहेतोर्मुहू
र्त्तयामाहोरात्रमाससंवत्सरादिनिर्वर्त्तनीयत
या अनेकजन्मपरंपराभ्याससंपादनीयाद्वि
वेकज्ञानादीषत्करत्वात्पुनरपि व्यर्थोजिज्ञासे
त्याशयवानाह दृष्टवदानुश्रविक इति गु
रुपाठादनुश्रूयत इत्यनुश्रवोवेदः एतदुक्तं
भवति श्रूयत एव परंपरया नकेनचित्क्रियत
इति तत्रभव आनुश्रविक इति तत्रप्राप्तोज्ञा
त इति यावत् आनुश्रविकोपिकर्मकला
पो दृष्टेन तुल्यो वर्त्तत इति ऐकांतात्यंतिकदुः

स्वर्गतोकारानुपायत्वस्योभयत्रापितुल्यत्वा

५ 5 त् यद्यपिचानुश्रविक इति सामान्याभि

धानंतथापिकर्मकलापाभिप्रायंद्रष्टव्यं

विवेकज्ञानस्याप्यानुश्रविकत्वात् तथा

च श्रूयते आत्मावारेज्ञातव्यः प्रकृतितो

विवेक्तव्योनसपुनरावर्त्ततेनसपुनरावर्त्त

इति अस्यांप्रतिज्ञायांहेतुमाह सह्यवि

शुद्धिक्षयातिशययुक्तः अविशुद्धिः

सोमादियागस्यपशुवीजादिवधसाधन

ता यथाहस्मात्र भगवान्पंचशिखाचार्यः

स्वल्पःसंकरःसुपरिहारःसप्रत्यवमर्श

इति स्वल्पःसंकरोज्योतिष्टोमादिजन्मनः

प्रधानापूर्वस्यपशुहिंसादिजन्मनान ५

ऽर्थहेतुनाऽपूर्वेण सुपरिहरः शक्यो हि कि
यताप्यायश्चित्तेन परिहर्तुं अथ प्रमादतः प्रा
यश्चित्तमपि नाचरितं प्रधानकर्मविपाक।
समये संपच्यते तथापि यावदसावनर्थं प्र
सूते तावत्स प्रत्यवमर्शः मृष्यं ते हि पुराण।
पुण्यसंभारोपनीतस्वर्गस्वधाममहाह्रदा
वगाहिनः कुशलाः पापमात्रोपपादितां
दुःखवह्निकणिकां प्रत्यवमर्शेन सहि
ष्णुतया सहन्ते इति सप्रत्यवमर्शः नचन
हिंस्यात्सर्वा भूतानीति सामान्यशास्त्रं विशे
षशास्त्रेणाग्नीषोमीयं पशुमालभेतेत्य
नेन बाध्यत इति युक्तं विरोधाभावात् वि
रोधे हि बलीयसा दुर्बलं बाध्यते नचास्ति वि

रोधः भिन्नविषयत्वात् नहिंस्यादिति नि
६ 8 षेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न
त्वक्रत्वर्थत्वमपि अग्नीषोमीयं पशुमा
लभेतेत्यनेन तु पशुहिंसायाः क्रत्वर्थत्व
मुच्यते नानार्थहेतुत्वाभावः तथा सति
वाक्यभेदप्रसंगात् नचानिर्थयौहेतुत्व
क्रतूपकारकत्वयोः कश्चिद्विरोधः साहि
पुरुषस्य दोषमावक्ष्यति कार्यत्वादनुमित
मितमिति ज्योतिष्टोमादयः स्वर्गमात्रसा
धनं वाजपेयादयस्तु स्वाराज्यस्येसतिशय
युक्तत्वात् परसंपदुत्कर्षो हि हीनसंपदं पु
रुषं दुःखीकरोति अपाम सोमममृता अभू
मेति चामृताभिधानं चिरस्थेमानमुपल ६

क्षयति यदाहुः आभूतसंप्लवंस्थानममृत
त्वंहिभाष्यतइति अतएवचश्रुतिः नक
र्मणानप्रजयाधनेनत्यागेनैकेनामृतत्वमा
नशुः परेणनाकंनिहितंगुहायांविभ्राजते
यद्यतयोविशंति तथाकर्मणामृत्युमृष
योनिषेदुः प्रजावंतोद्रविणमीहमानाः त
थापरेऋषयोमनीषिणः परंकर्मभ्योमृ
तत्वमानशुरिति तदेतत्सर्वमभिप्रेत्या
ह तद्विपरीतः श्रेयान् तस्मादानुश्रवि
काद्दुःखापघातकोपायात्सोमपानादे
रविशुद्धादनित्यसातिशयफलाद्विपरी
तोविशुद्धोहिंसादिसंकराभावान्निरतिश
यफलोऽसकृत्पुनरावृत्तिश्रुतेः नच

कार्यत्वेनानित्यताफलस्ययुक्ता भावरू
१७ पस्यकार्यस्यतथाभावात् दुःखध्वंसस्य
तुकार्यस्यापितद्विपरीत्यात् नचदुःखा
न्तरोत्पादः कारणाप्रवृत्तौकार्यानुत्पा
दात् विवेकज्ञानोपजननपर्यन्तत्वा
च्चकारणप्रवृत्तेः एतच्चोपरिष्टादुपपा
दयिष्यते अक्षरार्थस्तुतस्मादानुश्र
विकात् दुःखापघातकाद्धेतोर्विपरीतः
सत्वपुरुषान्यताप्रत्ययसाक्षात्कारोदुः
खापघातकोहेतुः अतएवश्रेयान् आ
नुश्रविकोहिवेदविहितत्वान्मात्रयादुःखा
पघातकंत्वाच्चप्रशस्यःसत्वपुरुषान्यता
प्रत्ययोपिप्रशस्यस्तदनयोःप्रशस्ययो १

मध्येसत्वपुरुषान्यताप्रत्ययः श्रेयान् कुतः
पुनरस्योत्पत्तिरित्यतउक्तं व्यक्ताव्यक्तज्ञविज्ञा
नात् व्यक्तंचाव्यक्तंचज्ञश्चव्यक्तज्ञास्तेषांवि
ज्ञानंविवेकेनज्ञानंव्यक्तज्ञानपूर्वकमव्यक्त
स्यतत्कारणस्यज्ञानं तयोश्चपारार्थेनआ
त्मापरोज्ञायतइतिज्ञानक्रमेणाभिधानं ए
तदुक्तंभवति श्रुतिस्मृतीतिहासपुराणेभ्यो
व्यक्तादीन्विवेकेनश्रुत्वाशास्त्रयुक्त्याच
व्यवस्थाप्यदीर्घकालादरनैरंतर्यसत्का
रसेविताद्भावनामयात् विज्ञानादिति
तथावक्ष्यति एवंतत्वाभ्यासान्नास्मिनमे
नाहमित्यपरिशेषं अविपर्ययाद्विशुद्धं
केवलमुत्पद्यतेज्ञानम्इति तदेवंप्रेक्षा

वदपेक्षितार्थत्वेन शास्त्रारंभं समाधाय
८ 4 शास्त्रमारभमाणः श्रोतृबुद्धिसमवधा
नायतदर्थं संक्षेपतः प्रतिजानीते मूल
प्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृ
तयः सप्त षोडशकस्तु विकारो न प्रकृति
र्न विकृतिः पुरुषः ३ संक्षेपतो हि शास्त्र
स्य चतस्रो विधाः कश्चिदर्थः प्रकृतिरेव
कश्चिदर्थो विकृतिरेव कश्चिदुभयरूपः
कश्चिदनुभयरूपः तत्र का प्रकृतिरेवेत्य
त उक्तं मूलप्रकृतीति प्रकरोतीति प्र
कृतिः प्रधानं सत्वरजस्तमसां साम्यावस्था
साविकृतिरेवेत्यंत उक्तं मूलप्रकृतीति
प्रकरोतीति प्रकृतिः प्रधानं सत्वरजस्त ८

मसांसाम्यावस्थासाविकृतिःप्रकृतिरेवेत्य
र्थः कस्मादित्यतउक्तं मूलेति मूलंचा।
सौप्रकृत्तिश्चेति मूलप्रकृतिः विश्वस्यका
र्यकलापस्यसामूलंनत्वऽस्यामूलांतरमस्ति
अनवस्थाप्रसंगात् नचानवस्थायांप्रमा
णमस्तीतिभावः कतमाः पुनः प्रकृतिवि
कृतयः कियंत्यश्च इत्यतउक्तं महदाद्याः
प्रकृतयश्चताविकृतयश्चइतिप्रकृत्ति
विकृतयः सप्तेति तथाहि महत्तत्वमहंका
रस्यप्रकृतिः विकृतिश्चमूलप्रकृतेः एवम
हंकारतत्वंतन्मात्राणामिंद्रियाणांचप्रकृ
तिः विकृत्तिश्चमहतः एवंपंचतन्मात्राणि
तत्वानिभूतानामाकाशादीनांप्रकृतयो

विकृतयश्चाहंकारस्य अथकाविकृति
१ रेवकियतीचेत्यतउक्तं षोडशकस्तुविका
रइति षोडशसंख्यापरिमितोगणःषो
डशकः तुशब्दोऽवधारणेभिन्नक्रमः
पंचभूतान्येकादशेंद्रियाणीति षोडश
कोगणोविकारएवनप्रकृतिरिति यद्य
पिपृथिव्यादीनामपिगोघटादिवृक्षाद
योविकाराः एवंतद्विकारभेदानांपयो
बीजादीनांदध्यंकुरादयस्तथापिगवाद
योबीजादयोनपृथिव्यादिभ्यस्तत्वांतरम्
तत्वांतरोपादानत्वंचप्रकृतित्वमिहा
भिप्रेतम् इतिनदोषः सर्वेषांगोघटादी
नांस्थूलतेंद्रियग्राह्यताचसमेतिनतत्वां १

तस्य अनुभयरूपमुक्तं तदाह न प्रकृ-
तिर्न विकृतिः पुरुष इति । एतत्सर्वमुप-
रिष्टादुपपादयिष्यते ३ तमिमम-
र्थं प्रामाणिकं कर्तुमभिप्रेताः प्रमाण-
भेदा लक्षणीयाः न च सामान्यलक्ष-
णमंतरेण शक्यं विशेषलक्षणं कर्तुमि-
मिति प्रमाणसामान्यं तावल्लक्षयति
दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसि-
द्धत्वात् त्रिविधं प्रमाणमिष्टं प्रमेयसि-
द्धिः प्रमाणाद्धि प्रमाणमिष्टमिति अ-
त्र च प्रमाणमिति समाख्यालक्ष्यपदं त-
न्निर्वचनं च लक्षणं प्रमीयतेऽनेनेति हि
निर्वचनात्सामांप्रतिकरणत्वं गम्यते

असंदिग्धाऽविपरीतानधिगतविषयावि
१० 10 ज्ञवृत्तिर्बोधश्चापौरुषेयः फलं प्रमा तत्सा
धनं प्रमाणमिति एतेन संशयविपर्य
यस्मृतिसाधनेषु प्रसंगः संख्याविप्र
तिपत्तिं निराकरोति त्रिविधमिति तिस्रो
विधा यस्य प्रमाणसामान्यस्य त्रिविधमिति
न न्यूनं नाप्यधिकमित्यर्थः विशेषलक्ष
णानन्तरं चैतदुपपादयिष्यामः कतमाः
पुनस्तास्तिस्रो विधा इत्यत आह दृष्टम
नुमानमाप्तवचनं चेति एतच्च लौकिकप्र
माणाभिप्रायं लोकव्युत्पादनार्थत्वा
च्छास्त्रस्य तस्यैवात्राधिकारात् आ
र्षं तु विज्ञानं योगिनां न लोकव्युत्पादना १०

याऽलमिति सिद्धपि नाऽभिहितं अनधि
कारात् स्यादेतत् माभून्न्यूनमधिकं च
कस्मान्न भवति संगिरंते हि प्रति वादिनः
उपमानादीन्यपि प्रमानानी सत आह
सर्वप्रमाणप्रसिद्धत्वादिति एषु वक्ष्यानुमा
नाप्तवचनेषु सर्वेषां प्रमाणानां सिद्धत्वात्
अंतर्भावादित्यर्थः एतच्चोपपादयिष्य
तइत्युक्तं अथ प्रमेयव्युत्पादनाय प्रवृत्तं
शास्त्रं कस्मात्प्रमाणं सामान्यतो विशेष
तश्च लक्षयतीत्यत आह प्रमेयसिद्धिः
प्रमाणाद्धीति सिद्धिः प्रतीतिः सेयमा
र्यीथेक्रमानुरोधेन पाठक्रममनादृत्य
व्याख्याता ४ संप्रति विशेषलक्ष

णावसरेप्रसक्तस्यप्रमाणेषुज्येष्ठत्वात्तद
११ ॥ धीनत्वाच्चानुमानादीनांप्रतिवादिनामवि
प्रतिपत्तेश्चतदेवतावल्लक्षयतिप्रतिवि
षाऽध्यवसायोदृष्टमिति प्रतिविषया
ध्यवसायोदृष्टंत्रिविधमनुमानमाख्यातम्
तल्लिंगलिंगिपूर्वकमाप्तश्रुतिराप्तवच
नंतु ५ अत्रदृष्टमितिलक्ष्यनिर्दे
शः परिशिष्टंतुलक्षणं समानास
मानजातीयव्यवच्छेदोलक्षणार्थः अ
वबयवार्थस्तुविषिण्वंतिविषयिणमव
बध्नंतिस्वेनरूपेणनिरूपणीयंकुर्वंती
तियावत् विषयाःपृथिव्यादयःसुखा
दयश्चास्मदादीनाम् अविशेषाश्चत ११

तन्मात्रलक्षणा योगिनामूर्द्धुरेतसां च विष
याः विषयं विषयं प्रति वर्त्तत इति प्रतिवि
षयमिंद्रियं वृत्तिश्च सन्निकर्षः अर्थस
न्निकृष्टमित्यर्थः तस्मिन्नध्यवसायः त
दाश्रित इत्यर्थः अध्यवसायश्च बुद्धिव्या
पारो ज्ञानं उपात्तविषयाणामिंद्रियाणां
वृत्तौ सत्यां बुद्धेस्तमोभिभवे सति यः सत्वस
मुद्रेकः सोध्यवसाय इति च वृत्तिरिति च
ज्ञानमिति च व्याख्यायते इतीदं तत्प्रमा।
णं अनेन यश्चेतनाशक्तेरनुग्रहस्तत्फलं
प्रमा बोधः बुद्धितत्वं हि प्राकृतत्वादचेत
नमिति तदीयोध्यवसायोप्यचेतनो घटा
दिवत् एवं बुद्धितत्वस्य सुखादयोपि परि

णामभेदाअचेतनाः पुरुषस्तुसुखाद्यन
१२ 12 नुषंगीचेतनः सोयंबुद्धितत्ववर्त्तिनाज्ञान
सुखादिनातत्प्रतिबिंबितस्तच्छायायस्या
ज्ञानसुखादिमानिवभवतीतिचेतनः सो
यंबुद्धितत्ववर्त्तिनाज्ञानसुखादिनातत्प्र
तिबिंबितस्तच्छायायस्याज्ञानसुखादिमा
निवभवतीतिचेतनोनुगृह्यते चितिच्छा
यायस्याश्चाचेतनापिबुद्धिस्तदध्यवसाय
श्चाचेतनश्चेतनवद्भवतीति यथावक्ष्या
ति तस्मात्तत्संयोगादचेतनंचेतनावदि
वलिंगं गुणकर्तृत्वेपितथाकर्त्तेवभव
त्युदासीनइति अत्राध्यवसायग्रहणे
नसंशयंव्यवच्छिनत्ति संशयस्यानवस्थि १२

तग्रहणेनानिश्चितरूपत्वात् निश्चयो
ध्यवसायइतिवानर्थांतरंविषयग्रहणेना
सद्विषयंविपर्ययमपाकरोति प्रतिग्रहणे
नेंद्रियार्थसन्निकर्षसूचनादनुमानस्मृ
त्यादयःपराकृताभवंति तदेवंसमानास
मानजातीयव्यवच्छेदकत्वात्प्रतिविषयाध्य
वसायइतिदृष्टस्यसंपूर्णंलक्षणंलक्षणां
तराणितैर्थिकानांनभाषितानिनदूषिता
निविस्तरभयादिति नानुमानंप्रमाणमि
तिवदन्लोकायतिकोनाप्रतिपन्नःसं
दिग्धोविपर्यस्तोवापुरुषःकथंप्रतिपा
द्येत नचपुरुषांतरगताअज्ञानसंदेह
विपर्ययाःशक्याअर्वाग्दृशाप्रत्यक्षेण

प्रतिपत्तुं नापिप्रमाणांतरेण अनभ्युप
१३ 13 गमात् अनवधृताज्ञानसंशयविपर्यो
सस्तुयंकंचित्पुरुषंप्रतिप्रवर्त्तमानअन
वधेयवचनतयाप्रेक्षावद्भिरुन्मत्तवदु
पेक्षेत तदनेनाज्ञानादयःपुरुषवर्त्तिनो
ऽभिप्रायभेदात्वचनभेदात्लिंगादनु
मातव्याइत्यकामेनाप्यनुमानंप्रमाणम
भ्युपेयं तत्रप्रत्यक्षकार्यत्वादनुमानं
प्रत्यक्षानंतरंलक्षणीयं तत्रापिसामान्य
लक्षणपूर्वकत्वाद्विशेषलक्षणस्यानुमा
नसामान्यंतावल्लक्षयति लिंगलिंगि
पूर्वकमिति लिंगंव्याप्यंलिंगिव्यापकं
शंकितसमारोपितोपाधिनिराकर

णेनस्वभावप्रतिबद्धं व्याप्यं येनच प्रतिब

द्धं तत् व्यापकं लिंगलिंगिग्रहणेन वि

षयवाचिना विषयिणं प्रत्ययमुपलक्षयति

धूमादिर्व्याप्यो वह्न्यादिर्व्यापक इति

यः प्रत्ययस्तत्पूर्वकं लिंगिग्रहणं चाव

र्तनीयम् तेन च लिंगमस्यास्तीति पक्ष

धर्मताज्ञानमपि दर्शितं भवति तद्व्या

प्यव्यापकभावपक्षधर्मताज्ञानपूर्व

कमनुमानमित्यनुमानसामान्यं लक्षित

म् अनुमानविशेषांस्तंत्रांतरगतान

भिमतान्स्मारयति त्रिविधमनुमा

ख्यातम् तदिति तत्सामान्यतो लक्षितं

विशेषतस्त्रिविधं पूर्ववत् शेषवत्सामा

न्यतोदृष्टंचेति तत्रप्रथमतस्तावद्द्वि
१५ धंवीतमवीतंच अन्वयमुखेनप्रवर्त्तमा
15
नंविधायकंवीतं व्यतिरेकमुखेनप्रव
र्त्तमानंनिषेधकंअवीतं तत्रावीतंशेष
वत् शिष्यतेपरिशिष्यतइतिशेषः
सएवविषयतयायस्यास्त्यनुमानज्ञा
नस्यतच्छेषवत् यदाहुः प्रसक्तप्रति
षेधेन्यत्राप्रसंगात् शिष्यमाणेसंप्र
त्ययः परिशेषइति अस्यचावीतस्य
व्यतिरेकिणउदाहरणमग्रेभिधास्य
तइति वीतंद्वेधा पूर्ववत्सामान्य
तोदृष्टंच तत्रैकंदृष्टस्वलक्षणसामा
न्यविषयंयत्तत्पूर्ववत् पूर्वंप्रसिद्धंदृ १५

ष्टस्वलक्षणसामान्यमितियावत् तस्य
विषयत्वेनास्त्यनुमानज्ञानस्येतिपूर्व
वत् यथाधूमाद्वह्नित्वसामान्यविशे
षः पर्वतेनुमीयतेतस्यवह्नित्वसामान्यवि
शेषस्यस्वलक्षणवह्निविशेषोदृष्टोर
सवत्यां अपरंचवीतंसामान्यतोदृष्टम
दृष्टस्वलक्षणसामान्यविषयम् यथें
द्रियविषयमनुमानं अत्रहिरूपादि
ज्ञानानांक्रियात्वेनकरणवत्त्वमनुमीय
ते यद्यपिचकरणत्वसामान्यस्यछि
दादौवास्यादिस्वरूपलक्षणमुपलब्धं
तथापियज्जातीयंरूपादिज्ञानेक
रणमनुमीयतेतज्जातीयस्यकरण

स्यस्वलक्षणंप्रत्यक्षेणनदृष्टत इंद्रिय
१५ 15 जातीयंहितत्करणं नचेंद्रियत्वसामान्य
स्यस्वलक्षणंप्रत्यक्षगोचरोऽपीदृशं
यथावह्नित्वसामान्यस्यस्वलक्षणंव
ह्निः सोऽयंपूर्ववतःसामान्यतोदृष्टात्
त्सपिवीतत्वेनतुल्यत्वेविशेषः अत्रदृ
ष्टं दर्शनंसामान्यतइतिसामान्यस्यसा
र्वविभक्तिकस्तसिः अदृष्टस्वलक्षण
स्यसामान्यदर्शनमनुमानमित्यर्थः स
र्वंचैतदस्माभिर्न्यायवार्त्तिकतात्पर्यटी
कायांव्युत्पादितमितिनेहोक्तंविस्तरभ
यादिति प्रयोजकवृद्धशब्दश्रवणस
मनंतरंप्रयोज्यवृद्धप्रवृत्तिहेतुज्ञाना १५

नुमानपूर्वकत्वाच्छब्दार्थसंबंधग्रहस्यशब्दा
र्थसंबंधग्रहसहकारिणश्चशब्दस्यार्थ
प्रत्यायकत्वादनुमानपूर्वकत्वमित्यनु
मानानंतरंशब्दंतावल्लक्षयति आप्त
श्रुतिराप्तवचनंत्विति अत्राप्तवचनमि
तिलक्ष्यनिर्देशः परिशिष्टंलक्षणं आ
प्ताप्राप्ताप्युक्तेतियावत् आप्ताचासौश्रु
तिश्चेत्याप्तश्रुतिः श्रुतिर्वाक्यजनितं
वाक्यार्थज्ञानंतच्चस्वतः प्रमाणमपौरु
षेयवेदजनितत्वेनचसकलदोषाशंका
विनिर्मुक्तंयुक्तंभवति एवंवेदमूलस्मृ
तीतिहासपुराणवाक्यजनितमपिज्ञानंयु
क्तं आदिविद्दुषश्चकपिलस्यकस्यादे

कल्पांतराधीतश्रुतिस्मरणसंभवः सुप्त
१६ प्रबुद्धस्येवपूर्वेद्युरवगतानामर्थानामन्ये
16 द्युः तथाचावट्यजैगीषव्यसंवादेभग
वान्जैगीषव्योदशमहाकल्पवर्त्तिजन्मस्म
रणमात्मनउवाच दशमहाकल्पेषुवि
परिवर्त्तमानेनमयेत्यादिनाग्रंथसंदर्भे
ण अप्तग्रहणेनचायुक्ताःशाक्यभिक्षु
निर्ग्रंथिकसंसारमोचकादीनामागमाभा
साःपरिहृताभवंति अयुक्तत्वंचैतेषां
विगानातविच्छिन्नमूलत्वात प्रमाण
विरुद्धार्थाभिधानाच्चकैश्चिदेवम्लेच्छा
दिभिःपुरुषापसदैःपशुप्रायैःपरि
ग्रहाद्वोद्धव्यं तुशब्देनानुमानाद्यवच्छि १६

नत्ति वाक्यार्थोहिप्रमेयः नचतद्धर्मोवाक्य
मूयेनतत्रलिंगंभवेत् नचवाक्यंवाक्यार्थं
बोधयेत्संबंधग्रहणमपेक्षते अभिनव
कविनिरचितस्यवाक्यस्यादृष्टपूर्वस्याननु
भूतचरवाक्यार्थबोधकत्वादिति एवं
प्रमाणसामान्यलक्षणेषुतद्विशेषल
क्षणेषुचसत्सुयानिप्रमाणांतराण्युपमा
नादीनिप्रतिवादिभिरभ्युपेयंतेतान्युक्तल
क्षणेष्वंतर्भवंति तथाहि उपमानंतावद्य
थागौस्तथागवयइतिवाक्यं तज्जनिता
चधीरागमएवयोऽयंगवयशब्दोगोस
दृशस्यवाचकइतिप्रत्ययःसोऽप्यनुमानं
योहिशब्दोयत्रवृद्धैःप्रयुज्यतेसोऽसति

हृत्यंतरे तस्य वाचको यथा गोशब्दो गोत्व
१७ स्य प्रयुज्यते तत्र गवयशब्दो गोसदृश इति
तस्यैव वाचक इति ज्ञानमनुमानमेव यत्तु
गवयस्य चक्षुः सन्निकृष्टस्य गोसादृष्य
ज्ञानं तत्प्रत्यक्षमेव अतएव च समर्यमाणा
यां गवि गवय सादृष्य ज्ञानं प्रत्यक्षं न स्मृ
त्वि सादृष्यमन्यच्च गवये भूयोवयव
मान्ययोगो हि जात्यंतरवर्त्ती जात्यंतरे सा
दृष्यमुच्यते सामान्ययोगश्चैकः स च
गवये प्रत्यक्षेण गृह्यते इति नोपमान
स्य प्रमेयांतरमस्ति यत्र प्रमाणांतरमुप
मानं भवेत् अतो न प्रमाणांतरमुपमा
नं एवमर्थापत्तिरपि न प्रमाणांतरं त १७

थाहि जीवतश्चैत्रस्य गृहाभावदर्शनेन
वहिर्भावस्यादृष्टस्य कल्पनार्थापत्तिरभि
मतावृद्धानां साप्यनुमानमेव यदा खल्व
व्यापकः सन्नेकत्र नास्ति तदन्यत्रास्ति य
दा वाऽव्यापक एकत्रास्ति तदान्यत्र नास्तीति
सुकरः स्वशरीर एव व्याप्तिग्रहः तथा च
सतो गृहाभावदर्शनेन लिंगेन वहिर्भावद
र्शनमनुमानमेव नच चैत्रस्य क्वचित्सत्वे
न गृहाभावः शक्योऽपह्नोतुं येनासिद्धो
गृहाभावो वहिर्भावे हेतुः स्यात् न च गृ
हाभावेन वा सत्वं अपह्नूयते येन सत्वमे
वानुपपद्यमानमात्मानं न वहिरवस्था
पयेत् तथाहि चैत्रस्य गृहासत्वेन सत

मात्रंवाविरुद्धंतग्रहसत्वंवा नतावद्य
१८ त्रक्कचनसत्वस्यास्तिविरोधोगृहासत्वेन
18 भिन्नविषयत्वात् देशसामान्येनगृह
विशेषाक्षेपोपिपाक्षिकइतिसमानवि
षयतयाविरोधइतिचेन्न प्रमाणानिश्चि
तस्यग्रहासत्वस्यपाक्षिकतयासांशयिके
नग्रहसत्वेनप्रतिक्षेपायोगात् नापिप्र
माणानिश्चितोग्रहाभावःपाक्षिकमस्य
ग्रहसत्वंप्रतिक्षिपन्सत्वमपिप्रतिक्षेप्तुं
सांशयिकत्वंवापनेतुमर्हतीतियुक्तं ग्र
हावच्छिन्नेनचैत्राभावेनग्रहसत्वंविरु
द्धत्वात्प्रतिक्षिप्यते नतुसत्वमात्रं तस्य
तत्रौदासीन्यात् तस्माद्ग्रहाभावेनलिं १८

गेनसिद्धं नसतोवहिर्भावोनुमीयत इतियु
क्तम् एतेनविरुद्धयोः प्रमाणयोर्विषय
व्यवस्थयाऽविरोधायाद्दनमर्थापत्तेर्विषय
इतियरास्तं अवच्छिन्नानवच्छिन्नयोर्विरो
धाभावात् उदाहरणांतराणिचार्थाप
त्तेरेवमेवानुमानेंतर्भावनीयानि तस्मा
न्नानुमानात्प्रमाणांतरमर्थापत्तिरिसि
द्धं एवमभावोपिप्रत्यक्षमेव नहिभूत
लस्यपरिणामविशेषात्कैवस्यलक्षणा
दन्योघटाभावोनाम प्रतिक्षणपरिणा
मिनोहिसर्वएवभावाऋतेचितिशक्तेः
सचपरियामभेदऐंद्रियकाइति
नास्तिप्रत्यक्षानवरुद्धोविषयोयत्राभा

वाक्यंप्रमाणांतरमभ्युपेयमिति संभवस्तु
१९ 19 खार्य्यांद्रोणाढकप्रस्थाद्यवगमः सचानुमा
नमेवखारीत्वंहिद्रोणाद्यविनाभूतंप्रतीतंखा
र्य्यांद्रोणादिसत्वमवगमयतीति यच्चानि
र्दिष्टप्रवक्तृकप्रवादपारंपर्य्यमात्रमितीहो
चुर्वृद्धाइत्यैतिह्यं यथेहवटेयक्षःप्रति
वसतीतिनतत्प्रमाणंअनिर्दिष्टप्रवक्तृक
त्वेनसांशयिकत्वात् आप्तवक्तृकत्वनि
श्चयेत्वागमइत्युपपन्नंत्रिविधंप्रमाण
मिति एवंतावद्व्यक्ताव्यक्तज्ञलक्षणप्र
मेयसिद्ध्यर्थंप्रमाणानिलक्षितानि तत्र
महंपृथिव्यादिस्वरूपतःपांसुलपादो
पिप्रत्यक्षतःप्रतिपद्यते पूर्ववताचानु १९

मानेनधूमादिदर्शनाद्वह्न्यादीनि बुद्धिसाद
नायमंदप्रयोजनंशास्त्रमिति दुरधिगमम
नेनसुसाध्यं तत्रयत्प्रमाणंयत्रशक्तंतदुक्त
लक्षणेभ्यः प्रमाणेभ्योनिष्कृष्यदर्शयति
सामान्यतस्तुदृष्टादतीन्द्रियाणांप्रतीति
रनुमानात् तस्मादपिचाभिचासिद्धंप
रोक्षमाप्तागमात्सिद्धं ६ तुशब्दः
प्रत्यक्षपूर्वंद्वांविशिनष्टिसामान्यतोदृ
ष्टादध्यवसायादतीन्द्रियाणांप्रधानपुरु
षादीनांप्रतीतिःचितिच्छायापत्तिर्बुद्धेरध्य
वसायइत्यर्थः उपलक्षणंचैतच्छेषव
तदित्यपिद्रष्टव्यं तत्किंसर्वेष्वतीन्द्रियेषु
सामान्यतोदृष्टमेवप्रवर्त्ततेतथाचयत्र

तन्नास्तिमहदाद्यारंभकमेसर्गात्पूर्वदेव
ताहैचतेषामभावःप्राप्तइत्यताह तस्मा
दस्तीति तस्मादापीयेतावतैवसिद्धेचका
रेणशेषवदित्यपिसमुच्चितं स्यादेतत्
यथागगनकूर्मरोमशशविषाणा।
दिषुप्रत्यक्षमप्रवर्त्तमानंतदभावमवग
मयति एवंप्रधानादिष्वपि तत्कथं
तेषांसामान्यतोदृष्टादिभ्यःसिद्धिरित्य
तआह अंतिदूरात्सामीप्यादिंद्रियघा
तान्मनोनवस्थानात् सौक्ष्म्याद्व्यवधा
नादभिभवात्समानाभिहाराच्च ७
अनुपलब्धिरितिवक्ष्यमाणंसिंहाव
लोकितन्यायेनानुषंजनीयं यथोस

तन्वियतिय तत्री अतिदूर तयासन्नपिप्र
यत्नेक्षेणनोपलभ्यते सामीप्यादिसत्रा
प्पतिरनुवर्त्तनीयः यथालोचनस्थमंज
नमतिसामीप्यान्नदृश्यते बाल्येंद्रियघा
तोंधत्वबधिरत्वादिः मनोनवस्थानात्
यथाकामाद्युपहतमनाःस्फीतालोक
मध्यवर्त्तिनंइंद्रियसन्निकृष्टमप्यर्थंन
पश्यति सोऽस्यात् यथेंद्रियसन्निकृ
ष्टमपियरमाएवादिप्रणिहितमना
अपिनपश्यति ब्यवधानात् यथा
कुआदिब्यवहितराजदारादिनपश्य
ति अभिभवात् यथाहिसौरीभिर्भा
भिरभिभूतंग्रहनक्षत्रमंडलंनपश्यति

समानाभिहारात् यथातोयदविमुक्तो
२१ 21 दविंदून् जलाशयेनपश्यति चकोरेतु
कुमुद्वयार्थः तेनानुद्भवोपिसंगृहीतः
यथाक्षीराद्यवस्थायां दध्याद्यनुद्भवान्न
दृश्यते एतदुक्तंभवति नप्रत्यक्षनि
वृत्तिमात्रादभावोभवोभवस्यातिप्रसंगा
त् तथाहि गृहाद्विनिर्गतोगृहज
नमपश्यंस्तदभावंविनिश्चिनुयात् न
चैवं अपितुयोग्यप्रत्यक्षनिवृत्तेस्तमभा
वंनिश्चिनोति नचप्रधानपुरुषादीना
मस्तिप्रत्यक्षयोग्यतेति तन्निवृत्तिमात्रा
न्न तदभावनिश्चयोयुक्तः प्रामाणिका
नामिति कतमत्पुनरेतेषुकारणंप्रधा २१

नादीनामनुपलब्धाविर्यत आह सौक्ष्म्या
त्तदनुपलब्धिर्नाभावात् कार्यतस्तदुपल
ब्धेः महदादि तच्च कार्यं प्रकृतिसरूपं वि
रूपं च ८ अथ यथा भावदेव सूक्ष्ममरस वदेते
षामनुपलब्धिः कस्मान्न संभवतीत्यत आ
ह नाभावात् कुतः कार्यतस्तदुपलब्धेः
तदिति प्रधानं परामृशति पुरुषोपलब्धौ
तु प्रमाणं वक्ष्यति संघातपरार्थत्वादिति
दृष्टतर प्रमाणावधारिते हि प्रत्यक्षमप्र
वर्त्तमानमयोग्यत्वान्न प्रवर्त्तत इति कल्प्य
ते सक्षमस्करसोनप्रमाणावधारित इति
न तत्र प्रत्यक्षयोग्यता शक्या ध्वंसयितुमि
तिभावः किंपुनस्तत्कार्यं यतः प्रधाना

२२ 22 नुमितिरित्यत आह महदादि तत्त्वकार्यं
एतच्च यथागमकं तथोपरिष्टादुपपा
दयिष्यते तस्य च कार्यस्य विवेकज्ञानो
पयोगिनी सारूप्यवैरूप्ये आह प्रकृति
सरूपं विरूपं च एते चोपरिष्टाद्विभ
जनीये कार्यात्कारणमात्रं गम्यते सं
ति चात्र वादिनां विप्रतिपत्तयः केचि
दाहुरसतः सज्जायत इति एकस्य
सतो विवर्त्तः कार्यजातं न वस्तु सदि
त्यपरे अन्ये तु सतोऽसज्जायत इति
सतः सज्जायत इति वृद्धाः तत्र पूर्व
स्मिन्कल्पत्रये प्रधानं न सिध्यति सुख
दुःखमोहभेदवत्शब्दाद्यात्मकत्वं हि २२

जगत्कारणस्य प्रधानस्य प्रधानत्वं हि स
त्वरजस्तमःस्वभावत्वं यदि पुनरसतः सञ्जा
येत असन्निरूपाख्यं कारणं कथं सुखा
दिरूपशब्दाद्यात्मकं स्यात् सदसतो
स्तादात्म्यानुपपत्तेः अथैकस्य सतो वि
वर्त्तः शब्दादिप्रपंचः तथापि सतः सञ्जा
यत इति न स्यात् नचास्याद्वयस्य प्रपं
चात्मकत्वं अपि त्वप्रपंचस्य प्रपंचात्मक
तया प्रतीतिर्भ्रमः॥ येषामपि कणभक्षा
क्षचरणादीनां सत एव कारणादसतो ज
न्म तेषामपि सदसतोरेकत्वानुपपत्तेरि
ति न कार्यात्मकं कारणमिति न तन्मते
प्रधानसिद्धिरतः प्रधानसिद्ध्यर्थं ताव

त्कार्यंप्रतिजानीते असदकरणादुपा
२३ दानग्रहणात्सर्वसंभवाभावात् शक्तस्य
23 शक्यकरणात्कारणभावाच्चसत्कार्यं
९ सत्कार्यंकारणव्यापारात्प्रागपीति
शेषः तथाचनसिद्धसाधनंनैयायक
तनयैरुद्भावनीयं यद्यपिवीजमृत्पिंडा
दिप्रध्वंसानंतरमंकुरमंकुरघटाद्युत्पत्ति
रुपलभ्यते तथापिनप्रध्वंसस्यकारण
त्वमपितुभावस्यैववीजाद्यवस्य अभा
वाच्चभावोत्पत्तौतस्यसर्वत्रसुलभत्वात्
सर्वत्रसर्वदाकार्योत्पादप्रसंगइत्यादि
न्यायवार्त्तिकतात्पर्यटीकायामभिहि
तमस्माभिः प्रपंचप्रत्ययश्चासतिबाध २३

केन शक्यो मिथ्येति वक्तुमिति कणभ
क्षाक्षचरणमतमवशिष्यते तत्रेदं प्रति
ज्ञातं सत्कार्यमिति अत्र हेतुमाह अ
सदकरणात् असच्चेत्कारणव्यापारा
त्पूर्वं कार्यं नास्य सत्वं केनापि कर्त्तुं शक्यं
नहि नीलं शिल्पिसहस्रेणापि पीतं क
र्त्तुं शक्यं सदसत्वे घटस्य धर्माविति चे
त् तथाप्यसति धर्मिणि तस्य स धर्म
इति सत्वं तदवस्थमेव तथा च नासत्वं
असंबद्धेनातदात्मना वा सत्वेन कथमस
घटः तस्मात्कारणव्यायापारादूर्ध्व
मिव ततः प्रागपि सदेव कार्यं कारणा
त्तस्य सतोभिव्यक्तिरेवाविशिष्यते

सतश्चाभिव्यक्तिरुपलभ्यथापीडनेन
२४ तिलेषुतैलस्यअवघातेनधान्येषुतंदुला
२५ नांदोहनेनसौरभेयीषुपयसः असतः
करणेतुननिदर्शनंकिंचिदस्ति नखल्व
भिव्यज्यमानंचोत्पद्यमानंक्वचिदसद्दृ
ष्टं इतश्चकारणव्यापारात्प्राक्सदे
वकार्यमित्याह उपादानग्रहणात्
उपादानानिकारणानितेषांग्रहणंका
र्येणसंबंधः उपादानैःकार्यस्यसंबंधा
दितियावत् एतदुक्तंभवति कार्येण
संबद्धंकारणंकार्यस्यजनकंसंबंधश्चका
रणैःकार्यस्यासतोनसंभवतितस्मात्स
दिति स्यादेतत् असंबद्धमेवकारणैः २४

कस्मात्कार्यंनजन्यतेतयाचासदेवोसत्स्य
तेइत्यतआह सर्वसंभवाभावात् असं
वद्धस्यजन्यत्वेसंवद्धताविशेषेणसर्वका
र्यंजातंसर्वस्मात्भवेत् नचैतदस्ति तस्मा
न्नासंवद्धंअसंवद्धेनजन्यते अपितुसंव
द्धंसंवद्धेनजन्यतइतियथाहुः सांख्यवृद्धाः
असत्वान्नास्तिसंवंधः कारणैः सत्वसं
गिभिः असंवद्धस्यचोत्पत्तिमिच्छतोनव्य
वस्थितिरिति स्यादेतदसंवद्धमपिस
त्तदेवकरोतियत्रयत्कारणंशक्तंशक्ति
श्चकार्यदर्शनादवगम्यते अतोनाव्यव
स्थेति अतआह शक्तस्यशक्यकर
णात् साशक्तिः शक्तकारणाश्रयास

सर्वत्रवास्याच्छक्येवा सर्वत्रचेत्तदवस्थै।
२५ वाव्यवस्था शक्येचेत्कथमसतिशक्येतत्त्रे
25
तिवक्तव्यम् शक्तिभेदएवसताद्दृशोम
तः किंचिदेव कार्यं जनयेत्नसर्वमितिचे
त् हंतभोः शक्तिविशेषःकार्येसंवद्धोवा
स्यादसंबद्धोवासंबद्धत्वेनासतासंवंधइति
सत्कार्यंअसंवद्धत्वैसैवाव्यवस्थैतिसुष्ठूक्तं
शक्तस्यशक्यकरणादितिइतश्चसत्कार्य
मित्याह कारणभावाच्च कार्यस्यकार
णात्मकत्वात् नहिकारणाद्भिन्नंकार्यं
कारणंचसदितिकथंतदभिन्नंकार्य
मसद्भवेत् कार्यस्यकारणाभेदसाध
कानिच प्रमाणानि नपटस्तंतुभ्योभि २५

द्यतेतद्धर्मत्वात् इहयद्यतोभिद्यतेतत्त
स्यधर्मोनभवति यथागोरश्वस्यधर्मश्च
पटस्तंतूनांतस्मान्नार्थांतरं उपादानोपा
देयभावाच्चनार्थांतरत्वंतंतुपटयोः ययोर
र्थांतरत्वंनतयोरुपादानोपादेयभावः
यथाघटपटयोः उपादानोपादेयभाव
श्चतंतुपटयोस्तस्मान्नार्थांतरत्वमिति
इतश्चनार्थांतरत्वंतंतुपटयोः संयोगा
प्राप्त्यभावात् अर्थांतरत्वेहिसंयोगोदृ
ष्टोयथाकुंडबदरयोः अप्राप्तिर्वायथाहि
मवद्विंध्ययोः नचेहसंयोगाप्राप्तीतस्मा
न्नार्थांतरत्वमितिइतश्चपटस्तंतुभ्योन
भिद्यतेगुरुत्वांतरकार्याग्रहणात् इ

ह्यद्यस्माद्भिन्नं तस्मात्तस्य गुरुत्वांतरका
२६ 26 र्यं गृह्यते यथैकपलिकस्य स्वस्तिकस्य।
यो गुरुत्वकार्यो वनतिविशेषस्तस्मात् द्वि
पलिकस्य स्वस्तिकस्य गुरुत्वकार्यो वनति
विशेषोधिकः न च तथा तंतुगुरुत्वकार्यो
त्पटगुरुत्वस्य कार्यांतरं दृश्यते तस्माद
भिन्नस्तंतुभ्यः पट इति नान्येतान्यभेद
साधनानि अवीतानि तदेवमभेदे सिद्धे
तंतव एव तेन तेन संस्थानभेदेन परिण
ताः पटो न तंतुभ्योर्थांतरं पटः स्वात्म
नि क्रियाविरोधबुद्धिव्यपदेशार्थक्रिया
भेदाश्च नैकांतिकं भेदं साधयितुमर्हं
ति एकस्मिन्नपि तत्तद्विशेषाविर्भाव २६

तिरोभावाभ्यामेतेषामविरोधात् यथा
हि कूर्मस्यांगानि कूर्मशरीरे निविशमा।
नानि तिरोभवंति निश्चरंति चाविर्भवंति
नतु कूर्मतस्तदंगान्युत्पद्यंते प्रध्वंसंते
वा एवमेकस्मान्मृदः सुवर्णस्य वा घटमुकु
टादयो विशेषा निश्चरंत आविर्भवंत उ
त्पद्यंत इत्युच्यंते निविशमानास्तिरोभ
वंतो नश्यंतीत्युच्यंते नपुनरसतामुत्पा
दः सतां वा निरोधः यथाह भगवान्कृ
ष्णद्वैपायनः नासतो विद्यते भावो नाभा
वो विद्यते सत इति यथा कूर्मः स्वाव
यवेभ्यः संकोचविकाशिभ्यो नभिन्नः
एवं घटमुकुटादयोपि मृत्सुवर्णादि।

भ्योनभिन्नाः एवंचेह तंतुषु पट इति व्य
२७ 27 पदेशोपि यथेह वने तिलका इति कृतुप
यत्नः नचार्थक्रियाभेदोपि भेदमावा
दयति एकस्यापि नानार्थक्रियादर्शना
त् यथैक एव वह्निर्दाहकः प्रकाशकः
पाचकश्चेति नाप्यर्थक्रियाव्यवस्याव
स्तुभेदव्यवस्याहेतुः तेषामेव च सम
स्तव्यस्तानामर्थक्रियाव्यवस्यादर्शनात्
यथा प्रत्येकं विष्टयो वर्त्मदर्शनलक्ष
णामर्थक्रियां कुर्वंति न तु शिविकावहनं
मिलितास्तु शिविकां वहंति एवं तंतवः
प्रत्येकं प्रावरणमकुर्वाणा अपि मिलि
ता आविर्भूतपटभावाः प्रावरिष्यन्ति २७

स्यादेतत् आविर्भावः पटस्य कारणव्या
पारात्प्राक् सन्नसन्वा असंश्चेत्सम्पंतत्वसै
तउत्पादनं अथचेत्सन्कृतं तर्हि कारणव्या
पारेण नहि सति कार्ये कारणव्यापार प्रयो
जनं पश्यामः आविर्भावे चाविर्भावांतर
कल्पनेऽनवस्थाप्रसंगः तस्मादाविर्भूत
पटभावास्तंतवः क्रियंत इति रिक्तं वचः
अथासदुत्पद्यत इत्यत्रापि मते केयम
सदुत्पत्तिः सती असती वा सती चेत्कृ
तं तर्हि कारणैः असती चेत्तस्या अप्युत्प
संतरमित्यनवस्थ अथोत्पत्तिः पटा
न्नार्थांतरमपि तु पट एवासौ तथापि या
वदुक्तं भवति पटः इति तावदुक्तं भवत्यु

त्पद्यतइति ततश्चपटइत्युक्ते उत्पद्यत
२८ 28 इतिनवाच्यंपौनरुक्त्यात् विनश्यतीत्य
पिनवाच्यं उत्पत्तिविनाशयोर्युगपदेक
त्रविरोधात् तस्मादियंपटोत्पत्तिःस्वका
रणसमवायोवास्वसत्तासमवायोवाउभ
यथापिनोत्पद्यते अथचतदर्थानिका
रणानिव्यापार्यंते एवंसतएवपटादे
राविर्भावायकारणापेक्षेत्युपपन्नं नच
पटरूपेणकारणानांसंबंधस्तद्रूपस्या
क्रियात्वात्क्रियासंबंधित्वाच्चकारणा
नां अन्यथाकारकत्वाभावात्तस्मात्स
त्कार्यमितिपुष्कलं तदेवंप्रधानसाध
नानुगुणंसत्कार्यमुपपाद्ययादृशंय २८

स्य धानं साधनीयं तादृशमादर्शयितुंवि
वेकज्ञानोपयोगिनीव्यक्ताव्यक्तसारूप्यवै
रूप्येतावदाह हेतुमदनित्यमव्यापिसक्रि
यमनेकमाश्रितंलिंगं सावयवंपरतंत्रं
व्यक्तंविपरीतमव्यक्तम् १०
व्यक्तंहेतुमत् हेतुःकारणंतद्वत् यस्य
वयोहेतुस्तस्यतमुपरिष्टाद्वक्ष्यति अ
नित्यंविनाशितिरोभावीतियावत् अ
व्यापिसर्वंपरिणामिनंनव्याप्नोति कार
णेनहिकार्यमाविष्टंतनकार्येणाकार
णं नचबुद्ध्यादयःप्रधानंवेपिष्यतीस
व्यापकाः सक्रियंपरिस्पंदवत् तथा।
हिबुद्ध्यादयनुपात्तमुपात्तंदेहंत्यजंति

देहांतरंचरंचोपाददतइतितेषांपरिस्पंदः
शरीरपृथिव्यादीनांचपरिस्पंदः प्रसिद्ध
एवअनेकंप्रतिपुरुषंबुद्ध्यादीनांभेदात्
पृथिव्याद्यपिशरीरघटभेदेनानेकमे
व आश्रितंस्वकारणमाश्रितंबुद्ध्यादि
कार्यं अभेदेपिहिकथंचिद्भेदविवक्ष
याश्रयाश्रयिभावोयथेहवनेतिलकाः
युक्तं लिंगं प्रधानस्य यथावैतेबुद्ध्या
दयः प्रधानस्यलिंगंतथोपरिष्टाद्वक्ष्य
ति प्रधानंतुनप्रधानस्यलिंगंपुरुषस्य
लिंगंभवयीतिभावः अवयवानामव
यवोमिश्रणसंयोगइतियावत् अप्रा
प्तिपूर्विकाप्राप्तिःसंयोगस्तेनसहवर्त्तेत

इति सावयवं तथाहि पृथिव्यादयः प
रस्परं संयुज्यंते एवमन्येपि न तु प्रधान
स्य बुद्ध्यादिभिः संयोगस्तादात्म्यात् ना
पि सत्व रजस्तमसां परस्परं संयोगः अप्राप्ते
रभावात् परतंत्रं बुद्ध्याहि स्वकार्येहंका
रे जनयितव्ये प्रकृत्यापूरो ऽपेक्षते अन्य
था क्षीणा सती नालमहंकारं जनयितुमिति
स्थितिः एवमहंकारादिभिरपि स्वकार्य
जनने इति सर्वैः स्वकार्ये प्रकृत्यापूरमपेक्ष
ते तेन प्रकृतिं परामपेक्षमाणं स्वकार्यो
पजनने परतंत्रं व्यक्तं विपरीतमव्यक्तंव्य
क्तात् अहेतुमन्नित्यं व्यापि निष्क्रियं
यद्यप्यव्यक्तस्यास्ति परिणामलक्षणाक्रि

यात्तथापिपरिस्पंदोनास्ति एकमना।
३० 30 श्रितं अलिंगमनवयवंस्वतंत्रमव्यक्तं
तदनेनप्रबंधेनव्यक्ताव्यक्तयोर्वैधर्म्यमु
क्तं संप्रतितयोः साधर्म्यंपुरुषाच्चवैध
र्म्यमाह त्रिगुणमविवेकिविषयः सामा
न्यमचेतनंप्रसवधर्मि व्यक्तंतथाप्र
धानंतद्विपरीतस्तथाचपुमान् ११
त्रिगुणंत्रयोगुणाः सुखदुःखमोहा
अस्येतित्रिगुणं तदनेनसुखादीनामा
त्मगुणत्वंपराभिमतमपाकृतं अवि
वेकियथाप्रधानंनस्वतोविविच्यते ए
वंमहदादयोपिनप्रधानाद्विविच्यंते
तदात्मकत्वात् अथवासंभूयकारि ३०

ताविवेकः नहिकिंचिदेकंपर्याप्तंस्वका
र्येअपितुसंभूय तत्रनैकस्मात्कस्यचि
त्केनचित्संभवइति येत्वाहुर्विज्ञानमेव
हर्षविषादमोहशब्दाद्याकारंनपुनरितो
न्यस्तद्धर्मैतितान्प्रत्याह विषयइति वि
षयोग्राह्योविज्ञानाद्बहिरितियावत्
अतएवसामान्यंसाधारणंघटादिवत्
अनेकपुरुषैर्गृहीतमितियावत् विज्ञा
नाकारत्वेत्वसाधारण्याद्विज्ञानानांवृत्ति
रूपाणांतेप्यसाधारण्याःस्युः विज्ञानंय
थापरेणनगृह्यते परबुद्धेरप्रत्यक्षत्वा
दित्यभिप्रायः तथाचनर्तकीभ्रूलता
गेएकस्मिन्बहूनांप्रतिसंधानंयुक्तं

अन्यथातन्नस्यादितिभावः अचेतनं
३१ 31 सर्वएवप्रधानबुध्यादयोचेतनाः न
तुवैनाशिकवच्चैतन्यंबुद्धेरित्यर्थः प्रस
वधर्मिप्रसवरूपोधर्मोयःसोस्यास्तीति
प्रसवधर्मिप्रसवधर्मेतिवक्तव्येमत्वर्थी
यःप्रसवधर्मस्यनित्ययोगमाख्यातुं स
रूपविरूपपरिणामाभ्यानकदाचिद।
पिवियुज्यतइत्यर्थःव्यक्तमुक्तमव्यक्ते
तिदिशति यथाव्यक्तंतथाप्रधानंता
भ्यांवैधर्म्यंपुरुषस्याह तद्विपरीतःपु
मान् स्यादेतत् अहेतुमत्वनित्यत्वा
दिप्रधानसाधर्म्यमस्तिपुरुषस्यएवम
नेकत्वंव्यक्तसाधर्म्यंतत्कथमुच्यतेतद्वि ३२

परीतः पुमानित्यत आह तथा च चकारो
प्यर्थः यद्यप्यहेतुमत्त्वादिसाधर्म्यं तथा
प्यत्रैगुण्यादिवैपरीत्यमस्त्यस्येत्यर्थः
त्रिगुणमित्युक्तं तत्र के ते त्रयो गुणाः
किं च तदुपलक्षणमित्यत आह प्रीत्य
प्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनिय
मार्थाः अन्योन्याभिभवाश्रयजनन
मिथुनवृत्तयश्च गुणाः १२ गुणाः
इति परार्थाः सत्त्वं लघुप्रकाशकमि
त्यत्र च सत्त्वादयः क्रमेण निर्देक्ष्यंते
तदनागतावेक्षणेन तंत्रयुक्त्या वा त्यादी
नां यथासंख्यं वेदितव्यं। तदुक्तं भवति
प्रीतिः सुखं प्रीत्यात्मकः सत्त्वगुणः अ

प्रीतिर्दुःखं अप्रीत्यात्मको रजोगुणः वि
३२ 32 षादो मोहः विषादात्मकस्तमोगुण इति
ये तु मन्यन्ते प्रीतिर्दुःखाभावान्नातिरि
च्यते एवं दुःखमपि न प्रीत्यभावादन्यदि
ति तान्प्रत्यात्मग्रहणं नेतरेतराभावाः
सुखादयोपि तु भावाः आत्मशब्दस्य भा
ववचनत्वात् प्रीतिरात्मा भावो यस्य स
प्रीत्यात्मा एवमन्यदपि व्याख्येयं भा
वरूपता चैषामनुभवसिद्धा परस्परा
भावात्मकत्वे तु परस्पराश्रयापत्तेरेक
स्याप्यसिद्धेरुभयासिद्धिरिति भावः स्व
रूपमेषामुक्त्वा प्रयोजनमाह प्रका
शप्रवृत्तिनियमार्थाः अत्रापि यथा ३२

संख्यमेव रजः प्रवर्त्तकत्वात्सर्वत्र लघु

सुसत्वं प्रवर्त्तयेत् यदि तमसा गुरुणान

नियम्येत तमो नियतं तु क्वचिदेव प्रवर्त्तय

तीति भवति तमो नियमार्थं प्रयोजनमु

क्त्वा क्रियामाह अन्योन्याभिभवाश्रय

जननमिथुनवृत्तयश्च वृत्तिः क्रिया सा च

प्रत्येकमभिसंबध्यते अन्योन्याभिभववृ

त्तयः एषामन्यतमेनार्थवशादुद्भूतेना

न्यतममभिभूयते तथा हि सत्वं रजस्त

मसी अभिभूय शांतात्मनो वृत्तिं प्रतिल

भते एवं रजः सत्वतमसी अभिभूय घो

रां एवं तमः सत्वरजसी अभिभूय मूढ

मिति अन्योन्याश्रयवृत्तयः यद्यप्या

धाराधेयभावेननायमर्थोघटते तथा
३३ 33 पियदपेक्षयायस्यक्रियासतस्याश्रयः
तथाहि सत्वंप्रवृत्तिनियमावाश्रित्यरज
स्तमसोःप्रकाशेनोपकरोति रजःप्रका
शनियमावाश्रित्यप्रवृत्त्येतरयोः तमःप्रका
शप्रवृत्ती आश्रित्यनियमेनेतरयोरिति
अन्योन्यजननप्रवृत्तयः अन्यतमोन्य
तमंजनयतिजननंचपरिणामः सचगु
णानांसदृशरूपः अतएवनहेतुमत्वं
तत्वांतरस्यहेतोरभावात् नाप्यनित्यत्वं
तत्वांतरेलयाभावात् अन्योन्यमिथु
नवृत्तयः अन्योन्यसहचराः अविनि
र्भागवृत्तयइतियावत् चःसमुच्चये ३३

भवतिचात्रागमः अन्योन्यमिथुनाःसर्वे
सर्वेसर्वत्रगामिनः रजसोमिथुनंसत्वं
सत्वस्यमिथुनंरजः १ तमसश्चा
पिमिथुनेतेसत्वरजसीउभे उभयोः सं
त्वरजसोर्मिथुनंतमउच्यते २
नैषामादिःसंप्रयोगोवियोगश्चोपल
भ्यतइति प्रकाशप्रवृत्तिनियमार्थाइ
त्युक्तंतत्रकेतेइत्यंभ्रताःकुतश्चेसतआ
ह सत्वंलघुप्रकाशकमिष्टमुपष्टंभ
कंचलंचरजःगुरुवरणकमेवतमःप्र
दीपवच्चार्थतोवृत्तिः १३ स
त्वमेवलघुप्रकाशकमिष्टंसांख्याचार्यैः
तत्रकार्योद्गमनेहेतुर्धर्मोलाघवंगोस

प्रतिद्वंद्विपतोम्नेरूर्द्ध्वज्वलनंभवतितदे
३४ वलाघवंकस्यचित्तिार्य्यंगमनहेतुर्यथा
34
वायोः एवंकरणानांवृत्तिपटुत्वेहेतुर्ला
घवंगुरुत्वेहिमंदानिस्युरितिसत्वस्यप्र
काशकत्वमुक्तं सत्वतमसीस्वयमक्रिय
तयास्वकार्यवृत्तिंप्रत्यवसीदंतीरजसो
पष्टभ्येते अवसादात्प्रच्याव्यस्वकार्ये
उत्साहंप्रयत्नंकार्येते तदिदमुक्तमुपष्टं
भकंरजइति कस्मादित्यतउक्तंचलमि
ति तदनेनरजसःप्रवृत्त्यर्थत्वंदर्शितं
रजस्तुचलतयापरितस्त्रैगुण्यंचाल
येत् गुरुणाआवृण्वताचतमसातत्र
तत्रप्रवृत्तिप्रतिबंधकेनक्कचिदेवप्रव ३४

र्स्येतइति ततस्ततोव्याहृत्स्यातमोनिया
मकमुक्तंगुरुवरणकमेवतमइति एव
कारः प्रत्येकंभिन्नक्रमः संबध्यते सत्व
मेवरजएवतमएवेति ननुचपरस्परवि
रोधशीलागुणाः सुंदोपसुंदवत्परस्परंध्वं
संतइत्येवयुक्तंप्रागेवतेषामेकक्रियाक
र्तृतेत्यतआह प्रदीपवच्चार्थतोवृत्तिः
दृष्टमेतद्यथावर्तितैलेअनलविरोधि।
नीअथचमिलितेसहानलेनरूपप्रका।।
शलक्षणंकार्यंकुरुतः यथाचवातपित्त
श्लेष्माणः परस्परविरोधिनः शरीरधा
रणलक्षणकार्यकारिणः एवंसत्वरजस्त
मांसिमिथोविरुद्धान्यप्यनुवर्त्स्यंतिचस्व

कार्यंकरिष्यंतिच अर्थ्यत इतिपुरुषार्थ
३५। 35 तइतियावत् यथावक्ष्यति पुरुषा।
र्थएवहेतुर्नकेनचित्कार्यतेकरणमि
ति अत्रचसुखदुःखमोहाः परस्परवि
रोधिनः स्वस्वानुरूपाणि सुखदुःखमो
हात्मकान्येवनिमित्तानिकल्पयंतिते।
षांचपरस्परमभिभाव्याभिभावकभा
वान्नानात्वं तद्यथाएकैवस्त्रीरूपयौ
वनकुलशीलसंपन्नास्वामिनंप्रतिसु
खाकरोतितत्कस्यहेतोःस्वामिनंप्रति
तस्याःसुखरूपसमुद्भवात् सैवस्त्री
पत्नीर्दुःखाकरोतितत्कस्यहेतोः ताः
प्रतितस्याद्दुःखरूपसमुद्भवात् एवं ३५

पुरुषांतरंतामविंदत्सैवमोहयतितत्कस्य
हेतोः तस्यान्तित्तस्यामोहरूपसमुद्भवात्
अनयाचस्त्रियासर्वेभावाव्याख्या
ताः तत्रयत्सुखहेतुस्तत्सुखात्मकंसत्वं
यद्दुःखहेतुस्तद्दुःखात्मकंरजः यन्मो
हहेतुस्तन्मोहात्मकंतमः सुखप्रकाश
लाघवानांलेकस्मिन् युगपदुद्भूतावि
रोधः सहदर्शनात् तस्मात्सुखदुःख
मोहैरविविरोधिभिरविरोधिभिरेकैक
गुणवृत्तिभिः सुखप्रकाशलाघवैर्निमि
त्तभेदाउन्नीयते एवंदुःखोपष्टंभक।
त्वप्रवर्त्तकत्वैरेवंमोहगुरुत्ववरणत्वैरि।
तिसिद्धंत्रैगुण्यमिति स्यादेतदनुभूय

माने पृथिव्यादिष्वनुभवसिद्धमविवि
३६ 36 वेकित्वादि ये पुनः सत्वादयो नानुभव
पथमधिरोहन्ति तेषां कुतस्त्यमविवेकि
त्वं विषयत्वं सामान्यत्वमचेतनत्वं प्रसव
धर्मित्वं चेत्यत आह अविवेक्यादेः सिद्धि
स्त्रैगुण्यात्तद्विपर्ययाभावात् कारणगु
णात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धं
१४ अविवेक्यादेः सिद्धिः
अविवेकित्वमविवेकि यथा द्व्येकयोर्द्वि
वचनैकवचने इत्यत्र द्वित्वैकत्वयोरिति
अन्यथा द्व्येकेष्विति स्यादिति कुतः पु
नरविवेकित्वादेः सिद्धिरित्यत आह त्रै
गुण्यात् यद्यत्सुखदुःखमोहात्मकं त ३६

दविवेक्यादियोगि यथेदमनुभूयमानं
व्यक्तमितिस्फुटत्वादन्वयोनोक्तः व्यति
रेकमाह तद्विपर्ययेभावात् अविवेक्या
दिविपर्ययेपुरुषेत्रैगुण्याभावात् अथवा
व्यक्ताव्यक्तेपक्षीकृत्यान्वयाभावेनावीत
एवहेतुस्त्रैगुण्यादितिवक्तव्यः स्यादेत
त् अव्यक्तसिद्धौसत्यांतस्याविवेकि
त्वादयोधर्माःसिद्ध्यंति अव्यक्तमेवत्वद्या
पिनसिद्ध्यतितत्कथमविवेकित्वादिसिद्धि
रित्यतआह कारणगुणात्मकत्वात्का
र्यस्याव्यक्तमपिसिद्धं अयमभिसंधिः
कार्यंहिकारणगुणात्मकंदृष्टंयथातं
त्वादिगुणात्मकंपटादि तथामहदादि

लक्षणेनापिकार्येणसुखदुःखमोहरूपे
३७ 37 णस्वकारणगतसुखदुःखमोहात्मनाभ
वितव्यं तथाचतत्कारणंसुखदुःखमो
हात्मकंप्रधानमव्यक्तंसिद्धंभवतीति
स्यादेतत् व्यक्ताद्व्यक्तमुत्पद्यतइतिक
णभक्षाक्षचरणतनयाः परमाणवोहि
व्यक्तास्तेद्व्यणुकादिक्रमेणपृथिव्यादि
लक्षणंकार्यंव्यक्तमारभ्यते पृथिव्या
दिषुचकारणगुणक्रमेणरूपाद्युत्प
त्तिः तस्माद्व्यक्ताद्व्यक्तस्यतद्गुणस्या
चोत्पत्तेः कृतमदृष्टचरेणाऽव्यक्तेने
त्यतआह भेदानांपरिमाणात्समन्व
याच्छक्तितःप्रवृत्तेश्च कारणकार्य ३७

भेदानां विशेषाणां महदादीनां
भूम्यंतानां कार्याणां कारणं मूलकारण
मस्त्यव्यक्तं कुतः कारणकार्यविभागाद
विभागाद्वैश्वरूप्यस्य कारणे सत्का
र्यमिति स्थितं तथा च यथा कूर्मशरीरे
संत्येवांगानि निःसरंति विभज्यंते इदं कू
र्मशरीरमेतान्यस्यांगानीति एवं निवि
शमानानि तस्मिन्नव्यक्तीभवंति एवं
कारणान्मृत्पिंडाद्धेमपिंडाद्वा कार्याणि
घटकुंडलमुकुटादीनि संत्येवाविर्भवंति
विभज्यंते तथा संत्येव च पृथिव्यादीनि का
रणात्तन्मात्रादाविर्भवंति विभज्यंते

संस्येवतन्मात्राण्यहंकारात्कारणात् सं
३८ स्येवाहंकारः कारणान्महतः सन्नेवच
महान् परमाव्यक्तादिति सोयं कारणा
त्परमाव्यक्तात्साक्षात्पारंपर्येणान्वित
स्यविश्वस्यकार्यकलापस्याविभागः प्रति
सर्गेतु मृत्पिंडं हेमपिंडंवा घटकुंडलमुकु
टादयोनिविशंतोऽव्यक्तीभवंति तत्का
रणरूपमेवानभिव्यक्तं कार्यमपेक्ष्याव्य
क्तंभवति एवं पृथिव्यादयस्तन्मात्रा
णिविशंतः स्वापेक्षयातन्मात्राण्यव्यक्त
यंति एवंतन्मात्राण्यहंकारं विशंतिअ
हंकारमव्यक्तयंति एवमहंकारोमहां
तमाविशन्महांतमव्यक्तयति महान् ३८

प्रकृतिं सकारणं विशन्प्रकृतिमव्यक्त
यति प्रकृतेस्तु न कश्चिल्लिवेश इति
सा सर्वकार्याणामव्यक्तमेव सोयमविभा
गः प्रकृतौ वैश्वरूप्यस्य नानारूपस्य का
र्यस्य स्वार्थिकः ष्यञ् तस्मात्कारणे कार्य
स्य सतरावविभागाविभागाभ्यामव्यक्तं का
रणमस्तीति इतश्चाव्यक्तमस्तीत्याह
शक्तितः प्रवृत्तेश्च कारणशक्तितः कार्यं
प्रवर्ततेइति सिद्धं अशक्तात्कारणात्का
र्यानुत्पत्तेः शक्तिश्च कारणगतानका
र्यस्याव्यक्तत्वादन्या न हि सत्कार्यपक्षेका
र्यस्याव्यक्ततायाअन्यस्याः शक्तावस्ति
प्रमाणं अयमेव वह्निः सिकताभ्यस्तिला

३९ 39 नांतैलोयादानाँनांभेदोयदेतेषेवतैलम
स्त्यनागतावस्थंनसिकाभ्यास्तिति स्यादे
तत् शक्तितः प्रवृत्तिः प्रवृत्तिः कारण
कार्यविभागाविभागौचमहत एव पर
माव्यक्तत्वंसाधयिष्यत इतिकृतंततः प
रेणाव्यक्तेनेत्यत आह परिमाणात्
परिमितत्वादव्यापित्वादितियावत् विवा
दाध्यासितामहदादिभेदा अव्यक्तकार
णवंतः परिमितत्वात् घटादिवत् घटा
दयोपिपरिमितामृदाद्यव्यक्तकारणका
दृष्टाः उक्तमेतद्यथाकार्यस्याव्यक्तावस्था
कारणमेवेतियन्महतः कारणंतत्परमा
व्यक्तं ततःपरतराव्यक्तकल्पनायांप ३९

माणाभावात् इतश्चाविवादाध्यासिताभे
दा अव्यक्तकारणवंतः समन्वयात् भिन्ना
नां सरूपता समन्वयः सुखदुःखमोहस
मन्विता हि बुद्ध्यादयोध्यवसायादिलक्षणा
ः प्रतीयंते यानि च यद्रूपसमनुगतानि तानि
च तत्स्वभावाव्यक्तकारणानि यथा मृद्धेमपिं
डसमनुगताः कुंडलमुकुटादयो मृद्धेमपिं
डाव्यक्तकारणका दृष्टाः इति कारणमस्त्य
व्यक्तं भेदानामिति सिद्धं अव्यक्तं साधयि
त्वास्य प्रवृत्तिप्रकारमाह कारणमस्त्यव्य
क्तं प्रवर्तते त्रिगुणतः समुदयाच्च परिण
मतः सलिलवत्प्रतिप्रतिगुणाश्रयविशेषात्
१६ प्रतिसर्गावस्थायां सत्वर

उत्तमश्चसदृशापरिणामानिभवंति प
५० 50 रिणामस्वभावकाहिगुणाः नाप्यपरि
णम्यक्षणमप्यवतिष्ठंते तस्मात्सत्वंस
त्वरूपतयारजोरजोरूपतयातमस्तमो
रूपतयाप्रतिसर्गावस्थायामपिप्रवर्त्त
तेतदिदमुक्तंत्रिगुणतः प्रवृत्तेरन्तरमाह
समुदयाच्च समेत्योदयः समुदयः सम
वायःसचगुणानांनगुणप्रधानभावम
तरेणसंभवति नचगुणप्रधानभावो
वैषम्यंविनानचवैषम्यमुपमर्द्योपमर्द
कभावादृतइतिमहदादिभावेनप्रवृत्तिर्द्वि
तीया स्यादेतत् कथमेकरूपाणांगु
णानामनेकरूपाप्रवृत्तिरित्यतआह ५०

परिणामतः सलिलवत् यथाहिवारिद
विमुक्तमुदकमेकरसमपितन्नानाविकारना
लिकेरताल ताली बिल्वत्विर विल्व तिंदुका
मलक प्राचीनामलककिंपाककपित्थफ
लरसतया परिणमन्मधुराम्ल लवण तिक्त
कषायकटुकतया विकल्प्यते प्रतिप्रति
गुणाश्रयविशेषादिति एकैकगुणाश्र
येणयो विशेषस्तस्मादित्यर्थः येतु नै
ष्टिका अव्यक्तं वा महांतं वाऽहंकारं वाइं
द्रियाणि वाभूतानि वात्मानमभिमन्यमा
नास्तान्येवोपासते तान् प्रत्याह संघा
तपरार्थत्वात्त्रिगुणादिविपर्ययादधि
ष्ठानात् पुरुषोस्तिभोक्तृभावाद्वात्कैव

ल्यार्थं प्रवृत्तेश्च १७ पुरुषोऽस्त्यव्य
४१ ५१ क्तादेर्व्यतिरिक्तः कुतः संघातपरार्थत्वा
त् अव्यक्तमहदहंकारादयः परार्थाः
संघातत्वाच्छयनासनाभ्यंगादिवत् सुख
दुःखमोहात्मकतयाऽव्यक्तादयः सर्वे सं
घाताः स्यादेतत् शयनासनादयः
संघाताः संहतशरीराद्यर्था दृष्टा न त्वात्मा
न भवंति परार्थाः तस्मात्संघातांतरमेव ग
मयेयुर्न त्वसंहतमात्मानमित्यत आह
त्रिगुणादिविपर्ययात् अयमभिप्रा।
यः संघातांतरार्थत्वे हि तस्यापि संघात
त्वात्तेनापि त्रिगुणादिसंघातांतरार्थेन
भवितव्यं एवं सनवस्था स्यात् नचव्य ४१

वस्थायांसत्यामव्यवस्थायुक्ता कल्पना
गौरवप्रसंगात् नचयामस्माभिः तस्माद
नवस्थाभिया ऽस्याऽसंघातत्वमिछतात्रिगु
णत्वंविवेकित्वमवित्वमविषयत्वमसामा
न्यत्वंचेतनत्वमप्रसवधर्मित्वंचाभ्युपेत
व्यं त्रिगुणत्वादयोहि धर्माःसंहतत्वेन
व्याप्ताः तत्संहतत्वमस्मिन्परे व्यावर्त्तमा
नंत्रैगुण्यादिव्यावर्त्तयति ब्राह्मणत्वमिव
व्यावर्त्तमानंकठत्वादिव्यावर्त्तयति तस्मा
दाचार्येणत्रिगुणादिविपर्ययादितिव
दताऽसंहतःपरोविवक्षितःसचात्मेतिसि
द्धं इतश्चपुरुषोस्ति अधिष्ठानात्
त्रिगुणात्मकानामधिष्ठीयमानत्वात्

यद्यत्सुखदुःखमोहात्मकं तत्संवेद्यपरे
४२ ५२ णाधिष्ठीयमानंदृष्टं यथारथादियं
त्रादिभिः सुखदुःखमोहात्मकंचेदं
बुद्ध्यादितस्मादेतदपियपरेणाधिष्ठात
व्यं सचपरस्त्रैगुण्यादन्य आत्मेति
इतश्चास्तिपुरुषोभोक्तृभावात् भोक्तृ
भावेनभोग्येसुखदुःखेउपलक्षयति
भोग्येहिसुखेअनुकूलप्रतिकूलवे
दनीयेप्रत्यात्ममनुभूयेते तेनानयोर
नुकूलनीयेनप्रतिकूलनीयेनचकेनचि
दप्यन्येनभवितव्यं नचानुकूलनीयाः
प्रतिकूलनीयावाबुद्ध्यादयः तेषांसु
खार्धंत्मकत्वेनस्वात्मनि वृत्तिविरोधा ४२

त् तस्माद्योसुखाद्यात्मानुकूलनीयः प्र
तिकूलनीयोवासआत्मेति अन्येत्वाहुः
भोग्यादृश्याबुद्ध्यादयः नचद्रष्टारमंतरे
णदृश्यतायुक्तातेषांतस्मादस्तिद्रष्टादृश्य
बुद्ध्यातिरिक्तः सचात्मेति भोक्तृभावात्
दृष्टृभावात् दृश्येनद्रष्टुरनुमानादित्यर्थः
दृश्यत्वंचबुद्ध्यादीनांसुखाद्यात्मकत्वात्पृ
थिव्यादिवदनुमितं इतश्चास्तिपुरुषइत्या
ह कैवल्यार्थंप्रवृत्तेश्च शास्त्राणांचम
हर्षीणांचदिव्यलोचनानां कैवल्यंचात्यं
तिकदुःखत्रयप्रशमलक्षणं तच्चनबुद्ध्या
दीनांसंभवति तेहिदुःखाद्यात्मकाःक
थंस्वभावाद्वियोजयितुंशक्यंते तदति

रिक्तस्यत्वात्मनस्ततोवियोगः शक्यसंपा
४३ दः तस्मात्कैवल्यार्थंप्रवृत्तेरागमानांमहा
43 धिर्याचास्तिवुद्ध्याद्यतिरिक्तआत्मेतिसिद्धं
तदेवंपुरुषास्तित्वंसंपाद्यसांकिंसर्वशरी
रेष्वेकः किमनेकोवाप्रतिक्षेत्रमितिसंश
येतस्यप्रतिक्षेत्रमनेकत्वमुपपादयति
जननमरणकरणानांप्रतिनियमादयु
गपत्प्रवृत्तेश्च पुरुषवहुत्वंसिद्धंत्रैगुण्य
विपर्ययाच्चैव १८ पुरुषवहुत्वंसिद्धंक
स्मात् जननमरणकरणानांप्रतिनिय
मात् निकायविशिष्टाभिरपूर्वाभिर्देहें
द्रियमनोहंकारवुद्धिवेदनाभिःपुरुष
स्याभिसंवंधोजन्मनतुपुरुषस्यपरिणा ४३

मः तस्यापरिणामित्वात्तेषामेवचदेहादीना
मुपात्तानांपरित्यागोमरणंनत्वात्मनोविनाशः
तस्यकूटस्थस्यनित्यत्वात् करणानिबु
द्ध्यादीनित्रयोदशतेषांजननमरणकर
णानांप्रतिनियमोव्यवस्थासाखल्वियंसर्वे
शरीरेष्वेकस्मिन्पुरुषेनोपपद्यते तदाख
ल्वेकस्मिञ्जायमानेसर्वएवजायेरन्म्रिय
माणेसर्वएवम्रियेरन् अंधादावेकस्मिन्स
र्वएवांधादयःविचित्तेचैकस्मिन्सर्वएववि
चित्ताःस्युरित्यव्यवस्थास्यात् प्रतिक्षेत्रंतु
पुरुषभेदेभवतिव्यवस्था नचैकस्यापिपु
रुषस्यदेहोपधानभेदाद्व्यवस्थेतियुक्तं
पाणिस्तनाद्युपाधिभेदेनापिजन्ममरणा

दिव्यवस्थाप्रसंगात् नहिपाणौह्रक्के जाते
४४ 55 बालत्वादौमहत्स्ववयवेयुवतिजीतावाम्रता
वाभवतीति इतश्चप्रतिक्षेत्रंपुरुषभेदइत्या
ह अयुगपत्प्रवृत्तेश्च प्रवृत्तिश्चप्रयत्नल
क्षणायद्यप्यंतःकरणवर्त्तिनीतथापि
पुरुषउपचर्यते तथाचतस्मिन्नेकत्रश
रीरेप्रयतमानेसएवसर्वशरीरेष्वेक इति
सर्वःप्रयतेत ततश्चसर्वाण्येवशरीरा
णियुगपच्चलेयुः नानात्वेत्वयंनदोषइति
इतश्चपुरुषभेदइत्याह त्रैगुण्यविप
र्ययाच्चैव एवकारोभिन्नक्रमःसिद्धमि
त्यस्यानंतरंद्रष्टव्यः सिद्धमेवनासिद्धं
त्रयोगुणास्त्रैगुण्यंतस्यविपर्ययोऽन्य ४४

थात्वं केचित्खलुसत्त्वनिकायाः सत्त्ववहुलाः
यथोर्द्ध्वस्रोतसः केचिद्रजोवहुलायथाम
नुष्याः केचित्तमोवहुलायथातिर्य्यग्योनयः
सोयमीदृशस्त्रैगुण्यविपर्य्ययोऽन्यथाभाव
स्तेषुतेषुसत्त्वनिकायेषुनभवेद्यद्येकः पुरुषः
स्यात् भेदेत्वयमदोषइति एवंपुरुषवहुत्वं
प्रसाध्यविवेकज्ञानोपयोगितयातस्यधर्मा
नाह तस्माच्चविपर्य्यासात्सिद्धंसाक्षित्वमस्य
पुरुषस्यकैवल्यंमाध्यस्थ्यंद्रष्टृत्वमकर्त्तृ
भावश्च १९ तस्माच्चेतिचः पु
रुषवहुत्वेनसहधर्म्मांतराणिसमुच्चिनोति
अस्मात् विपर्य्यासादित्युक्तेत्रैगुण्यवि
पर्य्यासादित्यनंतरोक्तंसंवध्येत अत

त्सन्निरासायतस्मादित्युक्तं अनंतरोक्तं।
४५ 45 हिसन्निधानादिदमोविषयोविप्रकृष्टंचतत्
दइति विप्रकृष्टंत्रिगुणमविवेकिइत्या
दिसंबध्यते तस्मात्त्रिगुणत्वादेर्योविप
र्योसःपुरुषस्यअत्रिगुणत्वंविवेकित्वम
विषयत्वमसाधारणत्वंचेतनत्वमप्रसवध
र्मित्वंच तत्रचेतनत्वाविषयत्वेनचसाक्षि
त्वंद्रष्टृत्वेदर्शितेचेतनोहिद्रष्टाभवतिनाचे
तनःसाक्षीचदर्शितविषयोभवति यस्मै
प्रदर्श्यतेविषयःससाक्षी यथालोकेर्थि
प्रत्यर्थिनौविवादविषयंसाक्षिणेदर्शय
तः एवंप्रकृतिरपिस्वचरितंविषयंपुरु
षायदर्शयतीति पुरुषःसाक्षी नचाचे

ततो विषयो वा शक्यो विषयं दर्शयितुमिति
चैतन्यादविषयाच्च भवति साक्षी अत एव द्रष्टा
पि भवति अत्रैगुण्याच्चास्य कैवल्यं आत्यं
तिक दुःखत्रयाभावः कैवल्यं तच्च तस्य स्वा
भाविकादेवात्रैगुण्यात्सुख दुःख मोहर रहि
तत्वात्सिद्धं अत एवात्रैगुण्यान्माध्यस्थ्यं सु
खी हि सुखेन तृप्यन् दुःखी च दुःखं द्विषन्न
मध्यस्थो भवति तदुभयरहितस्तु मध्य
स्थ इत्युदासीन इति च व्याख्यायेते विवेकि
त्वाच्चासाधारणादप्रसवधर्मित्वाच्चाकर्तृत्वं सि
द्धं स्यादेतत् प्रमाणेन कर्तव्यमर्थमवग
म्य चेतनोहं चिकीर्षन्करोमीति कृतिचैत
न्ययोः सामानाधिकरण्यमनुभवसिद्धं तद

स्मिन्सतेनावकल्प्यते चेतनस्याकर्तृत्वात्
४६ ५८ कर्तुश्चाचैतन्यादित्यत आह तस्मात्तत्सं
योगादचेतनं चेतनावदिव लिंगं गुण
कर्तृत्वेच तथाकर्त्तेव भवत्युदासीनः
२० यतश्चैतन्यकर्तृत्वेभिन्नाधिक
रणेयुक्तितः सिद्धे तस्माद्भ्रांतिरियमित्यर्थः
लिंगं महदादिसूक्ष्मपर्यंतं वक्ष्यति भ्रां
तिबीजं तत्संयोगस्तत्सन्निधानं अति
रोहितार्थमन्यत्रं संयोगादित्युक्तं नचभि
न्नयोः संयोगोपेक्षां विना नचेयमुप
कार्योपकारकभावं विनेत्यपेक्षाहेतु
मुपकारमाह पुरुषस्य दर्शनार्थं कै
ल्यार्थं तथाप्रधानस्य पंग्वंधवदुभयो ४६

रपिसंयोगस्तत्कृतः सर्गः २१ प्रधानस्ये
तिकर्मणिषष्ठी प्रधानस्यसर्वकारण।
स्ययद्दर्शनंपुरुषेणतदर्थं तदनेनभोग्या
ताप्रधानस्यदर्शिता ततश्चभोग्यंप्रधा
नंभोक्तारमंतरेणनभवतीतियुक्ताभो
क्त्रपेक्षा पुरुषस्यापेक्षांदर्शयति पु
रुषस्यचकैवल्यार्थंतयाभोग्येनहिप्र।
धानेनसंभिन्नःपुरुषःतत्कृतंदुःखत्रयंस्वा
त्मन्यभिमन्यमानःकैवल्यंप्रार्थयते त
च्चसत्वपुरुषान्यताख्यातिनिबंधनं न
चसत्वपुरुषान्यताख्यातिःप्रधानमंत
रेणेतिकैवल्यार्थंपुरुषःप्रधानमपेक्ष
ते अनादित्वाच्चसंयोगपरंपराया भो

गायसंयुक्तोपिकैवल्यायपुनःसंयुज्यत
तइतियुक्तं ननुभवत्वनयोःसंयोगोमह
दादिसर्गस्तुकुतस्त्यइत्यतआह तत्कृ
तःसर्गइति संयोगोहिनमहदादिसर्ग
मंतरेणभोगायकैवल्यायचपर्याप्तइति
संयोगएवभोगापवर्गार्थंसर्गंकरोतीत्य
र्थः सर्गक्रममाह प्रकृतेर्महांस्ततो
हंकारस्तस्माद्गणश्चषोडशकः तस्मा
दपिषोडशकात्पंचभ्यःपंचभूतानि
२२ प्रकृतिरव्यक्तं महदहं
कारौवक्ष्यमाणलक्षणौ एकादशेंद्रि
याणिवक्ष्यमाणानिपंचतन्मात्राणिच
सोयंषोडशसंख्यापरिमितोगणःषोड

शकः तस्मात् पि षोडशकात् पञ्चभ्यः
पंचतन्मात्रेभ्यः पंचभूतान्याकाशादीनि
तत्र शब्दतन्मात्रादाकाशं शब्दगुणं शब्द
तन्मात्रसहितात्स्पर्शतन्मात्राद्वायुः श
ब्दस्पर्शगुणः शब्दस्पर्शसहिताद्रूपतन्मा
त्रात्तेजः शब्दस्पर्शरूपगुणं शब्दस्पर्श
रूपतन्मात्रसहिताद्रसतन्मात्रादापः श
ब्दस्पर्शरूपरसगुणाः शब्दस्पर्शरूपरस
तन्मात्रसहिताद्गंधतन्मात्राच्छब्दस्पर्शरू
परसगंधगुणा पृथिवी जायत इत्यर्थः
अव्यक्तं सामान्यतो लक्षितं तद्विपरीत
मव्यक्तमित्यनेन विशेषतश्च सत्वं लघु
प्रकाशकमित्यादिनाव्यक्तमपि सामा

न्यतो लक्षितैर्हेतुमदित्यादिना संप्रति
४८ 48 विवेकज्ञानोपयोगितयाव्यक्तविशेषं
बुद्धिं लक्षयति अध्यवसायो बुद्धिर्धर्मो
ज्ञानं विरागऐश्वर्यं सात्विकमेतद्रूपं
तामसमस्माद्विपर्यस्तम् २३ अध्य
वसायो बुद्धिः क्रियाक्रियावर्त्तोरभेदवि
वक्षया सर्वो व्यवहर्त्ता आलोच्य मत्वा
मत्राधिकृत इति अधिमस्य कर्त्तव्यमेत
न्मयेति अध्यवसति ततश्च प्रवर्त्तत इ
ति लोकसिद्धं तत्रयोऽयं कर्त्तव्यमिति निश्च
यश्चितिसन्निधानाद्यापन्नचैतन्याया
बुद्धेः सोध्यवसायो बुद्धेरसाधारणो व्या
पारस्तदभेदाबुद्धिः सच बुद्धेर्लक्षणं स ४८

मानासमानजातीयव्यवच्छेदकत्वात् तदेवं
बुद्धिं लक्षयित्वा विवेकज्ञानोपयोगिनस्तस्या
धर्मान्सात्विकतामसानाह धर्मो ज्ञानं विरा
ग ऐश्वर्यं सात्विकमेतद्रूपं तामसमस्माद्वि
पर्यस्तं धर्मोभ्युदयनिश्रेयसहेतुः तत्र याग
दानाद्यनुष्ठानजनितो धर्मोभ्युदयहेतुः अ
ष्टांगयोगानुष्ठानजनितश्च निश्रेयसहेतुः
गुणपुरुषान्यताख्यातिर्ज्ञानं विरागो वै
राग्यं रागाभावः तस्य यतमानसंज्ञाव्यति
रेकसंज्ञा एकेंद्रियसंज्ञा वशीकारसंज्ञेति
चतस्रः संज्ञाः रागादयः कषायाश्चित्तव
र्त्तिनस्तैरिंद्रियाणि यथा स्वं विषयेषु प्रवर्त्यं
ते तस्मा प्रवर्त्तिषितविषयेष्विंद्रियाणी

त्तितत्परिपाचनापारंभः प्रयत्नोयतमान
५९ 59 संज्ञा परियाचनेव्वानुष्ठीयमानेकेचि
त्कषायाः पक्काः पक्ष्यंतेचकेचित् तत्रैवं
पूर्वापरीभावेसतिपक्ष्यमाणेभ्यः कषाये
भ्यः पक्कानांव्यतिरेकेणावधारणं व्यति
रेकसंज्ञा इंद्रियप्रवृत्त्यसमर्थतयापक्का
नामौत्सुक्यमात्रेणमनसिव्यवस्थापनमे
केंद्रियसंज्ञा औत्सुक्यमात्रस्यापिनिवृ
त्तिरुपस्थितेष्वपिदृष्टानुश्रविकविषये
ष्वुपासंज्ञात्रयात्पराचीनामावशीकारसं
ज्ञा यामत्रभगवान्पतंजलिर्वर्णयांचका
र दृष्टानुश्रविकविषयवितृष्णस्यव
शीकारसंज्ञावैराग्यमिति सोयंबुद्धिध ५९

विरागाद्इति ऐश्वर्यमपिवुद्धिधर्मोयतोणि
मादिप्रादुर्भावः तत्राणिमाभवत्यणुःशि
लामपिप्रविशति लघिमालघुर्भवतिय
तःसूर्यमरीचीनालंब्यसूर्यलोकंयातिग
रिमागुरुर्भवति महिमायतोमहान्भवति
प्राप्तिरंगुल्यग्रेणस्पृशतिचंद्रमसं प्राका
म्यमिछानभिघातः यतोभूमावुन्मज्ज
तिनिमज्जतिचयथोदके वशित्वंभूतभौति
केंकशीभवत्यवश्यं ईशित्वंभूतभौति।
कानांप्रभवव्युहव्ययानामीष्टे। यत्रकामा
वसायित्वंसाससत्यसंकल्पतायथासंक।
ल्पोभवतिभूतेषुतथैवभूतानिभंविआन्ये
षांनिश्चयानिश्चतत्वमनुविधीयंते योगि

नक्तनिश्चेतव्याः पदार्थोनिश्चयमितिचत्वा
५० 50 रः सात्विकाबुद्धिधर्माः तमसास्तुतद्विप
रीताबुद्धिधर्माः अधर्मोज्ञानावैराग्यानै
श्वर्याभिधानाश्चत्वारइत्यर्थः अहंका
रस्यलक्षणमाह अभिमानोहंकारस्त
स्माद्द्विविधःप्रवर्त्ततेसर्गः एकादशक
श्चगणस्तन्मात्रपंचकश्चैव २४ अभि
मानोहंकारः यत्खल्वालोचितंमतंच त
त्राहमधिकृतः शक्तः खल्वहमत्रमदर्था
एवामीविषयामत्तोनान्योत्राधिकृतःक
श्चिदस्ति अतोहमस्मीतियोभिमानः
सोसाधारणव्यापारत्वादहंकारः तमुप
जीव्यहिबुद्धिरध्यवस्यतिकर्त्तव्यमेतन्मये ५०

तितस्यकार्यभेदमाह तस्माद्द्विविधः प्रव
र्त्ततेसर्गः प्रकारद्वयमाह एकादशक
श्चगणः इंद्रियाख्यः तन्मात्रपंचकश्चैव
द्विविधएवसर्गोहंकारान्नत्वन्यइत्येवका
रेणावधारयति स्यादेतत् अहंकारादे
करूपात्कारणात्कथंजडप्रकाशकौगणौ
भवतइत्यतआह सात्विकएकादशकः
प्रवर्त्ततेवैकृतादहंकारात् भूतादेस्तन्मा
त्रःसतामसस्तैजसादुभयम् २५ ॥
सात्विकएकादशकइति प्रकाशलाघ
वाभ्यामेकादशकइंद्रियगणः सात्वि
कोवैकृतात्सात्विकादहंकारात्प्रवर्त्तते
भूतादेस्त्वहंकारात्तामसात्तन्मात्रोगणः

प्रवर्त्तते कस्मात्यत्तः सत्तामसः एतदुक्तं
भवति यद्यप्येकोहंकारस्तथापिगुणभेदो
द्भवाभिभावाभ्यांभिन्नंकार्यंकरोतीति न
नुयदिसत्वतमोभ्यामेवसर्वंकार्यंजन्यतेत
दाकृतमकिंचित्करेणरजसेत्यतआह तै
जसादुभयंतैजसाद्राजसादुभयंगुणद्वयं
भवतियद्यपिरजसोनकार्यांतरमस्ति त
थापिसत्वतमसीस्वयमक्रियेसमर्थेअपि
नस्वकार्यंकुरुतः रजस्तुचलतयातेयातेय
दाचालयतितदास्वकार्यंकुरुतइति तदु
भयस्मिन्नपिकार्येसत्वतमसोः क्रियोत्पा
दनद्वारेणास्तिरजसः कारणत्वमितिनव्य
र्थंरजइति सात्विकमेकादशकमाख्यातं

बाह्येंद्रियदशकं तावदाह बुद्धींद्रियाणि
चक्षुः श्रोत्रघ्राणरसनत्वगाख्यानि वाक्पा
णिपादपायूपस्थानिकर्मेंद्रियाण्याहुः
२६ सात्विकाहंकारोत्पादन
मिंद्रियं तच्चद्विविधं बुद्धींद्रियंकर्मेंद्रि
यंच उभयमप्येतदिंद्रस्यात्मनश्चिह्नत्वा
दिंद्रियमुच्यते तानिचस्वसंज्ञाभिश्चक्षु
रादिभिरुक्तानि तत्ररूपग्रहणलिंगंचक्षुः
शब्दग्रहणलिंगंश्रोत्रं गंधग्रहणलिंगंघ्रा
णं रसग्रहणलिंगंरसनं स्पर्शग्रहणलिं
गंत्वक् वागादीनांकार्यंवक्ष्यति एका
दशमिंद्रियमाह उभयात्मकंत्वत्रमनः
संकल्पकमिंद्रियंचसाधर्म्यात् गुणप

रिणामविशेषान्नानात्वं बाह्यभेदाश्च

५२ 52 २७ एकादशस्विंद्रियेषु मध्ये

मनउभयात्मकं बुद्धींद्रियं कर्मेंद्रियं च चक्षु

रादीनां वागादीनां च मनोधिष्ठितानां स्वस्व

विषयेषु प्रवृत्तेः तदसाधारणेन रूपेण

लक्षयति संकल्पकमत्र मनः संकल्पे

न रूपेण मनो लक्ष्यते आलोचितमिंद्रि

येण वस्त्विदमिति संमुग्धमिदमेवं नैवमि

ति सम्यक्कल्पयति नियम्य दर्शयति विशेष

णविशेष्यभावेन विवेचयतीति यावत्

तदाहुः संमुग्धं वस्तुमात्रं तु प्राग्गृह्णा

त्यविकल्पकं तत्सामान्यविशेषाभ्यां क

ल्पयंति मनीषिणः १ तथाहि अ

स्तिह्यालोचितंज्ञानंप्रथमंनिर्विकल्पकं बा
लमूकादिविज्ञानसदृशंशुद्धवस्तुजं
२ ततःपरंपुनर्वस्तुधर्मैर्जात्यादि
भिर्यया बुद्ध्यावसीयतेसापिप्रत्यक्षत्वे
नसंमतेति सोयंसंकल्पलक्षणोव्यापा
रोमनसःसमानासमानजातीयाभ्यांव्य
वच्छिंदन्मनोलक्षयति स्यादेतत् अ
साधारणव्यापारयोगिनोयथामहदहं
कारौनेंद्रियं एवंमनोप्यसाधारणव्या
पारयोगिनेंद्रियंभवितुमर्हतीत्यत आह
इंद्रियंच कुतःसाधर्म्यात् इंद्रियां
तरैःसात्विकाहंकारोपादानत्वंचसाधर्म्यं
नत्विंद्रलिंगत्वं महदादीनामप्यात्म

लिंगत्वेनेंद्रियत्वप्रसंगात् तस्मात्तभोक्तु
५३ 53 यत्तिनिमित्तमात्रमिंद्रलिंगत्वं ननुप्रवृ
त्तिनिमित्तं अथकथंसात्विकाहंकारा
देकस्मादेकादशेंद्रियाणीत्यतआह गु
णपरिणामविशेषान्नानात्वंवाह्यभेदा
श्चशब्दाद्युपयोगसंप्रवर्तकादृष्टसहका
रिभेदात् कार्यभेदः अदृष्टभेदोपिगुणा
मविशेषान्नानात्वंवाह्यभेदाश्च शब्दाद्यु
पयोगसंप्रवर्त्तकादृष्टसहकारिभेदात्का
र्यभेदः अदृष्टभेदोपिगुणपरिणामए
ववाह्यभेदाश्चेतिदृष्टांतार्थः यथावाह्य
भेदात्तथैतदपीत्यर्थः तदेवमेकादशें
द्रियाणिस्वरूपतउक्त्वाकरणानामसाधार

णीत्युक्तीराह शब्दादिषुपंचानामालोचन
मात्रमिष्यतेवृत्तिः वचनादानविहरणो
त्सर्गानंदाश्चपंचानां २८ बुद्धी
द्रियाणांसंमुग्धवस्तुदर्शनंचालोचन
मुक्तं कर्मेंद्रियाणां कंठताल्वादिस्थानं
इंद्रियंवाक् तस्यावृत्तिर्वचनं स्पष्टमन्य
त् अंतःकरणत्रयस्यवृत्तिमाह स्वाल
क्षण्यंवृत्तिस्त्रयस्यसैषाभवत्यसामान्या
सामान्यकरणवृत्तिःप्राणाद्यावायवःपंच
२९ स्वालक्षण्यंवृत्तिस्त्रयस्य
स्वमसाधारणंलक्षणंयेषांतानिस्वलक्ष
णानिमहदहंकारमनांसितेषांभावःस्वा
लक्षण्यं तत्स्वानिलक्षणान्येव तद्य

या महतोध्यवसायोहंकारस्याभिमा
५४ 54 नःसंकल्पोमनसः वृत्तिर्व्यापारः वृत्ति
द्वैविध्यंसाधारणत्वासाधारणत्वाभ्यामा
ह सैषाभवत्यसामान्या असाधारणी
सामान्यवृत्तिःप्राणाद्यावायवःपंच सा
मान्याचासौकरणवृत्तिश्चेति त्रयाणाम
पिकरणानांपंचवायवःजीवनंवृत्तिः
द्भावेभावात्तदभावेऽभावात् तत्रप्राणो
नासाग्रहृन्नाभिपादांगुष्ठवृत्तिः अपा
नः कृकाटिकापृष्ठपार्श्वपायुपस्थवृत्तिः
समानोहृन्नाभिसर्वसंधिवृत्तिः उदानो
हृत्कंठतालुभ्रूमूर्द्धमध्यवृत्तिः व्यानस्त्व
ग्वृत्तिरितिपंचवायवः अस्यासाधार ५४

णीषुवृत्तिषुक्रमाक्रमौप्रकारावाह युग
पच्चतुष्टयस्यतुवृत्तिः क्रमशश्चतस्यनिर्दि
ष्टा दृष्टेतथाप्यदृष्टेत्रयस्यतत्पूर्विकावृत्तिः
३० दृष्टेयथासंतमसांधकारेविद्युत्संपा
तमात्राद्व्याघ्रमभिमुखमतिसन्निहितं
पश्यति तदाखल्वस्यालोचनसंकल्पा
भिमानाध्यवसायायुगपदेवप्रादुर्भवंति
यतस्ततउत्प्लुत्यतत्स्थानादेकपदेऽपस
रति क्रमशश्च यथामंदालोकेप्रथमं
तावद्वस्तुमात्रंसंमुग्धमालोचयतिअथ
प्रणिहितमनाः कर्णांताकृष्टशरः कुं
चितपाशिंजिनीमंडलीकृतकोदंडः
प्रचंडतरः पाटच्चरोयमितिनिश्चिनोति

अथचमांप्रसेतिइत्यभिमन्यते अथा
५५ ध्यवस्यत्यपसराम्यतःस्थानादिति य
55 रोक्षेतुत्रयस्यवाह्येंद्रियवर्ज्जंवृ त्तिमाह
६ अदृष्टेत्रयस्यतत्पूर्विकावृत्तिः अंतःक
रणत्रयस्ययुगपत्क्रमेणवावृत्तिर्दृष्ट
पूर्विकैव अनुमानागमस्मृतयोहिपरो
क्षेर्थेदर्शनपूर्वाःप्रवर्त्तंतेनान्यथा य
थादृष्टेतथाऽदृष्टेपीतियोजना स्यादेत
त् चतुर्णांत्रयाणांवावृत्तयोनतन्मात्रा
धीनाः तेषांसदातनत्वेनवृत्तीनांसदो
त्पत्तिप्रसंगात् आकस्मिकत्वेतुवृ
त्तिसंकरप्रसंगः नियमहेतोरभावादित्य
तआह स्वांस्वांप्रतिपद्यंतेपरस्पराकूतहे ५५

तुकांक्षति पुरुषार्थएवहेतुर्नकेनचित्का
र्यतेकरणम् ३१ करणानीति
शेषः तथाहिवहवः पुरुषाः शाक्ती
कमाष्टीकधानुष्ककार्प्पणिकाः कृतसं
केताः परावस्कंदनायप्रवृत्ताः तत्रान्य
तमस्याकूतमवगम्यान्यतमः प्रवर्त्तते प्र
वर्त्तमानश्चशाक्तीकः शक्तिमेवादत्तेन
तुयष्ट्यादिकं एवंयाष्टीकोपियष्टिमेव
नशक्त्यादिकं तथान्यतमस्यकरणस्या
कूतात्स्वकार्यकरणाभिमुख्यादन्यतमक
रणंप्रवर्त्तते तत्प्रवृत्तेश्चहेतुमत्वान्नवृ
त्तिसंकरप्रसंगइत्युक्तंस्वांस्वांप्रतिपद्यं
तइति स्यादेतत् याष्टीकादयश्चेतन

स्परस्पराकूतमवगम्यप्रवर्त्तत इतियुक्तं
५६ 56 करणानिस्यचेतनानितस्मान्नैवंप्रवर्त्तितु
मुत्सहंते तेनैषामधिष्ठात्राकरणा
नांस्वरूपसामर्थ्योपयोगाभिज्ञेनभवितव्य
मत आह पुरुषार्थएवहेतुर्नकेयनेका
नचित्करणं भोगापवर्गलक्षणपुरुषा
र्थएवानागतावस्थः प्रवर्त्तयतिकरणानि
कृतमत्रतत्स्वरूपाभिज्ञेनकर्त्रा एतच्चव
त्सविवृद्धिनिमित्तमित्यत्रोपपादयिष्य
ते नकेनचित्कार्यतेकरणमित्युक्तं त
त्रकरणंविभजते करणंत्रयोदशविधं
तदाहरणधारणप्रकाशकरं कार्यंच
तस्यदशधाहार्यंधार्यंप्रकाश्यंच ३२ ५६

करणंत्रयोदशविधंइंद्रियाण्येका
दशबुद्धिरहंकारश्चेतित्रयोदशप्रकारं
करणं कारकविशेषः करणं नचव्या
पारविशेषंविनाकारकत्वमितिव्यापारमाह
तदिति यथायथं तत्रकर्मेंद्रिया
णिवागादीन्याहरंति यथास्वमुपादद
तेस्वव्यापारेणव्याप्नुवंतीतियावत् बु
द्ध्यहंकारमनांसितुस्वस्ववृत्त्याप्राणादिलक्ष
णयाधारयंति बुद्धींद्रियाणिप्रकाशयं
ति आहरणादिक्रियाणांसकर्मकत
याकिंकर्मकत्वविधंचेत्यतआह कार्यं
चतस्येति तस्यत्रयोदशविधस्यकरण
स्यदशधाआहार्यंधार्यंप्रकाश्यंच आ

हार्यं व्याप्यं कर्मेंद्रियाणां वचनादानविहर
५७ 57 णोत्सर्गानंदाश्च यथासंख्यंव्याप्याः तेच दि
व्यादिव्यतया दशधा एवंधार्यमप्यंतः
करणत्रयस्य प्राणादिलक्षणयावृत्त्याश
रीरं तच्च पृथिव्यादिपंचानांसमूहः ते
चपंचदिव्यादिव्यतयादशेति धार्यमपि
दशधा एवंबुद्धींद्रियाणांप्रकाश्यम
पिदशधेति बुद्धींद्रियाणां शब्दस्पर्श
रूपरसगंधा दिव्यादिव्यतयादशधाय
थायथंव्याप्याः तेचदिव्यादिव्यतया
दशेतिप्रकाश्यमपिदशधा त्रयोदश
विधकरणेऽबांतरविभागंकरोति अं
तः करणंत्रिविधंदशधाबाह्यंत्रयस्य

विषयाख्यं सांप्रतकालंवाह्यंत्रिकाल
माभ्यंतरंकरणं ३३ अंतष्करणं
त्रिविधमिति वुद्धिरहंकारोमनइति श
रीराभ्यंतरत्वादंतष्करणं दशधावाह्यें
द्रियम् त्रयस्यांतष्करणस्यविषयाख्यं
विषयमाख्यातिविषयाख्यंविषयेसंकल्पा
भिमानाध्यवसायेषुकर्त्तव्येषुद्वारीभवति
तत्रवुद्धींद्रियाण्यालोचनेनकर्मेंद्रिया
णितुयथास्वंव्यापारेण वाह्याभ्यंतरयोः
करणयोर्विशेषांतरमाह सांप्रतकालं
वर्त्तमानकालंवाह्यमिंद्रियं वर्त्तमानस
मीपमनागतमतीतमपिवर्त्तमानं अ
तोवागपिवर्त्तमानकालविषयाभवति

त्रिकालमभ्यन्तरं करणम् तद्यथा न
५८ 58 दीपूरभेदादस्य वृष्टिः अस्ति धूमादग्नि
रिह नागनिकुंजे असत्युपघातके वि
रोधिकीटके च पिपीलिकाण्डसंचाराद्भ
विष्यति वृष्टिरिति तदनुरूपाश्च संकल्पा
भिमाध्यवसाया भवंति कालश्च वैशेषि
काभिमतएको नागतादिव्यवहारभेदं प्र
वर्त्तयितुमर्हति यस्मादयं यैरुपाधि
भेदैरनागतादिभेदं प्रतिपद्यते संतु तए
वोपाधयो नागतादिव्यवहारहेतवः कृ
तमंतर्गडुना कालेनेति सांख्याचार्याः त
स्मान्न कालरूपतत्वांतराभ्युपगम इति
सांप्रतकालानां वाह्येंद्रियाणां विषयं वि ५८

वेचयति बुद्धींद्रियाणितेषांपंचविशेषावि
शेषविषयाणि वाग्भवतिशब्दविषयाशे
षाणितुपंचविषयाणि ३४ बुद्धींद्रिया
णितेषांदशानामिंद्रियाणांमध्येपंचवि
शेषाविशेषविषयाणिविशेषाःस्थूलाः
शब्दादयःशांतघोरमूढाःपृथिव्यादिरू
पाः अविशेषास्तन्मात्राणिसूक्ष्माःश
ब्दादयः मात्रग्रहणेनभूतभावमपाक
रोति विशेषाश्चाविशेषाश्चविशेषावि
शेषाः तएवविषयायेषांबुद्धींद्रियाणांता
नितथोक्तानि तत्रोर्द्धस्रोतसांयोगिनां
चश्रोत्रंशब्दतन्मात्रविषयं स्थूलशब्द
विषयंच अस्मदादीनांतुस्थूलशब्द

विषयमेव एवंतेषांलकुस्थूालसूक्ष्मस्य
५९ 59 शेविषयाअस्मदादीनांतुस्थूलस्पर्शवि
षयैव एवंचसुरादयोपितेषां५अस्मदा
दीनांचरूपादिषुस्थूलसूक्ष्मेषुदष्ट्याः
एवंकर्मेंद्रियेषुमेध्येवाग्भवतिशब्दवि
षयास्थूलशब्दविषया तद्धेतुत्वात् न
तुशब्दतन्मात्रस्यहेतुः तस्याहंकारत्वेते
नवागिंद्रियेणसहैककारणत्वात् शे
षाणितुचत्वारिपाणिपादपायूपस्था।
ख्यानिपंचविषयाणिपाण्याधाहार्यो
णांघटादीनांपंचशब्दाद्यात्मकत्वादि
ति सांप्रतंत्रयोदशसुकरणेषुकेषां।
चिद्गुणभावंकेषांचित्प्रधानभावंसहेतु ५९

कमाह सांतःकरणाबुद्धिःसर्वंविषयमव
गाहतेयस्मात् तस्मात्त्रिविधंकरणंद्वारिद्वा
राणिशेषाणि । ३५ द्वारिप्रधा
नंशेषाणिकरणानिबाह्यानिद्वाराणिद्वा
राणीतंसर्वंविषयंसमनोहंकाराबुद्धिर्य
स्मादवगाहतेछवस्यतितस्माद्वाह्येंद्रिया
णिद्वारीणिद्वारवतीचसांतष्करणाबुद्धि
रिति नकेवलंवाह्यानींद्रियाण्यपेक्ष्य
प्रधानंबुद्धिः अपितुयेअप्यहंकारम
नसीद्वारिणीतेअप्यपेक्ष्यबुद्धिःप्रधा
नमित्याह एतेप्रदीपकल्पाःपरस्पर
विलक्षणागुणविशेषाः कृत्स्नंपुरुष
स्यार्थंप्रकाश्यबुद्धौप्रयच्छंति ३६

यथाहिग्रामाध्यक्षाःकुटुंबिकेभ्यःकरमा
६० दायविषयाध्यक्षायप्रयच्छंति विषया
60 ध्यक्षश्चसर्वाध्यक्षायसचभूपतये त
थाबाह्येंद्रियाण्यालोच्यमनसेसमर्पयंतिम
नश्चसंकल्प्याहंकारायअहंकारश्चाभि
मत्यबुद्धौसर्वाध्यक्षभूतायां तदिदमुक्तं
पुरुषस्यार्थंप्रकाश्यबुद्धौप्रयच्छंतीति
बाह्येंद्रियमनोहंकाराश्चगुणविशेषाः
गुणानांसत्वरजस्तमसांविकाराःतेतुपर
स्परविरोधशीलाअपिपुरुषार्थेनभोगा
पवर्गरूपेणैकवाक्यतांनीताःयथाव
र्तितैलवह्नयःसंतमसापनयेनरूपप्रका
शायमिलिताःप्रदीपः एवमेतेगुण ६०

विशेषाइतियोजना कस्मात्पुनस्तानि
बुद्धेप्रयच्छंति नतुबुद्धिरहंकारायद्वारिणे
मनसेवेत्यत आह सार्वंप्रत्युपभोगंयस्मात्पु
रुषस्यसाधयतिबुद्धिः सैवचविशिनष्टि
पुनः प्रधानपुरुषांतरंसूक्ष्मं ३७
पुरुषर्थस्यप्रयोजकत्वात्तस्यतत्साक्षात्सा
धनंतत्प्रधानं बुद्धिश्चास्यसाक्षात्साध
नंतस्मात्सैवप्रधानं यथासर्वाध्यक्षः
साक्षाद्राजार्थसाधनतयाप्रधानम् इत
रेतुग्रामाध्यक्षादयस्तंप्रतिगुणभूताः बु
द्धिर्हिपुरुषस्यसन्निधानात्तच्छायापत्त्या
तद्रूपेवसर्वविषयोपभोगंपुरुषस्यसाध
यति सुखदुःखानुभवोहिभोगः सच

बुद्धौ बुद्धिश्च पुरुषरूपैवेति पुरुषमुप

६१ भोजयति यथा अर्थालोचनसंकल्पा

61 भिमानाश्च तत्तद्रूपपरिणामेन बुद्ध्या बुप

संक्रांताः तथाइंद्रियादिव्यापारा अपि

बुद्धेरेवस्वव्यापारेणाध्यवसायेन सहैक

व्यापारीभवंति यथा स्वसैन्येन सह ग्रा

माध्यक्षादिसैन्यं सर्वाध्यक्षस्य स्वस्य भवति

सर्वशब्दादिकं प्रतिय उपभोगः पुरुषस्य

तं साधयति ननु पुरुषस्य सर्वविषयो

पभोगसंपादिका यदि बुद्धिस्तर्ह्येव निर्मो

क्षाइत्यत आह यस्मात्प्रधानपुरुषयो

रंतरं विशेषं विशिनष्टि करोति यथोद

निकः संपादनाद्योदनपाकं पचतीति ६१

करणं च प्रतिपादनं अनेनापवर्गः पुरु
षार्थो दर्शितः सूक्ष्ममति दुर्लक्ष्यं तदंतरमि
त्यर्थः तदेवं करणानि विभज्य विशेषावि
शेषान्विभजते तन्मात्राण्यविशेषास्ते
भ्यो भूतानि पंच पंचभ्यः एते स्मृता विशे
षाः शांता घोराश्च मूढाश्च ३८
अविशेषा शब्दादितन्मात्राणि सूक्ष्माणि
न त्वेषां शांतादिरस्त्युपभोगयोग्यो विशे
ष इति मात्रशब्दार्थः अविशेषानुक्त्वा
विशेषानवकुमुत्पत्तिमेषामाह तेभ्यस्त
न्मात्रेभ्यो यथासंख्यमेकद्वित्रिचतुष्पंच
भ्यो भूतान्याकाशानिलानलसलिलाव
निरूपाणि पंच पंचभ्यस्तन्मात्रेभ्यः

अस्त्वेतेषांभूतानामुत्पत्तिर्विशेषेषु कि मा
६२ यातमित्यत आह एतेस्मृताविशेषाः
८ कुतः शांताः घोराश्चमूढाश्च चकारोहे
तौद्वितीयसमुच्चये यस्मादाकाशादिषु
स्थूलेषुसत्वप्रधाना,तयाकेचिच्छांताः
सुखाः प्रकाशकाः लाघंवाः केचिद्रजः
प्रधानतयाघोरादुःखाअनवस्थिताः
केचित्तमतयाकेचिच्छांताः सुखाः प्रका
शकाः लाघंवाः केचिद्रजः प्रधानतयो
घोरादुःखाअनवस्थिताः केचित्तमः प्रधा
नतयामूढाः विषाण्णागुरवः तेमीप
रस्परव्यावृत्ताअनुभूयमानाविशेषा
इतिस्थूलाइतिचोच्यंते तन्मात्राणि ६२

त्वमस्रादिभिः परस्परसमावृत्तानि नानुभू
यंते इत्यविशेषाइति सूक्ष्माइतिचोक्तंता
विशेषाणामवांतरविशेषमाह सूक्ष्मा
मातापितृजाः सहप्रभूतैस्त्रिधाविशेषाः
स्युः सूक्ष्मास्तेषांनियतामातापितृजानि
वर्तंते ३९ त्रिधाविशेषाःस्युः तान्वि
शेषप्रकारानाह सूक्ष्मामातापितृजाः
सहप्रभूतैः सूक्ष्माः सूक्ष्मदेहाः प्रकल्पि
ताः मातापितृजाःषाट्कौशिकाः तत्रमा
तृतोलोमलोहितमांसानि पितृतस्स्ना
य्वस्थिमज्जानइतिषट्कोशाः प्रकृष्टानि
महातिभूतानिप्रभूतानितैः सह सूक्ष्मं
शरीरमेकोविशेषः मातापितृजंद्विती

यः माहाभूतानितृतीयः महाभूतवर्गे
६३ 63 घुघटादीनांनिवेशइति सूक्ष्ममातापि
तृजयोर्देहयोर्विशेषमाह सूक्ष्मास्तेषां
विशेषाणांमध्येयेतेनियताः मातापितृ
जानिववर्तंतेरसांताभस्मांतावाविडंतावे
ति सूक्ष्मशरीरंविभजते पूर्वोत्पन्नम
सक्तंनियतंमहदादिसूक्ष्मपर्यंतं संस
रतिनिरुपभोगंभावैरधिवासितंलिंगम्
४० पूर्वोत्पन्नंप्रधानेनादिस
र्गेप्रतिपुरुषमेकैकमुत्पादितं असक्तम
व्याहतम् शिलामप्यनुविशति नियत
माचादिसर्गादाचमहाप्रलयादवतिष्ठते
महदादिसूक्ष्मपर्यंतं महदहंकारैका ६३

दशेंद्रियपंचतन्मात्रपर्यंतम् एषांसमु
दायः सूक्ष्मंशरीरंशांतघोरमूढैरिंद्रिये
रन्वितत्वाद्विशेषः नन्वस्त्वेतदेवशरीरंभो
गायतनंपुरुषस्यकृतंदृश्यमानेनषाट्कौशि
केनशरीरेणेत्यतआह संसरति उपा
त्तमुपात्तंषाट्कौशिकंशरीरंजहातिहायं
हायंचोपादत्तेकस्मान्निरुपभोगंयतः
षाट्कौशिकंशरीरंविनासूक्ष्मंशरीरंनिरु
पभोगंयस्मात्तस्मात्सूक्ष्मशरीरंसंसरति
ननुधर्माधर्मनिमित्तःसंसारःनचसूक्ष्म
शरीरस्यास्तितद्योगस्तत्कथंसंसरतीत्य
तआह भावैरधिवासितं धर्माधर्मज्ञा
नाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याणिभा

वास्तदन्विताबुद्धिस्तदन्वितंचसूक्ष्मंशरी
६४ 64 रमिति तदपिभावैरधिवासितं यथा
सुरभिचंपकसंसर्गाद्वस्त्रंतदामोदवासि
तंभवति तस्माद्भावैरधिवासितत्वात्संस
रति कस्मात्पुनःप्रधानमिवमहाप्रलये
पितच्छरीरंनतिष्ठतीत्यतआह लिंगत्वा
यंगच्छतीतिलिंगंहेतुमत्वेनचास्यलिंगत्व
मितिभावः स्यादेतत् बुद्धिरेवसाहंका
रेंद्रियाकस्मान्नसंसरतिकृतंसूक्ष्मशरी
रेणाप्रामाणिकेनेत्यतआह चित्रंय।
थाश्रयमृतेस्थाण्वादिभ्योविनायथाच्छा
या तद्वद्विनाविशेषैर्नतिष्ठतिनिराश्र
यंलिंगम् ४१ लिंगनादज्ञाय ६४

नाद्दुद्ध्याद्ध्यारयोर्लिंगं तद्दनाश्रयंनतिष्ठ
ति जन्मप्रायणांतरालेवुवत् विनाविशे
षैरितिसूक्ष्मैः शरीरैरित्यर्थः आगमश्चा
त्रभवति अंगुष्ठमात्रंपुरुषंनिश्चकर्षव
लाद्यमइति अंगुष्ठमात्रत्वेनसूक्ष्मत्व
मुपलक्षयति आत्मनोनिष्कर्षासंभवा
त्सूक्ष्ममेवशरीरंपुरुषः तदपिहिपुरि
स्थूलेशरीरेशेतइति एवंसूक्ष्मशरीरा
स्तित्वमुपपाद्ययथासंसरतियेनचहेतु
नातदुभयमाह पुरुषार्थहेतुकमिदंनि
मित्तनैमित्तिकप्रसंगेन प्रकृतेर्विभुत्व
योगान्नटवद्व्यवतिष्ठते लिंगम् ४२
पुरुषार्थेनहेतुनाप्रयुक्तं निमित्तंधर्मा

धर्मादिनैमित्तिकांतेषुतेषुनिकायेषुपा
६५ 65 द्वैशिकशरीरग्रहः सहिधर्माधर्मादि
निमित्तप्रभवः निमित्तंचनैमित्तिकंचत
त्रयःप्रसंगःप्रसक्तिस्तयानटवद्व्यवति
ष्ठतेलिंगंसूक्ष्मशरीरंयथाहिनटस्तास्ता
भूमिकांविधायपरशुरामोवाअजात
शत्रुर्वावत्सराजोवाभवतिएवंतत्तत्स्थू
लशरीरग्रहणाद्देवोवामनुष्योवापशु
र्वावनस्पतिर्वाभवतिसूक्ष्मंशरीरमित्य
र्थःकुतःपुनरस्येदृशोमहिमेत्यतआ
ह प्रकृतेर्विभुत्वयोगात् तथाचपुरा
णे वैश्वरूप्यात्प्रधानस्यपरिणामो
यमद्भुतइति नमित्तनैमित्तिकप्रसं

गेनेसुक्तं तत्र निमित्तनैमित्तिके विभजते
सांसिद्धिकाश्च भावाः प्राकृतिका वैकृति
काश्च धर्माद्याः दृष्टाः करणाश्रयिणः का
र्याश्रयिणश्च कललाद्याः ४३ सांसि
द्धिकाश्च भावाः इति वैकृतिकाः नैमि
त्तिकाः प्राकृतिकाः स्वाभाविकाः भावाः
सांसिद्धिकाः तथाहि सर्गादावादिवि
द्वानत्र भगवान्कपिलो महामुनिर्धर्म
ज्ञानवैराग्यैश्वर्यसंपन्नः प्रादुर्बभूवेति
स्मरंति वैकृताश्च भावा असांसिद्धिकाः
ये उपायानुष्ठानोत्पन्नाः यथाप्राप्येतस
प्रभृतीनां महर्षीणां एवमधर्माज्ञा
नावैराग्यानैश्वर्याणापि कार्ये शरीरं

तदाश्रयिणस्तस्यावस्थाः कललबुद्बु
६६ 66 दमांसपेशीकंधरशिरोबाह्वंसाद्यंग
प्रत्यंगव्यूहागर्भस्थस्य ततोनिर्गतस्य
बाल्यकौमारयौवनवार्द्धकानीति अव
गतानिनिमित्तनैमित्तिकानिकतमस्य
तुनिमित्तस्यकतमन्नैमित्तिकमित्यत
आह धर्मेणगमनमूर्द्ध्वंगमनमध
स्ताद्भवत्यधर्मेण ज्ञानेनचापवर्गो
विपर्ययादिष्यते बंधः ४४ ध
र्मेणगमनमूर्द्ध्वं द्युप्रभृतिलोकेषु
गमनमधस्ताद्भवत्यधर्मेणसुतलादि
षु ज्ञानेनाचापवर्गः तावदेवप्रकृ
तिर्भोगमारभतेनयावद्विवेकख्यातिं

मंतंपुरुषंप्रतिनिवर्त्तते यथाहुः वि
वेकख्यातिपर्यंतंयातिप्रकृतिचेष्टितमि
ति विपर्ययादतत्वज्ञानात् उत्पद्यतेबं
धः सचत्रिविधः प्राकृतिकोवैका
रिकोदाक्षिणकश्चेति तत्रप्रकृतावा
त्मज्ञानात्येप्रकृतिमुपासतेतेषांप्राकृ
तिकोबंधः यः पुराणेप्रकृतिलयान्प्र
त्युच्यते पूर्णंशतसहस्रंतुतिष्ठंत्यव्यक्त
चिंतकाइति वैकारिकोबंधस्तेषांये
विकारानेवभूतेंद्रियाऽहंकारबुद्धीः
पुरुषबुद्ध्योपासतेतान्प्रतीदमुच्यते
ते दशमन्वंतराणीहतिष्ठंतींद्रिय
चिंतकाः भौतिकास्तुशतंपूर्णंसह

६१
68

स्त्वंचाभिमानिकाः वौद्धादशसहस्राणि
तिष्ठंति विगतज्वराः तेत्वमीविदेहाये
षांवैकृतिकोवंधइति इष्टापूर्त्तेनदाक्षि
णः पुरुषतत्वानभिज्ञोहीष्टापूर्त्तकारीका
मोपहतमनावध्यतेइति वैराग्यात्प्रकृ
तिलयः ससारोभवतिराजसाद्रागा
त् ऐश्वर्यादविघातोविपर्ययात्तद्विप
र्यासः ४५ वैराग्यात्प्रकृतिलयः
पुरुषतत्वानभिज्ञस्यवैराग्यमात्रात्प्रकृ
तिलयः प्रकृतिग्रहणेनप्रकृतिमहद
हंकारभूतेंद्रियाणिगृह्यंते तेष्वात्मबुद्ध्यो
पास्यमानेषुलयः संसारोभवतिराजसा
द्रागात् राजसादिसनेनरजसोदुःख

हेतुत्वात्संसारस्यदुःखहेतुतासूचिता ऐश्व
र्यादविघातइच्छायाः ईश्वरोहि यदिच्छ
तितत्करोति विपर्ययादनैश्वर्याद्विप
र्यासःसर्वत्रेच्छाविघातइत्यर्थः बुद्धिध
र्मान्धर्मादीनष्टौभावान्समासव्यासा
भ्यांमुमुक्षूणांहेयोपादेयान्दर्शयितुंप्र
थमंतावत्समासमाह एषप्रत्ययसर्गोवि
पर्ययाशक्तितुष्टिसिद्ध्याख्यः गुणवैष
म्यविमर्दात्तस्यभेदास्तुपंचाशत् ४६
एषेतिप्रतीयतेनेनेतिबुद्धिःप्रत
यस्तस्यसर्गः तत्रविपर्ययोज्ञानंअविद्या
सापिबुद्धिधर्मः अशक्तिरपिकरण
वैकल्यहेतुकाबुद्धिधर्मएवतुष्टिसिद्धीअ

विवक्ष्यमाणलक्षणोबुद्धिधर्मोवेव
६८ तत्रविपर्ययाशक्तितुष्टिषुयथायोग्यं
68 मान्तानांचधर्मादीनांज्ञानंवर्जेनर्म
न्तर्भावः सिद्धौचज्ञानस्येति व्यास
माह तस्यभेदास्तुपंचाशत् कस्माद्गु
णवैषम्यविमर्दात् गुणानांवैषम्यम
केकस्याधिकवलतादूमोर्द्वयोर्वाएके
कस्यचोनवलताद्वयोर्द्वयोर्वात्रिचन्यू
नाधिकेमंदमध्याधिक्यमात्रतया
यथाकार्यमुन्नीयते तदिदंगुणा।
नांवैषम्यंतेनायमर्द एकेकस्यन्यून
स्यद्वयोर्द्वयो।र्वाभिभवः तस्मात्तस्य
भेदाःपंचाशदिति तानेवपंचाशद्भे

दान् गणयति पंचविपर्ययभेदाभवं
त्यशक्तिश्चकरणवैकल्यात् अष्टाविं
शतिभेदातुष्टिर्नवधाऽष्टधासिद्धिः
४७ अविद्यास्मितारागद्वे
षाभिनिवेशायथासंख्यं तमोमोहम
हामोहतामिस्रांधतामिस्रसंज्ञकाः
पंचविपर्ययविशेषाः विपर्ययप्रभ
वानामस्मितादीनांविपर्ययस्वभावत्वा
त् यद्वा यदविद्याविपर्ययेणाऽ
वधार्यतेवस्तु अस्मितादयस्तत्स्वभावा
ःसंतस्तदभिनिविशंते अतएवपंच
पर्वाविद्येत्याह भगवान् वार्षगण्यः
संप्रतिपंचानांविपर्ययभेदानामवां

तद्भेदमाह भेदस्तमसोष्टविधोमो
६९ 69 हस्यचदशविधोमहामोहः तामि
स्रोष्टादशधातथाभवत्यधतामिस्रः
४८ भेदस्तमसोऽविद्यया
अष्टविधः अष्टसु अव्यक्तमहदहं
कारपंचतन्मात्रेष्वनात्मस्वात्मबुद्धि
रविद्यातमः अष्टविधविषयत्वात्त।
स्याष्टविधत्वं। मोहस्यच अत्राप्यष्ट
विधोभेदइतिचेन्नानुषज्यते देवास्त्व
ष्टविधमैश्वर्यैश्वर्यमासाद्यामृतत्वाभि
मानिनोऽणिमादिकमात्मीयंशाश्वति
कमभिमन्यंतइतिसेयमस्मितामो
होऽष्टविधैश्वर्यविषयत्वादष्टविधः

दशविधोमहामोहः शब्दादिषुपंचसु
दिव्यादिव्यतयादशविधेषुविषयेषुरं
जनीयेषुरागआसक्तिर्महामोहः स
चदशविधविषयत्वाद्दशविधः तामि
स्रोद्वेषोष्टादशधा शब्दादयोदशवि
षयारंजनीयाः स्वरूपतः ऐश्वर्यंत्वणि
मादिकंनस्वरूपतोरंजनीयंकिंतुरं
जनीयशब्दाद्युपायः तेचशब्दादयउ
पस्थिताःपरस्परेणापहन्यमानाः त
दुपायाश्चाणिमादयःस्वरूपेणैवको
पनीयाभवंतीतिशब्दादिभिर्दशभिः
सहाणिमाद्यष्टकमष्टादशधेति त
द्विषयोद्वेषस्तामिस्रोऽष्टादशविषय

त्वादष्टादशविधइति तथाभवत्यंध
१० 70 तामिस्रःअभिनिवेशस्त्वासोंधतामिस्रः
तथैवसन्नेनाष्टादशधेत्यनुषज्यते दे
वाःखल्वणिमादिकमष्टविधमैश्वर्य
मासाद्यदशशब्दादीनूभुंजानाःशब्दा
दयोभोग्याउपायाश्चाणिमादयोस्मा
कमसुरादिभिर्नोपघानिषतेतिबिभ्य
तितदिदंभयमभिनिवेशोंधतामिस्रो
ष्टादशविषयत्वादष्टादशधेति सोयं
यंचविकल्पोविपर्ययोऽवांतरभेदाद
द्वाषष्टिरिति तदेवंपंचविपर्ययभेदानु
क्त्वाऽष्टाविंशतिभेदामशक्तिमाह
एकादशेंद्रियवधाःसहबुद्धिवधैरश

क्तिरुद्दिष्टा सप्तदशवधाबुद्धेर्विपर्येया
तुष्टिसिद्धीनाम् ४९ एकादशें
द्रियवधाः वाधिर्यंकुष्टितांधत्वंजड
ताजिघ्रतातथामूकताकौरायपंगुत्वक्लै
ब्योदावर्त्तमंदताः यथासंख्यंश्रोत्रादी
नामिंद्रियाणांवधाः एतावत्येवचत
द्धेतुकाचबुद्धेरशक्तिः स्वव्यापारेभवति
तथाचैकादशहेतुकत्वादेकादशधा
बुद्धेरशक्तिरुच्यते हेतुहेतुमतोरभेद
विवक्षयाचसामानाधिकरण्यम् त
देवमिंद्रियवधद्वारेणबुद्धेरशक्तिमु
क्त्वास्वरूपतोऽशक्तीराह सहबुद्धि
वधैरिति कतिबुद्धेः स्वरूपतोवधा

इत्यत आह सप्तदशधावुद्धेः कु
७१ 71 तःविपर्ययात्तुष्टिसिद्धीनां तुष्टयो न
वधेति न ह्विपर्ययास्तन्निरूपणान्नव
धाभवंति एवंसिद्धयोऽष्टाविति तद्वि
पर्ययास्तन्निरूपणादष्टौभवंतीति
तुष्टिर्नवधेत्युक्तैं ताः परिगणयति
आध्यात्मिकाश्चतस्रः प्रकृत्युपादान
कालभाग्याख्याः वाह्यविषयोपर
मात्पंचनवतुष्टयोऽभिमताः ५०
आध्यात्मिंकाः प्रकृतिव्यतिरि
क्त आध्यात्मिकातुष्टयोभवंति प्रकृ
तिव्यतिरिक्तमात्मानमधिकृत्य यस्मा
त्तास्तुष्टयस्तस्मादाध्यात्मिकाः का

स्ताइत्यतआह प्रकृत्युपादानकालभाग्या
ख्याः प्रकृत्यादिराख्यायासांतास्तथोक्ताः
तत्रप्रकृत्याख्यातुष्टिर्यथा कस्यचिदुप
देशः विवेकसाक्षात्कारोहिप्रकृतिपरि
णामभेदः तंचप्रकृतिरेवकरोतीतिकृ
तंतेध्यानाभ्यासेनतस्मादेवमेवास्स्वव
त्सेति सेयमुपदेष्टव्यस्यशिष्यस्यप्रकृ
तौतुष्टिः प्रकृत्याख्याअंभउच्यते
यातुप्राकृत्यपिविवेकख्यातिर्नसाप्र
कृतिमात्राद्भवतिमाभूत्सर्वस्यसर्वदात
न्मात्रस्यसर्वान्प्रत्यविशेषात्प्रव्रज्या
यास्तुभवति तस्मात्प्रव्रज्यामुपाददी
थाः कृतंतेध्यानाभ्यासेनायुष्मन्नि

सुपदेशेतुष्टिः सोपादानाख्यासलिलमु
७२ च्यते यातुप्रव्रज्यापिनसद्योनिर्वाणदेति
सैवकालपरिपाकमपेक्ष्यसिद्धिंतेविधा
स्यति अलमुत्तमतयातवेत्युपदेशेतुष्टिः
साकालाख्याओघउच्यते यातुनकाला
न्नाप्युपादानाद्विवेकख्यातिरपितुभा
ग्यादेव अतएवमदालसापत्यान्यतिव
लानिमातुरुपदेशमात्रादेवविवेकख्या
तिमंतिमुक्तानिवभूवुः तस्मात्भाग्यमे
वहेतुर्मोन्यदितिसुपदेशेतुष्टिः साभाग्याख्या
वृष्टिरुच्यते वाह्यादर्शयति वाह्यातु
ष्टयोविषयोपरमात्पंच याःखल्वना
त्मनःप्रकृतिमहदहंकारादीनात्मत्वे।

भिमन्यमानस्यवैराग्येसतिस्फुटयस्तावा
स्वाः आत्मज्ञानाभावेसत्सनात्मानमधि
कृत्सप्रवृत्तेरिति ताश्चवैराग्येसतिसंभवं
तितुष्टयइतिवैराग्यहेतूनांपंचत्वाद्वैरा
ग्याण्यपिपंचत्तसंचत्वातुष्टयःपंचेति
उपरम्यतेऽनेनेतिउपरमोवैराग्यम्
विषयादुपरमोविषयोपरमः विष
याः भोग्याः शब्दादयः पंच उपर
मा अपिपंच तथाहि अर्ज्जनरक्ष
णक्षयभोगहिंसादोषदर्शनहेतुजन्मा
नउपरमाःपंचभवंति तथाहि सेवा
दयोधनार्ज्जनोपायास्तेचसेवकादी
न्दुःखाकुर्वंति दृप्यदृरीश्वरद्वास्थदं

डिंबंडाद्वंद्वजांवेदनांभावयन्प्राप्तः
७३ 73 कःसेवासुपसज्जते एवमन्येप्यर्ज्ज
नोपायाद्दुःखाइतिविषयोपरमेयातुष्टि
ःसैषापारमुच्यते तथार्ज्जितंधनंराजे
कागारिकाग्निजलौघादिभ्योविनंक्ष्य
तीतितद्रक्षणेमहद्दुःखमितिभावयतो
विषयोपरमेयातुष्टिःसाद्वितीयासु
पारमुच्यते तयामहतायासेनार्ज्जितं
धनंभुज्यमानंक्षीयतइतित्तत्क्षयं
भावयतोविषयोपरमेयातुष्टिःसातृ
तीयापारपारमुच्यते एवंशब्दादि
भोगाभ्यासाद्वर्द्धंतेकामास्तेचविषया
ऽप्राप्तौकामिनंदुःखयंतीतिभोग

दोषंभावयतोविषयोपरमेयातुष्टिः
साचतुर्थीअनुत्तमांभउच्यते एवंनानुपह
त्यभूतानिविषयोपभोगःसंभवतीतिहिं
सादोषदर्शनाद्विषयोपरमेयातुष्टिःसा
पंचमीउत्तमांभउच्यते एवमाध्यात्मिका
भिश्चतस्रोभिर्बाह्याभिश्चपंचभिमताः
गौणमुख्यभेदभिन्नाःसिद्धीराह ऊहः
शब्दोऽध्ययनंदुःखविघातास्त्रयः सु
हृत्प्राप्तिः दानंचसिद्धयोऽष्टौसिद्धेःपू
र्वोंकुशस्त्रिविधः ५१ विहन्य
मानस्यदुःखस्यत्रित्वात्तद्विघातास्त्रयइ
इतिइमामुख्यास्तिस्रःसिद्धयः तदु
पायतयात्वितरागौणाःपंचसिद्धयः

ता अपि हेतुहेतुमत्तया व्यवस्थिताः तत्रा
७४ 74 ध्यापनलक्षणा सिद्धिर्हेतुरेव मुख्या स्त
सिद्धयो हेतुमत्य एव मध्यमास्तु हेतुहे
तुमत्यः विधिवद्गुरुमुखादध्यात्मविद्या
नामक्षरस्वरूपग्रहणमध्ययनं प्रथमा
सिद्धिस्तारमुच्यते तत्कार्यः शब्दः शब्द
इति शब्दजनितमर्थज्ञानमुपलक्षयति
कार्ये कारणोपचारात्सा द्वितीया सिद्धिः
सुतारमुच्यते तदिदं द्विधाश्रवणं ऊ
हस्तर्कः आगमाविरोधिन्यायेनागमार्थ
परीक्षणम् परीक्षणं च संशयपूर्वपक्ष
निराकरणेनोत्तरपक्षव्यवस्थापनम् त
दिदं मननमाचक्षते आगमिनः सा तृती

यासिद्धिस्तारतारमुच्यते सुहृत्प्राप्तिः ॥
न्यायेनहिस्वयंपरीक्षितमप्यर्थंनश्रद्दधते
नयावद्गुरुशिष्यसब्रह्मचारिभिःसहसं
वाद्यते अतःसुहृदांगुरुशिष्यसब्रह्म
चारिणांसंवादकानांप्राप्तिःसुहृत्प्राप्तिः
सासिद्धिश्चतुर्थीरम्यकमुच्यते दानंच
शुद्धिःविवेकज्ञानस्यदैप्शोधनइत्य
स्माद्धातोर्दानपदव्युत्पत्तेःयथाहात्रभ
गवान्पतंजलिः विवेकख्यातिरविप्ल
वादुःखत्रयस्यहानोपायइति अविप्लु
वाशुद्धिःसाचसवासनसंशयविपर्यासा
नांपरिहाण्याविवेकसाक्षात्कारस्यस्व
छप्रवाहेवस्थानं साचनविनादरनैरं

तद्यदीर्घकालसेविताभ्यासपरिपाकाद्भ
७० . 75 वतीतिहाने न विवेकख्यात्याः कार्येणसो
पिसंगृहीतः सेयंपंचमीसिद्धिः सदामु
दितमुच्यते तिस्रश्चमुख्याः सिद्धयः
प्रमोदंमुदितमोदमानाइत्यष्टौसिद्धयः
अन्येत्वेवंव्याचक्षते विनोपदेशादि
नाप्राग्भवीयाभ्यासवशात्तत्वस्यस्वय
मूहनंसासिद्धिरूहः यस्यसांख्यशास्त्र
पाठमन्यदीयमाकर्ण्यतत्वज्ञानमुत्प
द्यतेसासिद्धिः शब्दः शब्दपाठादनंत
रंभावात् यस्यशिष्याचार्यसंबंधेनसां
ख्यशास्त्रंग्रंथतोऽर्थतश्चाधीत्यज्ञा
नमुत्पद्यतेसाध्ययनहेतुकासिद्धिर

ध्ययनम् सुहृत्प्राप्तिरिति यस्याधि
गतत्वंसुहृत्संप्राप्यज्ञानमुत्पद्यतेसाज्ञा
नलक्षणासिद्धिस्तस्यसुहृत्प्राप्तिः दा
नंचसिद्धिहेतुः धनादिदानेनाराधितो
ज्ञानीज्ञानंप्रयच्छतीति अस्यचयुक्तायु
क्तत्वेसूरिभिरेवावगंतव्यइतिकृतंपर
दोषोद्भावनेननः सिद्धांतमात्रव्याख्या
नप्रवृत्तानामिति सिद्धितुष्टिविपर्य
येणाशक्तिर्बुद्धिवधः सप्तदशधाद
ष्टव्यः अत्रप्रत्ययसर्गोबुद्धिरूपाहेये
तिप्रसिद्धमेवतन्निवारणहेतवश्चवि
पर्ययाशक्तितुष्टयोहेयाइत्याह सि
द्धेः पूर्वांकुशस्त्रिविधः पूर्वइतिवि

पर्य्यया शक्तितुष्टीः परामृशति ता सिद्धि

७६ करिणीनामंकुशो निवारकत्वात् अतः

सिद्धिपरिपंथित्वाद्विपर्य्ययाशक्तितुष्ट

योहेयाइत्यर्थः स्यादेतत् पुरुषार्थ

प्रयुक्ता सृष्टिः सचपुरुषार्थः प्रत्यय

सर्गाद्वा तन्मात्रसर्गाद्वा सिध्यतीति कृत

मुभयसर्गेणेत्यआह भिविनाभावैर्लि

गंनविनालिंगेनभावनिर्वृत्तिः लिंगा

ख्योभावाख्यस्तस्माद्द्विविधः प्रवर्त्त

तेसर्गः ५२ लिंगमितितन्मा

त्रसर्गमुपलक्षयति भावैरितिचप्र

त्ययसर्गम् एतदुक्तंभवति तन्मा

त्रसर्गस्यपुरुषार्थसाधनत्वंस्वरूपंच

नप्रत्ययसर्गोद्विनाभवति एवंप्रत्यय
सर्गस्यस्वरूपंपुरुषार्थसाधनत्वंच नत
न्मात्रसर्गमृतेउभयथासर्गे प्रवृत्तिः
भोगः पुरुषार्थो नभोग्यान् शब्दादीन्
भोगायतनंच शरीरद्वयमंतरेणसंभवतीति
उपपन्नस्तन्मात्रसर्गः एवंसएवभोगोभो
गसाधनानींद्रियाणिचांतःकरणानिर्वा
नरेणनसंभवति नचतानिधर्मादीन् भा
वान् विना नचापवर्गहेतुर्विवेकख्याति
रुभयसर्गंविनेत्युपपन्नउभयविधस
र्गः अनादित्वाच्चबीजांकुरवन्नान्यो
न्याश्रयदोषमावहति कल्पादावपिच
प्राचीनकल्पोत्पन्नभावलिंगसंस्कार

वशाद्भावलिंगयोरुत्पत्तिर्नोनुपपन्ने
७१ 77 तिसर्वमवदातम् विभक्तः प्रत्ययसर्गः
भूतादिसर्गंविभजते अष्टविकल्पोदै
वस्तैर्यग्योनश्चपंचधाभवति मानुष्य
श्चैकविधःसमासतोभौतिकःसर्गः
५३ ब्राह्मप्राजापत्यैंद्रपैत्र्यगांधर्व
यक्षराक्षसपैशाचाइत्यष्टविधोदैवः
सर्गः तैर्यग्योनश्चपंचधाभवति पशु
मृगपक्षिसरीसृपस्थावराइतिमानुष्य
श्चैकविधः ब्राह्मणत्वाद्यवांतरभेदावि
वक्षया संस्थानस्यचतुर्ष्वविशेषा
दितिसमासतः संक्षेपतोभौतिकःसं
सर्गः घटादयस्त्वशरीरत्वेपिस्थाव

एवं वेति भौतिकस्यास्य सर्गस्य चैतन्योत्क
र्षनिकर्षतारतम्याभ्यामूर्ध्वाधोमध्यभा
वेनत्रैविध्यमाह ऊर्ध्वंसत्वविशालस्त
मोविशालश्चमूलतः सर्गः मध्येरजो
विशालोब्रह्मादिस्तंबपर्य्यंतः ५४
ऊर्ध्वंसत्वविशालस्तमोविशालश्चमूल
तःसर्गः मध्येरजोविशालोब्रह्मादि
स्तंबपर्य्यंतः ५४ ऊर्ध्वंसत्ववि
शालोद्युप्रभृतिःसत्यांतोलोकःसत्वब
हुलः तमोविशालश्चमूलतः सर्गःपश्वा
दिःस्थावरांतः सोपिमोहमयत्वात्तमोब
हुलः भूर्लोकस्तुसप्तद्वीपसमुद्रस
न्निवेशोमध्येरजोविशालः धर्माधर्मा

नुष्ठानपरत्वाद्दुःखबहुलत्वात् तामिमां
७८ 78 लोकसंस्थितिं संक्षिपन्ति ब्राह्मादिस्तंबप
र्यन्तः स्तंबग्रहणेन वृक्षादयः संगृहीताः
तदेवं सर्गं दर्शयित्वा तस्यापवर्गसाधन
वैराग्योपयोगिनीं दुःखतामाह तत्रज
रामरणकृतं दुःखं प्राप्नोति चेतनः पुरु
षः लिंगस्याविनिवृत्तेस्तस्माद्दुःखं स्व
भावेन ५५ तत्र शरीरादौ यद्य
पि विविधविचित्रानंदं भोगभागिनः प्रा
णभृद्भेदास्तथापि सर्वेषां जरामरण
कृतं दुःखं अविशिष्टं सर्वस्य खलु म
रणत्रासो मा न भूवं भूयासमित्येवमाल
कोस्ति दुःखं च भयहेतुरिति दुःखंम

रणं स्यादेतत् सुखादयः प्राकृता बुद्धि
गुणाः तत्कथमेते चेतनसंबंधिनोभवंती
त्यत आह पुरुषइति पुरिलिंगेशेतेपु
रुषः लिंगंचतत्संबंधिचेतनोपितत्संबं
धीभवतीत्यर्थः कुतः पुनर्लिंगसंबंधि
दुःखंपुरुषस्यचेतनस्येत्यत आहलिंग
स्याविनिवृत्तेः पुरुषाद्भेदाग्रहाल्लिंग
धर्मानात्मन्येवाध्यवस्यतिपुरुषः अ
थवादुःखप्राप्ताववधिराङ्ना कथ्यते
लिंगंयावन्निवर्त्ततेतावदिति उक्तस्य
सर्गस्यकारणविप्रतिपत्तीर्निराकरोति
इत्येषः प्रकृ प्रकृतिकृतोमहदादिवि
शेषभूतपर्यंतः प्रतिपुरुषविमोक्षा

७९ 79

थंस्वार्थ इव परार्थ आरंभः ५६

आरभ्यत इत्यारंभः सर्गः प्रकृत्यैव कृतो
नेश्वरेण न ब्रह्मोपादानो नाप्यकारणः
अकारणत्वे ह्यत्यंतभावोऽत्यंताभावो वा
भवेत् न ब्रह्मोपादानश्चितिशक्तेरप
रिणामात् नेश्वराधिष्ठितप्रकृतिकृतो
निर्व्यापारस्याधिष्ठातृत्वासंभवात् न
हि निर्व्यापारस्तक्षा वास्याद्यधितिष्ठति
ननु प्रकृतिकृतश्चेत्तस्या नित्यायाः प्र
वृत्तिशीलाया अनुपरमात्सदैव सर्गः
स्यादिति न कश्चिन्मुच्येतेत्यत आह प्र
तिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आ
रंभः यथौदनकाम ओदनाय पाके प्र

वृत्त ओदनसिद्धो निवर्त्तेत एवं प्रत्येकं पुरु
षान्मोचयितुं प्रवृत्ता प्रकृतिर्यं पुरुषं मो
चयति तं प्रति न पुनः प्रवर्त्तते तदिदमा
ह स्वार्थ इव स्वार्थे यथा तथा परार्थ आ
रंभ इत्यर्थः स्यादेतत् स्वार्थे परार्थे
वाचेतनः प्रवर्त्तते न च प्रकृतिश्चेतनैवं
भवितुमर्हति तस्मादस्ति प्रकृतेरधि
ष्ठाता चेतनः न च क्षेत्रज्ञाश्चेतना अपि
प्रकृतिमधिष्ठातुमर्हन्ति तेषां प्रकृति
स्वरूपानभिज्ञत्वात् तस्मादस्ति सर्वार्थ
दर्शी प्रकृतेरधिष्ठाता स चेश्वर इत्यत
आह वत्सविवृद्धिनिमित्तं क्षीरस्य यथा
प्रवृत्तिरज्ञस्य पुरुषविमोक्षनिमित्तं

तथाप्रवृत्तिःप्रधानस्य ५७ दृष्ट
मचेतनमपिप्रयोजनेप्रवर्त्तमानं प
यावत्सविवृद्ध्यर्थे क्षीरमचेतनं प्रवर्त्तते
एवंप्रकृतिरचेतनापिपुरुषविमोक्षणा
यप्रवर्त्तिष्यते नच क्षीरप्रवृत्तेरपीश्वरा
धिष्ठाननिवंधनत्वेनसाध्यत्वान्नसाध्ये
नव्यभिचारइतिसांप्रतम् प्रेक्षावत्प्रवृत्तेः
स्वार्थकारुण्याभ्यांव्याप्तत्वात् तेचजगत्स
र्गाद्व्यावर्त्तमानेप्रेक्षावत्प्रवृत्तिपूर्वकत्व
मपिव्यावर्त्तयतः नत्ववाप्तसकलप्रेक्षित
स्यभगवतोजगत्सृजतःकिमप्यभिलषि
तंनभवति नापिकारुण्यादस्यसर्गप्रवृ
त्तिः प्राक्सर्गाज्जीवानामिंद्रियशरीरवि

षयानुत्पत्तौदुःखाभावेनकस्यप्रहाणेच्छाका
रुण्यम् सर्गोत्तरकालंदुःखिनोवलोक्य
कारुण्याभ्युपगमेदुरुत्तरमितरेतराश्र
यत्वंकारुण्येनसृष्टिःसृष्ट्याचकारुण्य
मिति अपिचकरुणयाप्रेरितईश्वरः
सुखिनएवजंतून्सृजेत्नविचित्रान् का
र्मवैचित्र्याद्वैचित्र्यमितिचेत् कृतमस्यप्रे
क्षावतः कर्माधिष्ठानेनतदनधिष्ठानस
त्रादेवाचेतनस्यापिकर्मणःप्रवृत्त्यनुपपत्ते
स्तत्कार्यशरीरेंद्रियविषयानुत्पत्तौदुः
खानुत्पत्तेरतिसुकरत्वात् प्रकृतेस्त्वचे
तनायाःप्रवृत्तेर्नस्वार्थानुग्रहोनकारु
ण्यंप्रयोजकमितिनोक्तदोषप्रसंगावतरः

८१
81

परार्थमात्रंतुप्रयोजनमुपपद्यते तस्मा
त्सुष्टूक्तंवत्सविवृद्धिनिमित्तमितिस्वार्थइ
वेतिदृष्टांतितंतद्विभजते औत्सुक्यनि
वृत्त्यर्थंयथाक्रियासुप्रवर्ततेलोकः पु
रुषस्यविमोक्षार्थंप्रवर्त्ततेतद्वदव्यक्तम्
५८ औत्सुक्यमिच्छासाखल्वि
ष्यमाणार्थप्राप्तौनिवर्त्ततेइष्यमाणश्चसा
र्थःइष्टलक्षणत्वात्फलस्यादार्ष्टांतिके
योजयति पुरुषस्येत्यादि ननुभवतुपु
रुषार्थःप्रकृतेःप्रवर्त्तकोनिवृत्तिस्तुकु
तस्याप्रवृत्तेरित्यतआह (रंगस्येतिस्था)
(नेनस्थानिनःपारिषदानुपलक्षयति)
(आत्मानंशब्दाद्यात्मनापुरुषाद्भेदे)

रंगस्यदर्शयित्वानिवर्त्तते नर्त्तकीयथानृत्या
त् पुरुषस्यतथात्मानंप्रकाश्यविनिवर्त्तते
प्रकृतिः ५९ रंगस्येतिस्थानेनस्थानिनः
पारिषद्यानुपलक्षयति आत्मानंशब्दा
द्यात्मनापुरुषाद्भेदेनचप्रकाश्येत्यर्थः स्या
देतत् प्रवर्त्ततांप्रकृतिःपुरुषार्थंपुरुषा
दुपकृतात्प्रकृतिर्लप्स्यतेकंचिदुपकारंआ
ज्ञासंपादनाराधितादिवाज्ञापयितुर्भुजि
ष्यातथातत्परार्थास्याआरंभइत्यतआह
नानाविधैरुपायैरुपकारिण्यनुपकारि
णः पुंसः गुणवत्यगुणस्यसतस्तस्यार्थम
पार्थकंचरति ६० यथागुणवान
प्युपकार्यपिभृत्योनिर्गुणेऽतएवानुप

कारिणिस्वामिनिनिःफलाराधनः एव
८२ मियंप्रकृतिस्तपस्विनीगुणवसुपकारि
ण्यप्यनुपकारिणिनिर्गुणेपिपुरुषेव्यर्थ
परिश्रमेतिपुरुषार्थमेवयततेनस्वार्थमि
तिसिद्धम् स्यादेतत् नर्त्तकीनृत्यंपरिष
द्योदर्शयित्वानिवृत्तापिपुनस्तद्दृष्टकौतू
हलात्प्रवर्त्ततेयथा तथाप्रकृतिरपिपुरु
षायात्मानंदर्शयित्वानिवृत्तापिपुनःप्र
वर्त्स्यतीत्यतआह प्रवृत्तेःसुकुमारतरंन
किंचिदस्तीतिमेमतिर्भवति यादृष्टास्मी
तिपुनर्नदर्शनमुपैतिपुरुषस्य ६१ सु
कुमारतरताऽतिपेशलतापरपुरुषदर्श
नासहतेतियावत् असूर्यंपश्याहिकु

लवधूरतिमंदाक्षमंथराप्रमाराद्विगलिग
लितशिरोंचलाचेदालोक्यतेपुरुषेणातदा
सौतथाप्रयततेऽप्रमत्तायथैनांपुरुषांतराणि
नपुनःपश्यंतीति एवंप्रकृतिरपिकुलवधू
तोप्यधिकादृष्टाविवेकेनपुनर्दृश्यतऽस्य
र्थः स्यादेतत् पुरुषश्चेदगुणोपरिणा
मीकथमस्यमोक्षः मुचेर्वे धनविश्लेषा
र्थत्वात् सवासनक्लेशकर्माशयानांचवं
धनसंज्ञितानांपुरुषेऽपरिणामिन्यसंभ
वात् अतएवास्यपुरुषस्यनसंसारःप्रेत्य
भावापरनामास्तिनिष्क्रियत्वात् तस्मात्पु
रुषविमोक्षार्थइतिरिक्तंवचइतीमामारं
कामुपसंहारव्याजेनाऽभ्युपगच्छन्नया

करोऽति तस्मान्नवध्यतेऽद्धानमुच्यतेना
८३ पिसंसरतिकश्चित् संसरतिवध्यतेमुच्य
83 तेचनानाश्रयाप्रकृतिः ६२ कस्तर्हीसं
तआह संसरति अद्धानकश्चित्पुरुषो
वध्यतेनकश्चित्संसरतिनकश्चिन्मुच्य
तइतिप्रकृतिरेवतुनानाश्रयासतीवध्य
तेचसंसरतिचमुच्यतेचेतिवंधमोक्षसं
साराःपुरुषउपचर्यंते यथाजयपराजयौ
भृत्यगतावपिस्वामिन्युपचर्यैतेतदाश्रये
णभृत्यानांतद्भागित्वात् तत्फलस्यचशो
कलाभादेःस्वामिसंवंधात् भोगापवर्गे
योश्चप्रकृतिगतयोरपिविवेकाग्रहात्पु
रुषसंवंधउपयादितइतिसर्वंपुष्कलम्

नन्ववगतं प्रकृतिगता बंधसंसारापवर्गाः
पुरुषस्तूपचर्यंत इति किं साधनाः पुनरेते प्रकृ
तेरित्यत आह रूपैः सप्तभिरेव तु बध्नात्या
त्मानमात्मना प्रकृतिः सैव च पुरुषार्थं प्र
ति विमोचयत्येकरूपेण ६३ तत्त्वज्ञान
वर्ज्जैर्बध्नाति धर्मादिभिः सप्तभी रूपैरिति
पुरुषार्थं प्रति भोगापवर्गौ प्रति आत्मनात्मा
नमेकरूपेण तत्त्वज्ञानेन विवेकख्यात्या
विमोचयति पुनर्भोगापवर्गौ न करोतीत्य
र्थः अवगतमीदृशं तत्त्वं ततः किमित्य
त आह एवं तत्त्वाभ्यासान्नास्मि न मे नाह
मित्यपरिशेषं अविपर्ययाद्विशुद्धं के
वलमुत्पद्यते ज्ञानम् ६४ तत्त्वे

नविषयेशाविषायिज्ञानमुपलक्षयति उ
८५ 85 करूपप्रकारतत्वविषयज्ञानाभ्यासादाद
रनैरंतर्यदीर्घकालसेवितात्मत्वपुरुषा
न्यतासाक्षात्कारिज्ञानमुत्पद्यते यद्विषय
श्चाभ्यासस्तद्विषयमेवसाक्षात्कारंउपज
नयति तत्वविषयश्चाभ्यासइतितत्वसा
क्षात्कारंजनयतिअतउक्तंविशुद्धमिति
ति कुतोविशुद्धमित्यतआह अविप
र्ययादिति संशयविपर्ययौहिज्ञानस्या
विशुद्धीतद्रहितंविशुद्धं तदिदमुक्तमवि
पर्ययादिति नियतमनियतनयागृह्ण
न्संशयोपिविपर्ययः तेनाविपर्ययादि
तिसंशयविपर्ययाभावोदर्शितः तत्ववि

षयत्वाच्चसंशयविपर्ययाभावः स्यादेतत्
उत्पद्यतांनामीदृशाभ्यासात्तत्वज्ञानं तथा
प्यनादिनांमिथ्याज्ञानसंस्कारेणमिथ्या।
ज्ञानंजनयितव्यं तथाचतन्निबंधनस्यसं
सारस्यानुच्छेदप्रसंगइत्यतउक्तं केवलं
विपर्ययेणासंभिन्नं यद्यप्यनादिर्विप
र्ययवासनातथापितत्वज्ञानवासनयातत्व
विषयसाक्षात्कारमादधत्यादिमसापिशक्या।
समुच्छेत्तुम् तत्वपक्षपातोहिधियांस्वभावः
यथाहुर्बाह्यापि निरुपद्रवभूतार्थस्वभा
वभूतार्थस्वभावस्यविपर्ययैः नबाधो
यत्नवत्वेपिबुद्धेस्तत्पक्षपाततइति ज्ञान
स्वरूपमुक्तंनास्मिनमेनाहमिति नास्मी

स्यात्मनिक्रियामात्रंनिषेधति यथाहुः क्व
८५ 85 ब्वत्तपः क्रियासामान्यवचनाद् इति तथा
चाध्यवसामाभिमानसंकल्पालोचनानि
चांतराणिवाह्याश्चसर्वेव्यापाराआत्मनि
प्रतिषिद्धानिवोद्धव्यानि यतश्चात्मनि
व्यापारावेशोनास्तितोनाहं अहमितिकर्त्तृ
पदम् अहंजानाम्यहंजुहोम्यहंददेहंभुंज
इतिसर्वत्रकर्त्तुः परामर्शात् निष्क्रियत्वे
चसर्वत्रकर्त्तृत्वाभावस्ततः सुष्ठूक्तंनाह
मिति अतएवनमे कर्त्तोहिस्वामित्वं
लभते तदभावात्तुकुतोभाविकीस्वामि
तेत्यर्थः अथवानास्मीतिपुरुषोप्यस्मि
नप्रसवधर्मा अप्रसवधर्मत्वाच्चाकर्त्तृत्व

माह नाहमिति अकर्तृत्वाच्चनस्वामि
तेत्यत आह नमेइति नन्वेतास्तु ज्ञाते
ष्वपिकश्चित्कदाचि दज्ञातो विषयोस्तित
दज्ञानं वर्जं तूनं बंधयिष्यतीत्यत आह अ
परिशेषमिति नास्तिकिंचिदस्मिन्परिशिष्टं
ज्ञातव्यं यदज्ञानं बंधयिष्यतीत्यर्थः किं
पुनरीदृशेन तत्वसाक्षात्कारेण सिध्यतीत्यत आ
ह तेननिवृत्तप्रसवमर्थवशात्सप्तरूपविनिवृ
त्ताम् प्रकृतिं पश्यति पुरुषः प्रेक्षकवद
वस्थितः सुस्थः ६५ भोगविवेक।
साक्षात्कारौ हि प्रकृतेः प्रसोतव्यौ तौ च प्रसूता
विति नास्याः प्रसोतव्यमवशिष्यते यत्प्रसो
ष्यत इति निवृत्तप्रसवा प्रकृतिः विवेक ज्ञा

नरूपोयोर्थस्तस्यवशः सामर्थ्यंतस्मात् अ
८६ 86 तत्वज्ञानपूर्वकाणिखलुधर्माधर्माज्ञानवै
राग्यावैराग्यैश्वर्यानैश्वर्याणि वैराग्यम
पिकेवलंतौष्टिकानामतत्वज्ञानपूर्वकमे
व तत्रतत्वज्ञानंविरोधित्वेनातत्वज्ञानमुच्छि
नत्ति कारणानिवृत्याचसप्तरूपाणिनिव
र्तंतइतिसप्तरूपविनिवृत्ताप्रकृतिः अव
स्थितइतिनिष्क्रियः सुस्थइतिरजस्तमोवृ
त्तिकलुषयाबुद्ध्यासंभिन्नः सात्विक्यातु
वृत्त्यातदाप्यस्यमनाक् संभेदोस्त्येव अन्यथै
वंभूतप्रकृतिदर्शनानुपपत्तेरिति स्यादे
तत् निवृत्तप्रसवामितिनमृष्यामहे सं
योगकृतोहिसर्गइत्युक्तम् योग्यात्ताच

संयोगःभोक्तृत्वयोग्यताचपुरुषस्यचैतन्य
म् भोग्यत्वयोग्यताचप्रकृतेर्जडत्वंविषय
त्वंच नचैतयोरस्तिनिवृत्तिः तज्जातीय
स्यान्यस्यकरणीयत्वात्पुनःपुनःशब्दाद्युप
भोगवदित्यतआह दृष्टामयेत्युपेक्षकए
कोदृष्टाहमित्युमित्युपरमत्यन्या सतिसं
योगेपितयोः प्रयोजनंनास्तिसर्गस्य ६६
करोतुनामपौनःपुन्येनशब्दाद्युपभोगंप्रकृ
तिर्ययाविवेकख्यातिर्नकृतेति कृतविवे
कख्यातिस्तुशब्दाद्युपभोगंनजनयति
अविवेकख्यातिनिर्वंधनोहितदुपभोगोनि
र्वंधनाभावेनभवितुमर्हति अंकुरइवावी
जाभावे प्राकृताहिसुखदुःखमोहात्मनः

शब्दादीस्तदविवेकान्ममैतदित्यभिमन्यमा
८७ 87 न आत्मा भुंजीत एवंविवेकख्यातिमपिप्रा
कृतीमविवेकादेवात्मा मदर्थेयमिति मन्यते
उत्पन्नविवेकख्यातिस्तु तत्संसर्गान्न श
ब्दादीन्भोक्तुमर्हति नापि विवेकख्यातिं
प्राकृतीं कर्तुं ततो विविक्त आत्मा न सार्थम
भिमंतुमर्हति पुरुषार्थौ च भोगविवेकौ
प्रकृत्यारंभप्रयोजकाविस्य पुरुषार्थौ सं
तौ न प्रकृतिं प्रयोजयतः तदिदमुक्तं प्रयो
जनं नास्ति सर्गस्येति अत्र प्रयुज्यते सर्गे
प्रकृतिरनेनेति प्रयोजनम् तद्पुरुषा
र्थत्वेनास्तीत्यर्थः स्यादेतत् उत्पन्नतत्व
साक्षात्कारस्य दर्शने तदेवमुक्तस्य तस्य शरीर

पातः स्यादिति कथमदेहः प्रकृतिं पश्येत्
अथ तत्त्वज्ञानेपि न मुच्यते कर्मणामप्रक्षी
णत्वात् तेषां कुतः प्रक्षयः भोगादिति
चेत् हंत भोन तत्त्वज्ञानं मोक्षसाधनमि
ति व्यक्ताव्यक्तज्ञविज्ञानजन्मना तत्त्व
ज्ञानेनापवर्ग इति रिक्तं वचः भोगेन चाप
रिसंख्येयः कर्माशयप्रचयो नियतविपा
कसमयः क्षेतव्यः ततश्चापवर्गप्राप्तिरि
त्यपि मनोरथमात्रमित्यत आह सम्यग्
ज्ञानाधिगमाद्धर्मादीनामकारणप्राप्तौ
तिष्ठति संस्कारवशाच्चक्रभ्रमिवद्धृत
शरीरः ६७ तत्त्वसाक्षात्कारोदयादे
वानादिरप्यनियतविपाककालोऽपि

मीशयप्रचयोऽदग्धबीजभावतया नजा
८८ त्यायुर्भोगलक्षणायफलायकल्प्यते
४६ क्लेशसलिलावसिक्तायांहिबुद्धिभूमौ
कर्मबीजान्यंकुरंप्रसुवते तत्वज्ञाननिदा
घनिपीतसकलक्लेशसलिलायामूष
रायांकुतः कर्मबीजानामंकुरप्रसवः
तदिदमुक्तं धर्मादीनामकारणप्राप्ता
विति अकारणत्वप्राप्ताविस्यर्थः उ
त्पन्नतत्वज्ञानोपिचसंस्कारवशात्तिष्ठति
यथोपरतेपिकुलालव्यापारेचक्रेवेगा
ख्यसंस्कारवशाद्भ्रमतीति ष्ठतिकालप
रिपाकात्तूपरतेसंस्कारेनिःक्रियंभव
ति शरीरस्थितौचप्रारब्धपरिपाको

धर्माधर्मौसंस्कारः यथाचानुभूयतेभोगे
नतितरेक्षपयित्वाथसंपद्यतइतितावदे
वास्यचिरंयावन्नविमोक्ष्येथसंपत्स्यइतिच
प्रक्षीयमाणाविद्यासंस्कारावशेषश्चसंस्का
रः तद्वशात्तत्सामर्थ्याद्धृतशरीरस्तिष्ठति
स्यादेतत् यदिसंस्कारशेषाद्धृतशरीरस्ति
ष्ठति तथापिकदास्यमोक्षोभविष्यतीत्य
तआह प्राप्तेशरीरभेदेचरितार्थत्वात्प्र
धानविनिवृत्तौ ऐकांतिकमात्यंतिकमु
भयंकैवल्यमाप्नोति ६८ अनारब्ध
विपाकानांतावत्कर्माशयानांतत्त्वज्ञा
नाग्निनाबीजभावेदग्धः प्रारब्धविपा
कानांतूपभोगेनक्षयेसतिप्राप्तेशरीरभे

द्देविनाशे चरितार्थत्वात्कृतप्रयोजनत्वा
८१ 81 त्प्रधानस्य तं पुरुषं प्रति निवृत्तौ वैकांतिकम
वश्यंभावि आत्यंतिकमविनाशी ह्युभयं
कैवल्यं दुःखत्रयविगमं प्राप्नोति पुरुषः
प्रमाणोपपादितेप्यस्यंतस्य श्रद्धोत्पादना
य परमर्षिपूर्वकत्वमाह पुरुषार्थज्ञा
नमिदं गुह्यं परमर्षिणा समाख्यातम्
स्थित्युत्पत्तिप्रलयाश्चिंत्यंते यत्र भूताना
म् ६९ गुह्यं गुहानिवासि स्थूलधि
यां दुर्बोधमिति यावत् परमर्षिणा क
पिलेन तामेव श्रद्धामागमिकत्वेन द्रढ
यति स्थित्युत्पत्तिप्रलयाश्चिंत्यंते यत्र
भूतानाम् यत्र ज्ञाने यदर्थं यथा वर्मणि

द्वीपिनंहंति भूतानां प्राणिनांस्थिसुसत्ति
प्रत्यया आगमैर्ग्रिंसंते स्यादेतत् यस
रमर्षिणासाक्षात्कथितंतच्छ्रद्धीमहिय
सुनरीश्वरकृष्णेनकथितं तत्रकुतः श्रद्धे
सत आह एतत्पवित्रमग्र्यंमुनिरासुरये
नुकंपयाप्रददौ आसुरिरपिपंचशिखा
यतेनचबहुधाकृतंतंत्रम् ७० ए
तत्पवित्रंपावनंदुःखत्रयहेतोः पाप्मनः पु
नातीति अग्र्यंसर्वेभ्यः पवित्रेभ्योमुख्यं
मुनिः कपिलआसुरयेनुकंपयाप्रददौ
आसुरिरपिपंचशिखायतेनचबहुधाकृ
तंतंत्रम् शिष्यपरंपरयागतमीश्वरकृ
ष्णेनचैतदार्याभिः संक्षिप्तमार्यमतिना

संम्यग्विज्ञायसिद्धांतम् ७१ आरा
९० ५० घात्तातत्वेभ्यइस्सार्या आर्यामतिर्यस्य
सोयमार्यमतिरिति एतच्चशास्त्रं स
कलशास्त्रार्थसूचकत्वात् नतुप्रकर
णमित्याह सप्तसांकिलयेर्थास्तेर्थाः कृ
त्स्नस्यषष्ठितंत्रस्य आख्यायिकावि
रहिताः परवादविवर्जिताश्चापि ७२
तथाचराजवार्त्तिकम् प्रधानास्तित्वमे
कत्वमर्थवत्वमथान्यता पारार्थ्यंचत
थानैक्यंवियोगोयोगएवच १ शे
षवृत्तिरकर्तृत्वंमौतिकार्थास्मृतादश
विपर्ययःपंचविधस्तथोक्तानवतुष्टयः
२ करणानामसामर्थ्यअष्टाविंशति

धामतम् इतिषष्टिः पदार्था नामष्टभिः
९१ सहसिद्धिभिरिति २ सेयंषष्टिपदार्थी ह
कथितेतिसकलशास्त्रार्थकथनान्नेदंप्र
करणमपितुशास्त्रमेवेदमिति सिद्धम् एकत्वम
र्थवत्त्वंपारार्थ्यंचप्रधानमधिकृत्योक्तम्
अन्यत्वमकर्तृत्वंबहुत्वंचेतिपुरुषमधिकृ
त्य अस्तित्वंयोगोवियोगश्चेत्युभयम
धिकृत्य स्थितिरितिस्थूलसूक्ष्ममधिकृ
त्य मनांसिकुमुदानीवबोधयन्तीसतां
सदा श्रीवाचस्पतिमिश्राणां कृतिस्त
त्त्वकौमुदी १ इतिश्रीवाचस्पति
मिश्रविरचितासांख्यतत्त्वकौमुदीस
माप्ता ॥ १॥ ॥

२१

९१

नं० ६४९-घ
योगसूत्रवृत्तिः
पत्राणि १०८
२०८

पा०सू०वृ०   श्रीगणेशायनमः ॐनमःपरमात्मने देहा
१   र्धयोगःशिवयोःसश्रेयांसितनोतुवःदुःप्रापमी
पियत्स्मृत्याजनःकैवल्यमश्नुते १ त्रिविधा
न्यपिदुःखानियदनुस्मरणान्नृणां प्रध्यांतिस
द्योविलयंतंस्तुमःशिवमव्ययं २ पतंजलि
मुनेरुक्तिःकाप्यपूर्वाजयत्यसौ पुंप्रकृत्योर्वि
योगोपियोगइत्युदितोयया ३ जयंतुवाचः
फणिभर्तुरंतरस्फुरत्तमःस्तोमनिशाकरत्विषः
विभाव्यमानाःसततंमनांसियासतांसदानं
दमयानिकुर्वते ४ शब्दानामनुशासनंवि
दधतापातंजलेकुर्वतावृत्तिंराजमृगांकसंज्ञ
कमपिव्यातन्वतावैद्यके वाक्चेतोवपुषांम
लःफणिभृतांभर्त्रेवयेनोद्धृतस्तस्यश्रीरण

रंगमल्लनृपतेर्वाचोजयंत्युज्ज्वलाः ५ दुर्बोधं
यदतीवतद्विजहतिस्पष्टार्थमित्युक्तिभिःस्प
ष्टार्थेष्वतिविस्तृतिंविदधतिव्यर्थैःसमासादि
कैः अस्थानेऽनुपयोगिभिश्चबहुभिर्जल्पैर्भ्र
मंतन्वतेश्रोतॄणामितिवस्तुविप्लवकृतः प्रा
येणटीकाकृतः ६ उत्सृज्यविस्तरमुद
स्यविकल्पजालंफल्गुप्रकाममवधार्य्यवि
चार्य्यजातं संतःपतंजलिमतेविवृत्तिर्मये
यमातन्वतेबुधमनःप्रतिबोधहेतुः ७
अथयोगानुशासनं १ अनेनसूत्रेणशा
स्त्रस्यसंबंधाभिधेयप्रयोजनानिव्याख्यायं
ते अथशब्दोऽधिकारद्योतकोमंगलार्थ
श्च युनक्तियोगःसमाधानं युजूसमाधौ

2 अनुशिष्यते व्यायते लक्षणस्वरूपभेदो
पायफलैर्येन तदनुशानं योगस्यानुशा
सनं योगानुशासनम् तदा शास्त्रपरिसमा
प्तेरधिकृतं वेदितव्यमित्यर्थः तत्र शास्त्र
स्य व्युत्पाद्यतया योगः समाधनः सफलो
ऽभिधेयः तत्र व्युत्पादनं च फलम् व्युत्पा-
दितस्य योगस्य कैवल्यं फलं शास्त्राभिधे
ययोः प्रतिपाद्यप्रतिपादकभावलक्षणः
संबंधः अभिधेयस्य योगस्य तत्फलस्य
कैवल्यस्य च साध्यसाधनभावः एतदुक्तं-
भवति व्युत्पाद्यस्य योगस्य साधनानि शा
स्त्रेण प्रदर्श्यंते तत्साधनसिद्धो योगः कै २
वल्याख्यं फलं उत्पादयतीति तत्र को-

योगइत्यत आह योगश्चित्तवृत्तिनिरोधः
२ चित्तस्यनिर्मलसत्वपरिणामरूपस्य
याःवृत्तयोंगांगिभावपरिणामरूपास्तासां
निरोधोबहिर्मुखपरिणतिविछेदांदंतर्मु
खतयाप्रतिलोमपरिणामेनखकारणे
लयोयोगइत्याख्यायते सचनिरोधः स
र्वासांचित्तभूमीनांसर्वप्राणिनांधर्मः कदा
चित्कस्यांचिद्भूमावाविर्भवति ताश्चक्षि
प्तंमूढविक्षिप्तमेकाग्रंनिरुद्धमितिचि
तस्यभूमयः चितस्यावस्थाविशेषाः त
त्रक्षिप्तंरजसउद्रेकादस्थिरंबहिर्मुखत
यासुखदुःखादिविषयेषुविकल्पितेषु
व्यवहितेषुसन्निहितेषुवारजसाप्रेरित

म् तच्चसदैव दैत्यदानवानां मूढंतमसमुद्रे
कात्कृत्याकृविभाग मगणयत् क्रोधा
दिभिर्विरुद्धकृत्येष्वेवनियमितं तच्चस
दैवरक्षः पिशाचादीनाम् विक्षिप्तंतुसत्वो
द्रेकाद्वैशिष्टेनपरिहृत्यदुःखसाधनंसु
खसाधनेष्वेवशदादिषुप्रवृत्तं तच्चसदैव
देवतादीनां एतदुक्तंभवति रजसाप्रवृत्तिरू
पंतमसापरापकारनिरनिरतम् सत्वेनसु
खमयंचित्तंभव तीतिएतास्तिस्रश्चितावस्
स्थानसमाधावुपयोगिन्यः एकाग्रनिरु
द्धरूपेद्वेचसत्वोत्कर्षाद्यथोत्तरमवस्थित
त्वात्समाधावुपयोगंभजेतेसत्वादिक्रम
व्युत्क्रमेत्वयमभिप्रायः द्वयोरपिरजस्त

मसोरत्यंतहेयत्वेप्येतदर्थंरजसःप्रःथम
पादानंयावन्नप्रवृत्तिदर्शितातावन्निवृत्तिर्न
शक्यतेदर्शयिमिति द्वयोर्व्यत्ययेनप्रदर्श
नं सत्वस्यत्वेतदर्थंपश्चात्प्रदर्शनम् यत्त
स्योत्कर्षेणोत्तरेद्वेभूमीयोगोपयोगिन्यावि
ति अनयोर्द्वयोरेकाग्रनिरुद्धयोर्भूमिक
योर्यश्चित्तस्यैकाग्रतारूपपरिणामः स
योगः किमुक्तंभवति एकाग्रेवहिर्वृतिनि
रोधः निरोधेचसर्वासांवृत्तीनांतत्संस्कारा
णांप्रविलययइत्यनयोरेवभूम्योर्योगस्यसं
भवः इदानींसूत्रकारश्चित्तवृत्तिनिरोधप
दानिव्याख्यातुंकामः प्रथमंचित्तपदंव्या
चष्टेसूत्रद्वयेन तदाद्रष्टुःस्वरूपेवस्थान

म् ३ द्रष्टुः पुरुषस्य तस्मिन्काले स्वरूपे चि
न्मात्ररूपतायामवस्थानं स्थितिर्भवति अ
यमर्थः उत्पन्नविवेकख्यातेश्चित्तसंक्रमाभा
वात् कर्तृत्वाभिमानिवृत्तौ प्रोन्मुक्तपरिणा-
मायां बुद्धावात्मनः स्वरूपेवस्थानं स्थितिर्भव
तीति व्युत्थानदशायां तस्य किंरूपमित्याह
वृत्तिसारूप्यरूप्यमितरत्र ४ इतरत्र योगा
दन्यस्मिन्काले वृत्तयो या वक्ष्यमाणलक्षणाः
ताभिः सारूप्यं तद्रूपत्वम् अयमर्थः यादृशो
वृत्तयः सुखदुःखमोहात्मिकाः प्रादुर्भवंति
तादृद्रूप एव संपद्यतेभवहर्तृभिः पुरुषः ।
तदेवं यस्मिन्नेकाग्रतया परिणते विविक्ते
स्वस्मिन्रूपे प्रतिष्ठितो भवति यस्मिंश्चै-

द्रियवृत्तिद्वारेणाविषयाकारेणपरिणमतेपु
रुषस्तदाकारइवपरिभाव्यते यथाजलतरं
गेषुचलत्सुतत्स्थश्चंद्रश्चलन्निवभासतेत
च्चित्तंवृत्तिपदंव्याख्यातुमाह वृत्तयःपंचतय्
यःक्लिष्टाऽक्लिष्टाः ५ वृत्तयःश्चित्तस्यप
रिणामविशेषाःवृत्तिसमुदायरूपस्यावय
विनोयाअवयवरूपावृत्तयस्तदपेक्षयात
पप्रयःत्यएतदुक्तंभवतिपंचवृत्तयः कीदृश्यः
क्लिष्टाअक्लिष्टाःक्लेशैर्वक्ष्यमाणलक्ष
णैराक्रांताःक्लिष्टाःतद्विपरीताअक्लेष्टाः
॥ताएवपंचवृत्तयःसमुद्दिश्यव्याख्यायंते
॥प्रमाणंविपर्ययविकल्पनिद्रास्मृतयः ६
आसांक्रमेणलक्षणमाह प्रत्यक्षानुमाना

यो·सू·वृ·
५ 5

गमाः प्रमाणानि ७ अत्रातिप्रसिद्धत्वात्प्र
माणानांशास्त्रकारेणभेदनिरूपणोनैवावग
तत्वात्तल्लक्षणस्यनपृथक्लक्षणंकृतम् प्र
माणलक्षणंतु अविसंवादिज्ञानंप्रमाणंइं
द्रियद्वारेणवाह्यवस्तूपरागाच्चित्तस्यतस्य
तद्विषयसामान्यविशेषात्मनोर्थस्यविशे-
षावधारणप्रधानावृत्तिः प्रत्यक्षं गृहीतसं
बंधाल्लिंगाल्लिंगिनिसामान्यात्मनाध्यवसा
योऽनुमानं आप्तवचनमागमः एवंप्रमाणारू
पांवृत्तिंव्याख्यायविपर्ययरूपामाह विपर्य्य-
योमिथ्याज्ञानमतद्रूपप्रतिष्ठम् ८ अतथा
भूतेर्थेतथोत्पद्यमानंज्ञानंविपर्ययः यथाशु
क्तिकायांरजतज्ञानम् अतद्रूपप्रतिष्ठमि

अतद्रूपप्रतिष्ठमिति तस्यार्थस्य यद्रूपं न त
स्मिन्रूपे प्रतिष्ठति तस्यार्थस्य यत्पारमा
र्थिकं रूपं न तत्प्रतिभासयतीति यावत् संश
योप्यतद्रूपप्रतिष्ठत्वान्मिथ्याज्ञानम् यथा
स्थाणुर्वा पुरुषो वेति विकल्पवृत्तिं व्याख्या
तुमाह शब्दज्ञानानुपाती वस्तुशून्यो विक
ल्पः ९ शब्दजनितं ज्ञानं शब्दज्ञानं तदनु
पतितुं शीलं यस्य स शब्दज्ञानानुपाती वस्तु
नस्तथात्वमनपेक्षमाणोऽध्यवसायः स
विकल्प इत्युच्यते यथा पुरुषस्य चैतन्य
स्वरूपमिति अत्र देवदत्तस्य कंबल इ ति
वत् शब्दजनिते ज्ञाने मिसत्र षष्ठ्यायोऽ
ध्यवसितो भेदस्तमिहाविद्यमानमपि स

मारोप्यप्रवर्ततेऽध्यवसायः वस्कतःचैतन्य
मेवपुरुषः निद्राव्याख्यातुमाह अभावप्रत्य
यालंवनावृत्तिर्निद्रा १० अभावप्रत्ययआ
लंवनंयस्याःवृत्तेःसातथोक्ता एतदुक्तंभव
ति यासंततमुद्रिक्तत्वात्तमसः समस्तविष
य परित्यागेनप्रवर्त्ततेवृर्त्तिःसानिद्रा अस्या
श्चसुखमहमस्वाप्समितिस्मृतिदर्शनात्॥
स्मृतेश्चानुभवव्यतिरेकेणानुपपत्तेर्वृत्तिवं
स्मृतिंव्याख्यातुमाह अनुभूतविषयासंप्रमो
षःस्मृतिः ११ प्रमाणेनानुभूतस्यविषयस्य
योयमसंप्रमोषंसंस्कारद्वारेणवुद्धावुपारो
हसास्मृतिः तत्रैप्रमाणविपर्ययविकल्पाजा
ग्रदवस्था तएवयदानुभववलात्सक्षाय

माणाः सस्वप्नः निद्रात्वसंवेद्यमानविषया
स्मृतिश्च प्रमाणविपर्ययविकल्पनिद्रानिमित्ता
एवं वृत्तीर्व्याख्याय तासां निरोधोपायं व्याख्यातु
माह अभ्यासवैराग्याभ्यां तन्निरोधः १२ अ
भ्यासवैराग्ये वक्ष्यमाणलक्षणे ताभ्यां प्रकाश
प्रवृत्तिनियमनरूपाणां चित्तवृत्तीनां यस्वताऽनं
हननं समिरोधः किमुक्तं भवति तासां विनिवृ
त्तवाह्याभिनिवेशानामंतर्मुखतया स्वकार
ण एव चित्ते चित् शक्तिरूपतयावस्थानं तत्र
विषयदोषदर्शनजेन वैराग्येण तद्वैमुख्यमु
त्पाद्यते अभ्यासेन सुखजनकं शांतप्रत्ययप्र
वाहप्रदर्शनद्वारेण दृढं स्थैर्य्यमुत्पाद्यते इ
साभ्यां भवति चित्तवृत्तिनिरोधः अभ्यासं

व्याख्यातुमाह तत्रस्थितौयत्नोभ्यासः १३
वृत्तिरहितस्यचित्तस्यस्वरूपनिष्ठः परिणामः
स्थितिः तस्यांयत्नउत्साहः पुनः स्तथात्वेनचे
तसिनिवेशनमभ्यासइत्युच्यते तस्यैवविशेष
माह सतुदीर्घकालनैरंतर्य्यसत्कारासेवितो
दृढभूमिः १४ वहुकालंनैरंतर्य्येणादरा
तिशयेनचसेव्यमानोदृढभूमिः स्थिरोभवति
दार्ढ्यायप्रभवतीत्यर्थः वैराग्यस्यलक्षण
माह दृष्टानुश्रविकविषयवितृष्णस्यवशी
कारसंज्ञावैराग्यम् १५ द्विविधोविष
योदृष्ट आनुश्रविकश्चदृष्टइहैवोपलभ्यमा
नः शब्दादिः देवलोकादावानुश्रविकः
अनुश्रूयतेगुरुमुखादित्यनुश्रवोवेदः तत

आगतः आनुश्रविकः तयोर्द्वयोरपिविषय
योःपरिणामविरसत्वदर्शनाद्विगतगर्द्धस्यया
वशीकारसंज्ञा ममैतेवश्यानाहमेतेषांवश्या
इतियोयंविमर्शस्तद्वैराग्यमुच्यते तस्यैवशेष
माह तत्परंपुरुषख्यातेर्गुणवैतृष्ण्यं १६ त
द्वैराग्यंपरंउत्कृष्टं प्रथमंवैराग्यंविषयविष
यं द्वितीयंगुणविषयमुत्पन्नंगुणपुरुषवि
वेकख्यातेरेवभवति निरोधसमाधेरत्यंता
नुकूलत्वात् एवंयोगस्यस्वरूपमुक्त्वा संप्रज्ञा
ताऽसंप्रज्ञातस्वरूपभेदमाह वितर्कविचा
रानंदास्मितानुगमात्संप्रज्ञातः १७ स
माधिरितिशेषः सम्यक्संशयविपर्ययर
हितत्वेनप्रज्ञायतेप्रकर्षेणज्ञायतेभाव्य

स्वरूपंयेनसंप्रज्ञातः समाधिर्भावनाविशेषः
सवितर्कादिभेदाच्चतुर्विधः सवितर्कः सविचारः
सानंदः सास्मितश्चेति भावनाभाव्यस्यविषयां
तरपरिहारेणचेतसिपुनः पुनर्विनिवेशनं
भाव्यंचद्विविधंईश्वरस्तत्वानिच तान्यपिचद्वि
धाजडाजडभेदात् जडानिचतुर्विंशतिः अ
जडः पुरुषः तत्रयदामहाभूतेंद्रियाणिस्थूला
निविषयत्वेनापूर्वापरानुसंधानेनशब्दार्थो
ल्लेखसंभेदेनभावनाप्रवर्त्ततेतदासवितर्कः
समाधिः अस्मिन्नेवालंबनेपूर्वापरानुसंधा
नशब्दार्थोल्लेखशून्यत्वेनयदाभावनाप्रवर्त्त
तेतदानिर्वितर्कःसमाधिःतन्मात्रांतःकरण
लक्षणंसूक्ष्मंविषयमालंब्यतस्यदेशकाल

धर्मावछेदेनयदाभावनाप्रवर्त्ततेतदासविचारः
तस्मिन्नेवावलंवनेदेशकालधर्मावछेदंविनाध
र्मिमात्रावभासित्वेनभावनाक्रियमाणानिर्विचार
इत्युच्यते एवंपर्यंतःसमाधिर्ग्राह्यसमापत्ति
रितिव्यपदिश्यते यदातुरजस्तमोलेशानुवि
द्धमंतःकरणःसत्वंभाव्यतेतदागुणभावा
च्चिच्छक्तेः सुखप्रकाशमयस्यसत्वस्यभाव्यमा
नस्योद्रेकोत्सानंदः समाधिर्भवति अस्मि
न्नेवसमाधौयेवद्धधृतयस्तत्वांतरंप्रधानपु
रुषरूपंनपश्यंति तेविगतदेहाहंकारत्वा
द्विदेहशब्दवाच्याः इयंग्रहणसमापत्तिः
ततःपरंरजस्तमोलेशानभिभूतंशुद्धंसत्वमा
लंवनीकृत्ययाप्रवर्त्ततेभावनातस्याग्राह्य

यो·सू·वृ· स्यसत्वस्यान्यकुभावाद्विच्छन्नेरुद्रेकात्सत्तामा
९ त्रावशेषत्वेनसमाधिःसास्मितइत्युच्यते न
चाहंकारास्मितयोरभेदःशंकनीयः यतोय
त्रांतःकरणमहमित्युल्लेखेनविषयान्वेदय
तेसोहंकारः यत्रांतर्मुखतयाप्रतिलोमपरि
णामेनप्रकृतिलीनेचेतसिसत्तामात्रमवभाती
तिसास्मितः अस्मिन्नेवसमाधौयेकृतपरि
तोषाःपरमात्मानंपुरुषंनपश्यंति तेषांचे
तसिस्वकारणेलयमुपगते तेप्रकृतिलया
इत्युच्यंते येपरंपुरुषंज्ञात्वाभावनायांप्रवर्त्तं
तेतेषामियंविवेकख्यातिर्ग्रहीतसमापत्ति
रित्युच्यते तत्रसवितर्कसमाधौचतस्रोप्य
स्याःशक्तिरूपतयावतिष्ठंते ततःएकै

कस्याःत्यागउत्तरोत्तरइतिचतुरवस्थोयंसंप्र
ज्ञातःसमाधिःअसंप्रज्ञातमाह विरामप्रत्य
याभ्यासपूर्वकःसंस्कारशेषोन्यः १८ विर
म्यतेऽनेनेतिविरामःवितर्कादिचिंतात्यागः
विरामश्चासौप्रत्ययश्चविरामप्रत्ययः तस्या
भ्यासःपौनःपुण्येनचेतसिविनिवेशनं तत्र
याकचिद्वृत्तिरुल्लसतितस्याः नेतिनेतीति
नैरंतर्य्येणपर्युदसनं विरामप्रयाभ्यासः
तत्पूर्वकोसंप्रज्ञातसमाधेःसंस्कारशेषो
न्यः तद्विलक्षणोऽसंप्रज्ञातसमाधिरित्य
स्यार्थः नतत्रकिंचिद्वेद्यंसंप्रज्ञायतेइत्यसं
प्रज्ञातोनिर्बीजःसमाधिः इहचतुर्विधः
चित्तस्यपरिणामः व्युत्थानंसमाधिप्रारं

भः एकाग्रतानिरोधश्चतत्रक्षिप्तमूढचितभूमी
व्युत्थानंविक्षिप्तभूमीः सत्वोद्रेकात्समाधि
प्रारंभः एकाग्रतानिरुद्धेतुपर्यंतंभूमी प्र
तिपरियामंचसंस्कारः तत्रव्युत्थानजनिताः
संस्काः समाधिप्रारंभजैः संस्कारैर्हन्यंते
तज्जाश्चैकाग्रताजैर्निरोधजनितैरेकाग्र
ताजाः संस्काराः स्वरूपंचहन्यंते यथासु
वर्णसंवलितंध्यायमानंसीसकमात्मानंसु
वर्णमलंचनिर्दहति एवमेकाग्रताजनि
तान्संस्कारान्निरोधजाः स्वात्मानंचनिर्दहं
ति तदेवंयोगस्यस्वरूपंभेदंचसंक्षेपेणो
पायंचाभिधायविस्तरेणोपायंयोगाभ्यास
प्रदर्शनपूर्वकंवक्तुमुपक्रमते भवप्रत्ये

योविदेहप्रकृतिलयानाम् १९ विदेहाः
प्रकृतिलयाश्चवितर्कादिभूमिकास्तत्रैव्या
ख्याताः तेषांसमाधिर्भवप्रत्ययः भवःसंसा
रःसएवप्रत्ययःकारणंयस्यसभवप्रत्ययः
अयमर्थः आविर्भूतमात्रएवसंसारेतेतथा
विधसमाधिभाजोभवंति तेषांपरतत्वाऽ
दर्शनाद्योगाभासोयं अतःपरतत्वज्ञानेतद्भा
वनायांचमुक्तिकामेनमहान्यत्नोविधेयइ
सेतदर्थमुद्दिष्टंतदन्येषामुतु श्रद्धावीर्यस्
मृतिसमाधिप्रज्ञापूर्वकइतरेषाम् २०
विदेहप्रकृतिलयव्यतिरिक्तानांयोगिनां श्र
द्धादयः पूर्वेउपायायस्यसश्रद्धादिपूर्वकः
तेचश्रद्धादयःक्रमादुपायोपेयभावेनप्रव

र्तमानाः संप्रज्ञातस्यसमाधेरुपायतांप्रतिप
द्यंते तत्रश्रद्धायोगविषयेचेतसः प्रसादः
वीर्य्यमुत्साहः स्मृतिरनुभूतानामसंप्रमोषः
समाधिरेकाग्रताप्रज्ञाज्ञातव्यस्यविवेकः
तत्रश्रद्धावतोवीर्य्यंजायते योगविषयेउ
त्साहवान्भवति सोत्साहस्यपाश्चात्यासुभूमि
षुस्मृतिरुपजायते तत्स्मरणाच्चेतः समा
धीयते समाहितचित्तश्चभाव्यंविवेकेनसम्य
ग्विजानाति तएतेसंप्रज्ञातसमाधेरुपा
याः तस्याभ्यासात्पराच्चवैराग्याद्भवत्यसं
प्रज्ञातः उक्तोपायवतांयोगिनामुपायभे
देदानाह तीव्रसंवेगानामासन्नः २१
समाधिलाभइतिशेषः संवेगः क्रियाहे

तुदृढतरः संस्कारः सतीव्रोयेषामधिमात्रो
पायानांतेषामासन्नः समाधिः समाधिर्लाभः
समाधेः फलंचासन्नंभवतिशीघ्रमेवनिष्पद्य
तेइत्यर्थः केतेतीव्रसंवेगाइत्यतआह मृदु
मध्याधिमात्रत्वात्ततोपिविशेषः २२ तेभ्य
उपायेभ्योमृद्वादिभेदभिन्नेभ्यउपायवतां
विशेषोभवति मृदुमध्याधिमात्रइत्युपा
यभेदाः तेष्वेकैकंमृदुसंवेगमध्यसंवेगती
व्रसंवेगभेदात्त्रिविधा तद्भेदेननवयोगि
नोभवंति मृदूपायोमृदुसंवेगः मध्यसंवे
गः तीव्रसंवेगश्च मध्योपायोमृदुसंवेगोम
संवेगस्तीव्रसंवेगश्च अधिमात्रोपायोमृ
दुसंवेगोमध्यसंवेगस्तीव्रसंवेगश्च अधि

यो॰सू॰वृ॰ मात्रोपायेतीव्रसंवेगेमहान्यत्नःकर्त्तव्यइ
१२ तिभेदोपदेशः इदानीमेतदुपायविलक्षणं
सुगममुपायांतरमाह ईश्वरप्रणिधानाद्वा
२३ ईश्वरोवक्ष्यमाणलक्षणः प्रणिधानं
तत्रभक्तिविशेषः विशिष्टमुपासनंसर्वक्रि
याणामपितत्रार्पणं विषयसुखादिकंफल
मनिछन्सर्वाःक्रियास्तस्मिन्परमगुरा
वर्पयति तत्प्रणिधानं समाधेस्तत्फलला
भस्यचप्रकृष्टउपायः ईश्वरस्यप्रणिधाना
त्समाधिर्लाभइत्युक्तं तत्रेश्वरस्यस्वरूपं
प्रमाणंप्रभाववाचकमुपासनाक्रमंतत्फलं
चक्रमेणवक्तुमाह क्लेशकर्म्मविपाकाश
यैरपरामृष्टःपुरुषविशेषईश्वरः २४

क्लिश्यंतीति क्लेशाः अविद्यादयो वक्ष्यमाणाः
विहितप्रतिषिद्धव्यामिश्ररूपाणि कर्माणि वि
पच्यंत इति विपाकाः कर्मफलानि जात्यायु
र्भोगाः आफलविपाकाच्चित्तभूमौ शेरत इत्या
शया वासनाख्याः संस्कारास्तैरपरामृष्टस्त्रिष्वपि का
लेषु न संस्पृष्टः पुरुषविशेषः अन्येभ्यः पुरुषे
भ्यो विशिष्यत इति विशेषः ईशनशीलः इच्छा
मात्रेण सकलजगदुद्धरणक्षमः यद्यपि सर्वेषा
मात्मनां क्लेशादिस्पर्शो नास्ति तथापि चित्तगत
स्तेषामुद्दिश्यते यथा योद्धृगतौ जयपराज
यौ स्वामिनः अस्य तु त्रिष्वपि कालेषु तथा
विधोपि क्लेशादिपरामर्शो नास्तीत्यतः स
विलक्षण एव भगवानीश्वरः तस्य च तथा

यो॰ सू॰ वृ॰ १३ 13

विधमैश्वर्य्यमनादेः सत्वोत्कर्षात् सत्वोत्क
र्षात् सत्वोत्कर्षश्चास्य प्रकृष्टज्ञानादेव न चान
योर्ज्ञानैश्वर्ययोरितरेतराश्रयत्वं परस्परान
पेक्ष्यत्वात्ते ज्ञानैश्वर्य्ये ईश्वरसत्वे वर्त्तमाने
अनादिभूते तेन च तथाविधेन सत्वेन तस्या
नादिरेव संबंधः प्रकृतिपुरुषसंयोगवि
योगयोरीश्वरेच्छाव्यतिरेकेयानुपपत्तेः
यथेतरेषां प्राणिनां सुखदुःखमोहतया प
रिणतं चित्तं निर्म्मले सात्विके धर्म्मात्मत्वे
योगिशरीरे प्रतिसंक्रांतं चिच्छायासंक्रांतेः
संवेद्यं भवति नैवमीश्वरस्य तस्य च केवल
एव सात्विकः परिणाम उत्कर्षवाननादिसं
बंधेन भोग्यतया व्यवस्थितः अतः पुरुषां

तरविलक्षणतयासएवेश्वरः मुक्तात्मनांपुनः
क्लेशादियोगस्तैस्तैः शास्त्रोक्तैरुपायैर्निर्वर्तितः
अस्यपुनः सर्वदैवतथात्वान्नमुक्तात्मतुल्य
त्वं नचेश्वराणामनेकत्वं तेषांतुल्यत्वेभिन्ना
अभिप्रायत्वात्कार्यस्यैवानुपपत्तेरुत्कर्षाप
कर्षत्वेन चयएवोत्कृष्टः सएवेश्वरस्तत्रैवका
ष्ठाप्राप्तत्वादीश्वरस्य एवमीश्वरस्यस्वरूपम
भिधायप्रमाणमाह तत्रनिरतिशयंसर्वज्ञत्व
बीजम् २५ तस्मिन्भगवतिसर्वज्ञत्वस्ययद्बी
जं अतीताऽनागतादिग्रहणस्याऽल्पत्वंमहत्वं
चात्तन्मूलत्वाद्बीजमिवबीजंतत्तत्रनिरतिश
यंकाष्ठाप्राप्तं दृष्टाह्यल्पत्वमहत्वादीनां
धर्माणांसातिशयानांकाष्ठाप्राप्तिर्यथापर

माणावल्पत्वस्याऽकाशेपरममहत्वस्य एवं
ज्ञानादयोपिचित्तधर्म्मास्तारतम्येनपरिदृश्य
मानाः क्वचिन्निरतिशयतामापादयंति य
त्रैवैतेनिरतिशयाः सईश्वरः यद्यपिसामान्य
मात्रेऽनुमानस्यपर्यवस्थितत्वान्नविशेषावग
तिःसंभवति तथापिशास्त्रादस्यसर्वज्ञत्वाद
योविशेषाअवगंतव्याः तस्यचस्वप्रयोज
नाभावेकथंप्रकृतिपुरुषयोः संयोगवि
योगावापादयतीतिनाशंकनीयं तस्यका
रुणिकत्वाद्भूतानुग्रहएवप्रयोजनम् क
ल्पप्रलयमहाप्रलयेषुनिःशेषान्संसारि
णउद्धरिष्यामीतितस्याऽध्यावसायः य
द्यस्येष्टंतत्तस्यप्रयोजनमिति एवमीश्वर

स्यप्रमाणमभिधायप्रभावमाह सपूर्वेषाम
पिगुरुः कालेनाऽनवछेदात् २६ आद्यानां
सृष्टृणांब्रह्मादीनामपिसगुरुरुपदेष्टायतः
सकालेननाऽवछिद्यते अनादित्वात्तेषांपु
नरादिमत्वादस्तिकालेनाऽवछेदः एवंप्रभा
वमुक्तोपासनोपयोगायवाचकमाह तस्य
वाचकः प्रणवः २७ इत्थमुक्तस्वरूपस्ये
श्वरस्यवाचकोभिधायकः प्रणवः ओंका
रः तयोश्ववाच्यवाचकभावलक्षणः संबं
धोनित्यः संकेतेनप्रकाश्यते नतुकेनचित्क्रि
यते यथापितृपुत्रयोर्विद्यमानः संबंधोऽ
स्यायंपिताऽस्यायंपुत्रइतिकेनचित्प्रकाश्य
ते उपासनमाह तज्जपस्तदर्थभावनम्

२८ तस्यसार्द्धत्रिमात्रस्यप्रणवस्यजापोयथा
वदुच्चारणं तद्वाच्यस्यचेश्वरस्यभावनंपुनःपु
नश्चेतसिविनिवेशनं एकाग्रताउपायःअ
तःसमाधिसिद्धयेयोगिनांप्रणवोजप्यस्तद
र्थईश्वरश्चभावनीयइत्युक्तंभवति उपास
नायाःफलमाह ततःप्रत्यक्चेतनाधिग
मोप्यंतरायाभावश्च २९ तस्माज्जपात्तद
र्थभावनाच्चयोगिनःप्रत्यक्चेतनाधिगमो
भवति विषयप्रातिकूल्येनस्वांतःकरणा
ऽभिमुखमंचतियाचेतनादृक्शक्तिःसाप्र
त्यक्चेतनातस्याअधिगमोज्ञानंभवति
अंतरायावक्ष्यमाणास्तेषामभावःशक्ति
प्रतिबंधोभवतिअथकेतेंतरायाइत्याशं

कायामाह व्याधिस्त्यानसंशयप्रमादालस्या
विरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थि
तत्वानिचित्तविक्षेपास्तेंतरायाः ३० नवैते
रजस्तमोवशांत्प्रवर्तमानाश्चित्तस्यविक्षेपा
भवंति तैरेकाग्रताविरोधिभिश्चित्तंविक्षि
प्यतइत्यर्थः तत्रव्याधिर्द्धातुवैषम्यनिमि
त्तोज्वरादिः स्त्यानमकर्मण्यताचित्तस्यउभय
कोट्यवलंबनंविज्ञानंसंशयः योगःसाध्यः
स्यान्नवेति प्रमादोननुष्ठानशीलतास
माधिसाधनेषौदासीन्यं आलस्यंकायचि
त्तयोर्गुरुत्वं योगविषयेप्रवृत्त्यऽभावहेतुः
अविरतिःचित्तस्यविषयसंयोगात्गर्द्धः
भ्रांतिदर्शनंशुक्तिकायांरजतवत्विप

यो·सू·वृ
९६
16

येयज्ञानं अलब्धभूमिकत्वं कुतश्चिन्निमि
त्तात्समाधिभूमेरलाभः असंप्राप्तिः अनव
स्थितत्वं तु लब्धायामपि समाधिभूमौ
चित्तस्य तत्राऽप्रतिष्ठा एते समाधेरेकाग्रता
याश्च यथायोगं प्रतिपक्षत्वादंतराया इत्यु
च्यंते चित्तविक्षेपकारकानन्यानप्यंतराया
न्प्रतिपादयितुमाह दुःखदौर्मनस्यांगमेज
यत्वश्वासप्रश्वासाः विक्षेपसहभुवः ३१
कुतश्चिन्निमित्तादुत्पन्नेषु विक्षेपेषु एते दुः
खादयः प्रवर्तंते तत्र दुःखं चित्तस्य राजसः
परिणामः बाधनालक्षणः यद्बाधात्प्राणि
नस्तदुपघाताय प्रवर्तंते दौर्मनस्यं बाह्या
भ्यंतरैः कारणैर्मनसो दौःस्थ्यं अंगमेजय

त्वंसर्वांगीणोवेपथुरासनस्थैर्यस्यबाधकः
प्राणोयद्बाह्यंवायुमाचामतिःसश्वासः
यत्कौष्ठ्यंवायुंनिश्वसितिसप्रश्वासःतएते
विक्षेपैःसहप्रवर्त्तमानाः यथोदिताभ्या
सवैराग्याभ्यांनिरोधव्याइत्येषामुपदे
शः सोपद्रवविक्षेपप्रतिषेधार्थमुपा
यांतरमाह तत्प्रतिषेधार्थमेकतत्वा
भ्यासः ३२ तेषांविक्षेपाणांनिषेधा
र्थमेकस्मिन्कस्मिंश्चिदभिमतेतत्वेऽभ्या
सः चेतसिपुनःपुनर्विनिवेशनंकुर्या
त् यद्बलात्प्रत्युदितायामेकाग्रतायां
विक्षेपाःप्रशमनमुपयांति इदानीं
चित्तसंस्कारपादकंपरिकर्म्मकथनमुपायां

तदमाह मैत्रीकरुणामुदितोपेक्षाणांसुख
दुःखपुण्यापुण्यविषयाणांभावनातश्चि
त्तप्रसादनम् ३३ मैत्रीसौहार्द्दं करुणा
कृपा मुदिताहर्षः उपेक्षाऔदासीन्यं
एतायथाक्रमंसुखिदुःखितेषुपुण्यव
त्स्वपुण्यवत्सुचविभावयेत् तथाहिसुखि
तेषुसाध्वेषांसुखित्वमिति मैत्रींकुर्यान्न
तीर्ष्यां दुःखितेषुकथंनामैषांदुःखवि
मुक्तिःस्यादिति कृपामेवकुर्यात् नताट
स्थ्यं पुण्यवत्सुपुण्यानुमोदनेनहर्षं
कुर्यात् नतुकिमेतेपुण्यवंतइतिविद्वे
षं अपुण्यवत्सुचौदासीन्यमेवभावये
न्नानुमोदनंनद्वेषं सूत्रेसुखदुःखा

दिशब्देस्लदवंत: प्रतिपादिता: तदेवं मैत्र्या
दिपरिकर्मणाप्रसादोयायेनचित्तेप्रसी
दति सुखेनसमाधिराविर्भावोभवति प
रिकर्म्मचैतद्बाह्यंकर्म यथागणितेमि
श्रकादिव्यवहारगणितनिष्पत्तयेसंक
लितादिकर्मोपकारत्वेनप्रधानकर्म्मा
निष्पत्तयेप्रभवति एवंद्वेषरागादिप्रति
पक्षभूतमैत्र्यादिभावनयासमुत्पादि
तप्रसादंचित्तंसंप्रज्ञातादिसमाधियो
ग्यंसंपद्यते रागद्वेषावेवमुख्यतयावि
क्षेपमुत्पादयतः तौचेत्समूलमुन्मूलि
तौस्यातां तदाप्रसन्नत्वान्मनसोभव
त्येकाग्रता उपायांतरमाह प्रच्छर्दनवि

यो·सू·वृ·

१८ 18

धारणाभ्यांवाप्राणस्य ३४ प्रच्छर्दनंकौ
ष्ठस्यवायोः प्रयत्नविशेषान्मात्राप्रमा
णेनवहिर्निःसारणं विधारणंमात्राप्र
माणेनैवप्राणस्यायामोगतिविच्छेदः स
चद्वाभ्यांप्रकाराभ्यांवाह्याभ्यांतरपूरणे
नपूरितस्यवातत्रैवातत्रैवनिरोधेन तदे
वंरेचकपूरककुंभकभेदेनत्रिविधाः प्रा
णायामश्चित्तस्यस्थितिमेकाग्रतायांनि
वध्नाति सर्वासामिंद्रियवृत्तीनांप्राण
वृत्तीपूर्वकत्वान्मनःप्राणयोश्चस्वव्या
पारेपरस्परमेकयोगक्षेमत्वाज्जीयमा
नःप्राणःसमस्तेंद्रियवृत्तिनिरोधद्वारेण
चित्तस्यैकाग्रतायैवप्रभवति समस्तदो

षक्षयकारित्वंचास्यागमेश्रूयते दोषकृ
ताश्चसर्वोविक्षेपस्तन्नयः अतोदोषनिब
र्हणद्वारेणद्वारेणास्यैकाग्रतायांसा
मर्थ्यं इदानीमुपायांतरदर्शनोपक्षेपेण
संप्रज्ञातस्यसमाधेः पूर्वांगंकरोति
विषयवतीवाप्रवृत्तिरुत्पन्नास्थितिनिबं
धिनी ३५ मनसइतिवाक्यशेषः
विषयागंधरसरूपस्पर्शशब्दाः तेविद्यं
तेफलत्वेनयस्यांसाविषयवतीप्रवृत्ति
र्मनसः स्थैर्य्यंकरोति तथाहिनासाग्रे
चित्तंधारयतोदिव्यंगंधसंविदुपजायते
तादृश्येवजिह्वाग्रेरससंवित् तालुनिरू
पसंवित् जिह्वामध्येस्पर्शसंवित् जि

ह्वामूले शब्दसंवित् तदेवं तत्तदिंद्रियद्वा
रेण तस्मिंस्तस्मिन्दिव्ये विषये जायमाना सं
वित् जिह्वामध्ये स्पर्शसंवित् जिह्वामूले
शब्दसंवित्चित्तस्यैकाग्रताहेतुर्भवति अस्ति यो
गस्य फलमिति योगिनः समाश्वासो सा
दनात् एवंविधमेवोपायांतरमाह वि
शोका वा ज्योतिष्मती ३६ प्रवृत्तिरुत्पा
न्ना चित्तस्य स्थितिनिबंधिनीति वाक्यशे
षः ज्योतिः शब्देन सात्विकः प्रकाश उ
च्यते स प्रशस्तो भूयानतिशयवांश्च वि
द्यते यस्यां सा ज्योतिष्मती प्रवृत्तिः विशो
का विगतः सुखमयसत्वाभ्यासवशाच्छो
को रजः परिणामरूपा यस्यां सा विशो

काचेतसःस्थितिनिबंधिनी अयमर्थः
हृत्पद्मसंपुटमध्येप्रशांतकल्लोलक्षीरोद
धिप्रख्यंचित्तसत्वंभावयतः प्रज्ञालोकात्स
र्ववृत्तिपरिक्षयेचेतसःस्थैर्यमुत्पद्यते उ
पायांतरप्रदर्शनद्वारेणसंप्रज्ञातस्यसमा
धेर्विषयंदर्शयति वीतरागविषयंवाचित्त
म् ३७ मनसःस्थितिनिबंधनंभवती
तिवाक्यशेषः वीतरागःपरित्यक्तवि
षयाभिलाषः तस्ययच्चित्तंपरिहृत
क्लेशंतदावलंबनीकृतंचेतसःस्थिति
हेतुर्भवति एवंविधमेवोपायांतरमाह
स्वप्ननिद्राज्ञानालंबनंवा ३८ प्रत्यस्त
मितबाह्येंद्रियवृत्तेर्मनोमात्रेणैवयत्र

भोक्तृत्वमात्मनः सस्वप्नः निद्रापूर्वोक्त
लक्षणा तदालंबनंस्वप्नालंबनंवाज्ञान
मालंब्यमानंचेतसः स्थितिंकरोति नाना
रुचित्वात्प्राणिनांयस्मिन्कस्मिंश्चिद्वस्तु
नियोगिनः श्रद्धाभवतितस्यध्यानेनापि
भवतीष्टसिद्धिरितिप्रतिपादयितुमाह य
थाभिमतध्यानाद्वा ३९ यथाभिमतेवस्तु
निबाह्येचंद्रादावाभ्यंतरेनाडिचक्रादौ
वाभाव्यमानेचेतः स्थिरीभवति एवमुपा
यान्प्रदर्श्यफलप्रदर्शनार्थमाह परमा
णुपरममहत्वांतोऽस्यवशीकारः ४०
एभिरुपायैश्चित्तस्यस्थैर्यंभावयतोयोगि
नः सूक्ष्मविषयभावनाद्वारेणपरमाणुं

तोवशीकारः अप्रतीघातरूपोजायते क्व
चित्परमाणुपर्यंतसूक्ष्मविषयेऽस्यमनोनप्र
तिहन्यतइत्यर्थः एवंस्थूलमाकाशादिपर
ममहत्पर्यंतंभावयतोनक्वचिच्चेतसःप्रति
घातउत्पद्यते सर्वत्रस्वातंत्र्यंभवतीत्यर्थः
एवमेभिरुपायैःसंस्कृतस्यचेतसःकीदृग्रू
पंभवतीत्यत्रआह क्षीणवृत्तेरभिजातस्ये
वमणेर्गृहीतृग्रहणग्राह्येषुतत्स्थतदंज
नतासमापत्तिः ४१ क्षीणाःवृत्तयोयस्य
तत्क्षीणवृत्तिःतस्यगृहीतृग्रहणग्राह्ये
षुअस्मितेंद्रियविषयेषुतत्स्थतदंजनता
समापत्तिर्भवति तत्स्थत्वंतत्रैकाग्रता
तदंजनतातन्मयत्वंन्यग्भूतेचित्तेविष

यस्य भाव्यमानस्यैवोत्कर्षस्य याविधासमा
।पतिस्तद्रूपपरिणामो भवतीत्यर्थः त
त्र दृष्टांतमाह अभिजातस्येवमणेर्यथा
भिजातस्य निर्मलस्य स्फटिकमणेस्तत्त
तद्रूपाश्रयवशात्तत्तद्रूपापत्तिरेवं निर्मलस्य
चित्तसत्वस्य तत्तद्भावनीयवस्तूपरागात
त्तद्रूपतापत्तिः यद्यपित्राही तृग्रहणा।
ग्राह्येष्वित्युक्तं तथापि भूमिकाक्रमव
शात्ग्राह्यग्रहणग्रहीतृष्विति बोधव्यं
यतः प्रथमं ग्राह्यनिष्ठ एव समाधिस्ततो
ग्रहणनिष्ठः ततो स्मितामात्ररूपो गृहीतृ
निष्ठः केवलस्य पुरुषस्य गृहीतुर्भाव्य
त्वाऽसंभवात् ततश्च स्थूलसूक्ष्मग्राह्य।

परकं चित्तं तत्रसमापन्नं भवति एवंग्रहणग्र

हीतरीवसमापत्तेः तद्रूपपरिणामत्वं वोद्धव्यं

इदानीमुक्तायायाया एवसमापत्तेश्चतुर्विधं

भेदमाह ।शब्दार्थज्ञानविकल्पैः संकीर्णा

सवितर्का ४२ श्रोत्रेंद्रियग्राह्यः स्फोटो

वाशब्दः अर्थोजात्यादिः ज्ञानंसत्वप्रधा

नाबुद्धिवृत्तिः विकल्पउक्तलक्षणः तैः

संकीर्णायस्यामेतेशब्दादयः परस्पराध्या

सेनविकल्परूपेणप्रतिभासंते गौरि

तिशब्दोगौरित्यर्थोगौरितिज्ञानमित्यने

नाकारेणयासासवितर्कासमापत्तिरुच्यते

उक्तलक्षणविपरीतांनिर्वितर्कामाह

स्मृतिपरिशुद्धौस्वरूपशून्येवार्थमात्रनि

यो. सू. वृ.
२२

भासा निर्वितर्का ४३ शब्दार्थस्मृतिप्रवि
ये प्रत्युदितस्पष्टग्राह्याकारप्रतिभासित
यान्यग्भूतज्ञानांशत्वेन स्वरूपशून्येव
निर्वितर्का समापत्तिः भेदांतरं प्रतिपाद
यितुमाह एतयैव सविचारा निर्विचारा च
सूक्ष्मविषया व्याख्याता ४४ एतयैव
सवितर्कनिर्वितर्कया च समापत्त्या सविचा
रा निर्विचारा च व्याख्याता कीदृशी सूक्ष्म
विषया सूक्ष्मतन्मात्रांतःकरणरूपो वि
षयो यस्याः सा तथोक्ता एतेन पूर्वस्याः
स्थूलविषयत्वं प्रतिपादितं भवति सा हि
महाभूतेंद्रियालंबना शब्दार्थविज्ञानवि
कल्पसहितत्वेन देशकालधर्माद्यवच्छि

नः सूक्ष्मोर्थः प्रतिभाति यस्यां सा सविचारा
देशकालधर्मादिरहितो धर्मिमात्रतया
सूक्ष्मोर्थः तन्मात्रांतःकरणरूपः प्रति
भाति यस्यां सा निर्विचारा अस्या एव सूक्ष्म
विषयायाः किंपर्यंतः सूक्ष्मो विषय इत्या
ह सूक्ष्मविषयत्वं चालिंगपर्यवसानम्
४५ सविचारनिर्विचारयोः समापत्त्यो
र्यत् सूक्ष्मविषयत्वमुक्तं तदलिंगपर्य
वसानं न क्वचिल्लीयते न वा किंचिल्लिं
गयति गमयतीति अलिंगं प्रधानं तत्प
र्यंतं सूक्ष्मविषयत्वं तथा हि गुणानां प
रिणामे चत्वारि पर्वाणि विशिष्टलिंग
मविशिष्टलिंगं लिंगमात्रमलिंगं चेति

विशिष्टलिंगं भूतानि अविशिष्टलिंगं त
न्मात्रेन्द्रियाणि लिंगमात्रं बुद्धिरलिंगं प्रधा
नमिति नातः परं सूक्ष्ममस्तीत्युक्तं भवति
एतासां समापत्तीनां प्रकृते प्रयोजनमाह
ता एव सबीजः समाधिः ४६ ता एवोक्त
लक्षणाः समापत्तयः सबीजः सह बीजे
नालंबनेन वनेन वर्त्तत इति सबीजः संप्र
ज्ञातः समाधिरित्युच्यते सर्वासां सालं
बनत्वात् अथैतासां समापत्तीनां नि
र्विचारफलकत्वान्निर्विचारायाः फल
माह निर्विचारवैशारद्ये अध्यात्मप्र
सादः ४७ निर्विचारत्वं व्याख्यातं वै
शारद्यं नैर्मल्यं सवितर्का स्थूलविषया

मपेक्ष्यनिर्वितर्कायाः प्राधानं ततोपिसू
क्ष्मविषयायाः सविचारायास्ततोपिनिर्विक
ल्परूपायानिर्विचारायास्तस्यास्तुनिर्विचारा
याःप्रकृष्टाभ्यासवशाद्वैशारद्येनैर्मल्येस
त्यध्यात्मप्रसादःसमुपज्ञायतेप्रज्ञायाज्ञा
नस्यप्रसादःप्रत्यक्षात्मआलोकः चित्तं
क्लेशवासनारहितंस्थिरप्रवाहयोग्य
भवति एतदेवचित्तस्यवैशारद्यंयत्स्थितौ
दार्ढ्यं तस्मिन्सतिकिंभवतीत्याह ऋतं
भरातत्रप्रज्ञा ४८ ऋतंसत्यंबिभर्तिक
दाचिदपिनविपर्ययेणाछाद्यतेसाऋतंभ
राप्रज्ञातस्मिन्सतिभवतीत्यर्थः तस्मा
च्चप्रज्ञालोकात्सर्वंयथावत्पश्यन् यो

गीप्रकृष्टंयोगंप्राप्नोति अस्याःप्रज्ञांतरा
द्वैलक्षण्यमाह श्रुतानुमानप्रज्ञाभ्यां
सामान्यविषयाविशेषार्थत्वात् ४९
श्रुतमागमज्ञानं अनुमानमुक्तलक्षणं
ताभ्यांयाजायतेप्रज्ञासासामान्यविषया न
हिशब्दलिंगयोरिंद्रियवद्विशेषप्रतिप
त्तौसामर्थ्यं इयंपुनर्निर्विचारवैशारद्य
समुद्भवाप्रज्ञाताभ्यांविलक्षणा विशे
षविषयत्वादस्यांहिप्रज्ञायांसूक्ष्मव्यव
हितविप्रकृष्टानामपिविशेषःस्फुटेनैवरू
पेणभास्यते अतस्तस्यामेवयोगिनापरः
प्रयत्नःकर्तव्यइत्युपदिष्टंभवति अ
स्याःप्रज्ञायाःफलमाह तज्जःसंस्का

रोऽन्यसंस्कारप्रतिबंधी ५० तयाप्रज्ञा
याजनितोयः संस्कारः सोन्यान्व्युत्थानजा
न्समाधिजांश्चसंस्कारान्प्रतिबध्नाति
स्वकार्यकरणाक्षमान्करोतीत्यर्थः य
तस्तत्त्वरूपतयानयाजनिताः संस्काराब
लवत्त्वादतत्त्वरूपप्रज्ञाजनितान्संस्कारा
न्बाधितुंशक्नुवंति अतस्तामेवप्रज्ञा
मभ्यसेदित्युक्तंभवति एवंसंप्रज्ञातंस
माधिमभिधायाऽसंप्रज्ञातंवक्तुमाह
तस्यापिनिरोधेसर्वनिरोधान्निर्बीजःस
माधिः ५१ तस्यापिसंप्रज्ञातस्यनिरो
धेप्रविलयेसतिसर्वासांचित्तवृत्तीनांस्व
कारणेप्रविलयाद्यायासंस्कारमात्रात्

वृत्तिरुदेति तस्याः तस्यानेतिनेतीति के
वलंपर्युदसनान्निर्बीजः समाधिराविर्भ
वति यस्मिन् सति पुरुषः स्वरूपमात्र
निष्ठः शुद्धो भवति तदत्राधिकृतस्ययो
गस्यलक्षणं चित्तवृत्तिनिरोधपदानांव्या
ख्यानमभ्यासवैराग्यलक्षणं तस्योपा
यद्वयस्यस्वरूपभेदंचाभिधाय संप्र
तासंप्रज्ञातभेदेनयोगस्यमुख्यामुख्य
भेदमुक्त्वा योगाभ्यासप्रदर्शनपूर्वका
नविस्तरेणोपायान्प्रदर्श्य सुगमोपा
यप्रदर्शनपरतयेश्वरस्यस्वरूपप्रमा
णप्रभाववाचकोपासनाक्रमंतत्फला
निनिर्णीय चित्तस्यविक्षेपांस्तत्सहभु

वश्चदुःखादीन् विस्तरेण च तत्प्रतिषेधो
पायेनैकतत्वाभ्यासमैत्र्यादिप्राणायामा
दीन् संप्रज्ञातपूर्वांगभूतविषयवतीप्रवृ
त्तिरित्यादीनाख्यायोपसंहारद्वारेण च स
मापत्तीः सलक्षणाः फलसहिताः स्वस्ववि
षयसहिताश्चाख्याय संप्रज्ञातासंप्रज्ञातयो
रुपसंहारमभिधाय सबीजपूर्वको निर्बी
जः समाधिरभिहित इति व्याकृतो योग
पादः व्याख्यातः इति महाराजाधिरा
जश्रीभोजराजदेवविरचितायां पातंज
लयोगशास्त्रसूत्रवृत्तौ प्रथमः पादः
१ नैते दुःप्राप्ययोगर्द्धिसिद्धये येन
दर्शिताः उपायाः स जगन्नाथस्य

क्षोऽस्तु प्रार्थिनामये १ तदेवं प्रथमपा
दे समाहितचित्तस्य सोपायं योगमभिधा
य व्युत्थितचित्तस्यापि कथमुपायाभ्या
सपूर्वको योगः सात्म्यतामुपयातीति त
त्साधनानुष्ठानप्रतिपादनाय क्रियायो
गमाह तपःस्वाध्यायेश्वरप्रणिधानानि
क्रियायोगः १ तपः शास्त्रांतरे उपदिष्टं
कृच्छ्रचांद्रायणादि स्वाध्यायः प्रणव
पूर्वाणां मंत्राणां जपः ईश्वरप्रणिधा
नं सर्वक्रियाणां तस्मिन्परमगुरौ फलनि
रपेक्षया समर्पणं एतानि क्रियायोग
इत्युच्यंते स किमर्थमित्याह समाधि
भावनार्थः क्लेशतनूकरणार्थश्च २ क्ले

श्यावक्ष्यमाणांक्लेशांतनूकरणंस्वकार्य।
करणाप्रतिबंधः समाधिरुक्तलक्षण।
स्तस्यभावनाचेतसिपुनःपुनर्विनिवेश
नंसोर्थः प्रयोजनंयस्तसतथोक्तः एत
दुक्तंभवतिएतेतपःप्रभृतयोऽभ्यस्यमा
नाश्चित्तगतानविद्यादीनक्लेशाञ्छिथि
लीकुर्वंतः समाधेरुपकारकतांभजंते
तस्मात्प्रथमतःक्रियायोगविधानपरप
रेणयोगिनांभवितव्यमित्युपदिष्टं क्ले
शतनूकरणार्थइत्युक्तं तत्रकेतेक्लेशा
इत्याह अविद्यास्मितारागद्वेषाभिनि
वेशाःक्लेशाः ३ अविद्यादयोवक्ष्य
माणलक्षणाःचंक्लेचवाधनालक्षणं

परितापमुपजनयंतः क्लेशा इत्याख्या
भवंति तेहि चेतसि प्रवर्तमानाः संसारल
क्षणं गुणपरिणामं दृढयंति सत्यपि सर्वेषां
तुल्ये क्लेशत्वे मूलभूतत्वादविद्यायाः प्राधा
न्यं प्रतिपादयितुमाह अविद्याक्षेत्रमु
त्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम्
४ अविद्या मोहः अनात्मन्यात्माभिमा
न इति यावत् सा क्षेत्रं प्रसवभूमिरुत्त
रेषामस्मितादीनाम् प्रत्येकं प्रसुप्त्यादि
भेदेन चतुर्विधानाम् ततो यत्राविद्या विप
र्ययज्ञानरूपा शिथिलीभवति तत्र क्लेशा
नां रागादीनां नोद्भवो दृश्यते विपर्यय
ज्ञानसद्भावे च तेषामुद्भवदर्शनात् स्थि

तमेवमूलत्वमविद्यायाः प्रसुप्ततनुविच्छि
न्नोदाराणामिति तत्रक्लेशाश्चित्तभूमौ।
स्थिताः प्रबोधकाभावेस्वकार्यंनारभंते
तेप्रसुप्ताइत्युच्यंते यथाबाल्यावस्थायां
बालस्यहिवासनारूपेणस्थिताअपिक्ले
शाः प्रबोधकसहकार्यभावेनाभिव्यं
ज्यंते तेतनवःयेस्वस्वप्रतिपक्षभावन
याशिथिलीकृतकार्यसंपादनशक्त
योवासनाशेषतयाचेतस्यवस्थिता
प्रभूतांसामग्रीमंतरेणनस्वकार्यमार
ब्धुंक्षमा यथाभ्यासवतोयोगिनस्ते
विच्छिन्नायेकेनचिद्बलवताक्लेशेनाभिभू
तशक्तयःतिष्ठंति यथाद्वेषावस्थायां

यो·सू·वृ·
२८
28

रागोसमावस्थायांद्वेषः नह्यनयोःपर
स्परविरुद्धयोर्युगपत्संभवोस्ति तेउदा
रायेप्राप्तसहकारिसन्निधयः स्वंस्वंका
र्यमभिनिर्वर्तयंति यथासर्वदैवयोगिप
रिपंथिनोव्युत्थानदशायां एषांप्रत्येकं
चतुर्विधानामपिमूलभूतेनास्मितास्य
विद्यान्वयित्वेनप्रतीयते नह्निक्वचिद
पिक्लेशानांविपर्यासान्वयनिरपेक्षा
णांस्वरूपमुपलभ्यते तस्यांचमिथ्याज्ञा
नरूपायांसम्यक्ज्ञानेनानवर्तितायां
दग्धबीजकल्पानामेषांनक्वचित्प्ररोहो
स्तीति अविद्यानिमित्तत्वमविद्यान्व
याश्चैषांनिश्चीयते अतःसर्वेविद्यास्म

पदेशभाजः सर्वेषांचक्लेशानांचित्तविक्षे
पकारित्वात् योगिनाप्रथममेवतदुच्छे
देयत्नः कर्तव्यइति अविद्यायाःलक्षण
माह अनित्याशुचिदुःखानात्मसुनि
त्यशुचिसुखात्मख्यातिरविद्या ५
अतस्मिंस्तत्प्रतिभासोऽविद्येत्यविद्या
याःसामान्यलक्षणं तस्याएवभेद
प्रतिपादनं अनित्येषुघटादिषुनित्य
त्वाभिमानोऽविद्येत्युच्यते एवमशुचिषु
कायादिषुशुचित्वाभिमानः दुःखेषुचवि
षयेषुसुखाभिमानः अनात्मनिशरी
रेआत्माभिमानः एतेनापुण्येपुण्यभ्र
मोऽनर्थेचार्थभ्रमोव्याख्यातः अस्मि

यो·सू·वृ·
२९

तांलक्षयितुमाह दृग्दर्शनशक्त्योरे
कात्मतेवास्मिता ६ दृकूशक्तिःपुरु
षःदर्शनशक्तीरजस्तमोभ्यामभिभूतःसा
त्विकपरिणामोंतःकरणरूपः तयोर्भो
ग्यभाकृत्वेनजडाजडत्वेनात्यंतभिन्नरू
पयोरेकताभिमानोस्मितेत्युच्यते यथा
प्राकृतःवस्तुतःकर्तृत्वरहितोपिक
र्ताहंभोक्ताहमितिमन्यतेसोयमस्मि
ताख्योविपर्यासःक्लेशःरागस्यलक्षमा
ह सुखानुशयीरागः ७ सुखमनुशे
तेसुखानुशयीसुखज्ञस्यसुखानुस्मृ
तिपूर्वकःसुखसाधनेषुतृष्णारूपोगर्द्धो
रागसंज्ञःक्लेशः द्वेषलक्षणमाह दुः

खानुशयीद्वेषः ८ दुःखंप्रतिकूलत्व
क्षणंतदभिज्ञस्यदुःखानुस्मृतिपूर्वकःत
त्साधनेधनभिलषतोयोयंनिंदात्मकः
सद्वेषलक्षणक्लेशः अभिनिवेशमाह
स्वरसवाहीविदुषोपितथारूढोभिनि
वेशः ९ पूर्वजन्मानुभूतमरणदुः
खानुभववासनावलाद्भयरूपः समु
धुजायमानः शरीरविषयादिर्ममवि
योगोमाभूदित्यन्वहमनुबंधरूपःसर्व
स्यैवाकृमेःब्रह्मपर्यंतंनिमित्तंविनाप्रवर्त्त
मानोऽभिनिवेशाख्यःक्लेशः तदेवंमु
स्यानस्यक्लेशात्मकत्वादेकाग्रहाभ्यास
कामेनप्रथमंक्लेशाःपरिहर्तव्याः नवाक्षा

तानांतेषांपरिहारःकर्तुंशक्यइति ततस्ता
नामतेषामुद्देशंक्षेत्रंविभागंलक्षणंचा
भिधायस्थूलसूक्ष्मभेदभिन्नानांतेषांप
रिहरणोपायमाह तेप्रतिप्रसवहेयाःसू
क्ष्माः १० तेसूक्ष्माःक्लेशायेवासनारूपे
णावस्थितानवृत्तिरूपंपरिहरणोपायमा
ह तेप्रतिप्रसवेनप्रतिलोमपरिणामेन
हेयास्त्यक्तव्याःस्वकारणेऽस्मितायां
कृतार्थेचित्तंसवासनंयदाप्रविष्टंभव
तितदाकुतस्तेषांनिर्मूलानांसंभवः
स्थूलानांहानोपायमाह ध्यानहेयास्त
द्वृत्तयः ११ तेषांक्लेशानामारब्धका
र्याणांयाःसुखदुःखमोहात्मकावृत्त

यस्ता ध्यानेनैव चित्तैकाग्रतालक्षणेनैव हे
या हातव्या इत्यर्थः चित्तपरिकर्माभ्यास
मात्रेणैव स्थूलत्वात्तासां निवृत्तिर्भवति
यथा वस्त्रादेः स्थूलो मलः प्रक्षालनमा
त्रेणैव निवर्त्तते यस्तु तत्र सूक्ष्मस्तैलैस्त्वा
येरुत्तापनप्रभृतिभिरेव निवर्त्तयितुं श
क्यते एवं क्लेशानां तत्वमभिधाय कर्मा
शयस्याभिधातुमाह क्लेशमूलः कर्मा
शयो दृष्टादृष्टजन्मवेदनीयः १२ क
र्माशय इत्यनेनास्य स्वरूपमभिहितं
यतो वासनारूपाण्येव कर्माणि दृष्टा
दृष्टजन्मवेदनीयः [illegible] क्लेशमूल इ
त्यनेन कारणमभिहितं यतः कर्मेण

यो·सू·वृ· शुभाशुभानांक्लेशाएवनिमित्तंदृष्टादृष्टज
३१ न्मवेदनीयेसनेनफलमुक्तम् अस्मिन्नेवज
31 न्मन्यनुभवनीयोदृष्टजन्मवेदनीयइत्यर्थः
जन्मांतरानुभवनीयोऽदृष्टजन्मवेदनीय
स्तथाहि कानिचित्पुण्यानिकर्माणिदे
वताराधनादीनितीव्रसंवेगकृतानिइहै
वजन्मनिजात्यायुर्भोगलक्षणंफलंप्रयच्छ
ति यथानंदीश्वरस्यभगवन्महेश्वरारा
धनबलादिहैवजन्मनिजात्यादयोविशि
ष्टाःप्रादुर्भूताः एवमन्येषांविश्वामित्रा
दीनांतपःप्रभावाज्जात्यायुषी केषांचि
ज्जातिरेव यथातीव्रवेगेनदुष्टकर्मकृ
तांनहुषादीनांजात्यंतरपरिणामः

उर्वश्याश्चकार्त्तिकेयवनेलतारूपतया
एवंव्यस्तसमस्तत्वेनयथायोग्यंयोज्यम्
इदानींकर्माशयस्यसभेदभिन्नंफलमाह
सतिमूलेतद्विपाकोजात्यायुर्भोगाः १३
मूलमुक्तलक्षणंक्लेशास्तेष्वनभिभूतेषु
सत्सुकर्मणांकुशलाकुशलरूपाणांवि
पाकःफलंजात्यायुर्भोगाभवंति जाति
र्मनुष्यादिः आयुश्चिरकालंशरीरसंबं
धः भोगाविषयाः इंद्रियाणिःसुखदुः
खसंविच्चकर्मकरणभावसाधनव्युत्प
त्याभोगशब्दस्यैवमत्रतात्पर्यं चित्तभूमा
वनादिकालसंचिताःकर्मवासनायथाय
थापाकमुपयांतितथातथागुणप्रधान

यो·सू·वृ· भावेनस्थिताजात्यायुर्भोगलक्षणंस्वका
३२ 32 र्यमारभन्ते उक्तानांकर्मफलत्वेजात्यादी
नांस्वकारणकर्मानुसारेणकार्यकर्तृत्व
माह तेह्लादपरितापफलाःपुण्यापुण्य
हेतुत्वात् १४ ह्लादःसुखंपरितापोदुः
खमितिह्लादपरितापौफलंयेषांतेतथो
क्ताः पुण्यंकुशलंकर्म्मतद्विपरीतमपु
ण्यं तेपुण्यापुण्येहेतुकारणेयेषांतेषां
भावस्तत्त्वंतस्मादेतदुक्तंभवति पुण्यक
र्मारब्धाजात्यायुर्भोगाह्लादफलाः अपु
ण्यकर्मारब्धाःपरितापफलाःएतच्च
प्राणिमात्रापेक्षयाद्वैविध्यं योगिनस्तु
सर्वंदुःखमित्याह परिणामतापसंस्का

रदुःखैर्गुणवृत्तिविरोधाच्चदुःखमेवसर्वंवि
वेकिनः १५ परिज्ञातक्लेशादिविवेकस्य
दृश्यमानंसकलमेवभोगसाधनं सविषसा
न्नवत् दुःखमेवप्रतिकूलवेदनीयमेवे
त्यर्थः यस्मादत्यंताभिजातोयोगीदुःखले
शेनाप्युद्विजते यथाक्षिपत्रमूर्णातंतु
स्पर्शनमात्रेणैवमहतींपीडामनुभवतिने
तरदंगं तथाविवेकीस्वल्पस्यदुःखानु
बंधेनापिविरज्यते कथमित्याह परिणा
मतापसंस्कारदुःखैः विषयाणामुपभु
ज्यमानानांयथायथंगर्द्धोभिवृद्धेस्तदप्रा
प्तिकृतस्यदुःखस्यापरिहार्यत्वाद्दुःखां
तरसाधनत्वाच्चास्त्येवदुःखरूपतेतिप

यो.सू.वृ. रिणामदुःखत्वं उपभुज्यमानेषुसुखसा
३३ धनेषुतत्प्रतिपंथिनंप्रतिद्वेषस्यसर्वदैवा
33 वस्थितत्वात् सुखानुभवकालेपितापदुः
खदुःपरिहारमितितापदुःखता संस्का
रदुःखत्वमभिमतानभिमतविषयसंन्नि
धानेसुखसंविद्दुःखसंविच्चोपजायमा
न तथाविधमेवस्वक्षेत्रेसंस्कारमारभते
संस्काराच्चपुनस्तथाविधसंविदनुभवइ
त्यपरिमितिसंस्कारोत्पत्तिद्वारेणसंसारा
नुच्छेदात्सर्वस्यैवदुःखत्वंगुणवृत्तिविरो
धाच्चेति गुणानांसत्वरजस्तमसांयावृत्त
यःसुखदुःखमोहरूपाःपरस्परमभिभा
व्याभिभावकत्वेनविरुद्धाजायंते तासां

चसर्वंचैवदुःखानुवेधाद्दुःखत्वं एतदुक्तंभ
वति एकांतिकीमात्यंतिकींचदुःखनिवृत्ति
मिच्छतोविवेकिनउक्तरूपकारणचतुष्ट
येन यावत्सर्वेविषयादुःखरूपतयाप्र
तिभांति तस्मात्सर्वकर्मविपाकोदुःखरू
पएवेत्युक्तंभवति तदेवमुक्तक्लेशकर्माश
यविपाकराशेरविद्याप्रभवत्वादविद्या
याश्चमिथ्याज्ञानरूपायाःसम्यक्ज्ञानो
च्छेद्यत्वात्सम्यक्ज्ञानस्यचससाधनस्य
हेयोपादेयावधारणरूपत्वात्तदभिधान
रूपायाःसम्यक्ज्ञानोच्छेद्यत्वात्सम्यक्
ज्ञानस्यचसमाधनस्यहेयोपादेयाव।
धारणरूपत्वात्तदभिधानायाह हेयंदुः

खमनागतं १६ न तस्यातिक्रान्तत्वाद
नुभूयमानस्यसक्तुमशक्यत्वादनागतमेव
संसारदुःखंहातव्यमित्युक्तं भवति हेयहेतु
माह द्रष्टृदृश्ययोःसंयोगोहेयहेतुः १७
द्रष्टाचिद्रूपःपुरुषः दृश्यंबुद्धितत्त्वंतयो
रविवेकख्यातिहेतुकोयोसौसंयोगोभो
ग्यभोक्तृत्वेसन्निधानंसहेयस्यदुःखस्य
गुणपरिणामरूपस्यसंसारस्यहेतुःकार
णं तन्निवृत्त्यासंसारनिवृत्तिर्भवती
सर्थः द्रष्टृदृश्ययोःसंयोगइत्युक्तम् त
त्रदृश्यस्यस्वरूपंकार्य्यंप्रयोजनंचाह प्र
काशक्रियास्थितिशीलंभूतेन्द्रियात्मकं
भोगापवर्गार्थंदृश्यम् १८ प्रकाशः स

त्वस्य धर्मः क्रियाप्रवृत्तिरूपः रजसः स्थि
तिनियमनरूपा तमसः ताः प्रकाशप्रवृत्ति
स्थितयः शीलं स्वभावकरूपं यस्य तत्तथा
विधमिति स्वरूपमस्य निर्द्दिष्टं। भूतेंद्रि
यात्मकमिति भूतानि स्थूलसूक्ष्मभेदेन
पृथिव्यादीनि गंधतन्मात्रादीनि च इंद्रिया
णि कर्मेंद्रियबुद्धींद्रियांतःकरणभेदेन त्रि
विधानि उभयमेतद्ग्राह्यग्रहणरूपमा
त्मा स्वरूपाभिन्नः परिणामो यस्य तत्तथावि
धमित्यनेन कार्य्यमस्योक्तम् भोगः कथि
तलक्षणः अपवर्गो विवेकख्यातिपूर्वका
संसारनिवृत्तिः तौ भोगापवर्गौ अर्थः प्र
योजनं यस्य तत्तथाविधं दृश्यमित्यर्थः त

स्यचदृश्यस्यनानावस्थारूपपरिणामक
स्यहेयत्वेनज्ञातव्यत्वादवस्थाःकथयितुमा
ह विशेषाविशेषलिंगमात्रालिंगानिगु
णपर्वाणि १९ गुणानांपर्वाण्यवस्था
विशेषाश्चत्वारोज्ञातव्याइत्युपदिष्टंभव
ति तत्रविशेषामहाभूतेंद्रियाणि अ
विशेषास्तन्मात्रांतःकरणे लिंगमात्रंबु
द्धिः अलिंगमव्यक्तमित्युक्तंसर्वत्रत्रिगुण
रूपस्यास्याव्यक्तान्वयित्वेनप्रत्यभिज्ञा
नादप्यवश्यंज्ञातव्यत्वेन योगकालेचत्वा
रिपर्वाणिनिर्दिष्टानि एवंहेयत्वेनदृश्य
स्यप्रथमंज्ञातव्यत्वात्तदवस्थासहितंव्या
ख्याय उपादेयंद्रष्टारंव्याकर्तुमाह द्र

ष्टादृशिमात्रःशुद्धोपिप्रत्ययानुपश्यः २०
द्रष्टापुरुषोदृशिमात्रश्चेतनामात्रः मात्र
ग्रहणंधर्मनिरासार्थं केचिद्धिचेतनामा
त्मनोधर्ममिच्छंति सशुद्धोपिपरिणामा
द्यभावेनस्वप्रतिष्ठोपिप्रत्ययानुपश्यः प्र
त्ययाविषयोपरक्तज्ञानानि तानिअ
व्यवधानेनप्रतिसंक्रमाद्यभावेनपश्य
ति एतदुक्तंभवतिजातिविषयोपराग
यामेवबुद्धौसन्निधानमात्रेणैवपुरुषस्य
द्रष्टृत्वमितिसएवभोक्तेत्याह तदर्थए
वदृश्यस्यात्मा २१ दृश्यस्यप्रागुक्तल
क्षणस्ययंआत्मास्वरूपः सतदर्थस्तस्य
पुरुषस्यार्थस्तस्यपुरुषस्यभोक्तृत्वसं

यो·सू·वृ· पादनंनामस्वार्थपरिहारेणप्रयोजनं न
३६ हिप्रधानंप्रवर्त्तमानमात्मनः किंचित्प्रयो
36 जनमपेक्ष्यप्रवर्त्तते किंतुपुरुषस्यभो
गंसंपादयामीति यद्येवंभोगसंपादनन
मेवप्रयोजनं तदासंपादितेतस्मिंस्तन्नि
ष्प्रयोजनंविरतव्यापारंस्यात् तस्मिंश्चप
रिणामशून्येशुद्धत्वात्सर्वेद्रष्टारोबंधरहि
ताः स्युस्तदासंसारोच्छेदइत्याशंक्याह
कृतार्थंप्रतिनष्टमप्यनष्टंतदन्यसाधा
रणत्वात् २२ यद्यपिविवेकख्यातिपर्य्यं
ताद्भोगसंपादनात्कृमपिकृतार्थंपुरुषं
प्रतितन्नष्टं विरतव्यापारमपिसर्वपुरुष
साधारणत्वात् अन्यान्प्रत्यनष्टस्वव्या

पारमवतिष्ठते अतः प्रधानस्यसकलभो
क्तृसाधारणत्वान्नकदाचनापिविनाशः
एकस्यतुमुक्तौवानसर्वमुक्तिप्रसंगइत्युक्त
भवति २२ दृश्यद्रष्टारौव्याख्यायसंयोग
व्याख्यातुमाह स्वस्वामिशक्त्योःस्वरूपो
पलब्धिहेतुःसंयोगः २३ कार्यद्वारेणा
स्यलक्षणंकरोति स्वशक्तिः दृश्यस्यस्व
भावःस्वामिशक्तिःद्रष्टुःस्वरूपंतयोर्द्वयो
र्द्वयोरपिसंवेद्यसंवेदकत्वेनव्यवस्थितयो
र्यास्वरूपोपलब्धिस्तस्याःकारणंयःसंयो
गः सचसहजोभोग्यभोक्तृभावस्वरूपा
न्नान्यः नहितयोर्नित्ययोर्व्यापकयोश्च
स्वरूपादतिरिक्तःकश्चित्संयोगः य

देवभोग्यस्य भोग्यत्वं भोक्तुश्च भोक्तृत्वं अना
दिसंसिद्धम् सर्वेएव संयोगः तस्यापि का
रणमाह तस्य हेतुरविद्या २४ या पूर्वं
विपर्यासात्मिका मोहरूपा अविद्याव्या
ख्याता सा तस्याऽविवेकख्यातिरूपस्य सं
योगस्य कारणं साहेयं हानक्रियाक
र्मोच्यते किं पुनस्तद्धानमित्याह तदभा
वात्संयोगाभावो हानं तदृशेः कैवल्यम्
२५ तस्या अविद्यायाः स्वरूपविरु
द्धेन सम्यग्ज्ञानेनोन्मूलितायाः योयम
वस्तस्मिन्सति तत्कार्यस्य संयोगस्याप्य
भावस्तद्धानमित्युच्यते अयमर्थो नैत
स्यमूर्त्तद्रव्यवत्परित्यागो युज्यते किंतु

ज्ञातायांविवेकेख्यातावविवेकनिमित्तः

संयोगः स्वयमेवनिवर्त्ततइतितस्यहानं य

देवसंयोगस्यहानं तदेवनित्यकेवलस्य

कैवल्यंव्यपदिश्यते २५ तदेवंसंयोग

स्वरूपंकारणंकार्यंचाभिहितं अथहा

नोपायकथनद्वारेणोपादेयकारणमाह

विवेकख्यातिरविप्लवाहानोपायः २६

अन्येगुणाअन्यः पुरुषइत्येवंविधस्य

विवेकस्ययाख्यातिः प्रख्यासाहानस्यदुः

खपरित्यागस्योपायःकारणं कीदृशी

अविप्लवा नविद्यतेविप्लवोविच्छेदों

तरांतराव्युत्थानरूपोयस्यासाऽविप्लवा

इदमत्रतात्पर्यंप्रतिपक्षभावनाव

लादविद्याप्रविलयेनिवृत्तज्ञातृकर्तृ
त्वाभिमानायारजस्तमोमलानभिभूताया
बुद्धेरंतर्मुखायाः याचिच्छायासंक्रांति
साविवेकख्यातिरित्युच्यते तस्यांच संतत
त्वेनप्रवृत्तायांदृश्यस्याधिकारनिवृत्तेर्भवत्ये
वकैवल्यं २६ उद्भूतविवेकख्यातेःपुरु
षस्ययादृशीप्रज्ञाभवतितांकथयन्विवेक
ख्यातेरेवस्वरूपमाह तस्यसप्तधाप्रां
तभूमौप्रज्ञा २७ तस्योत्पन्नविवेकज्ञा
नस्यज्ञातव्यविवेकरूपाप्रज्ञाप्रांतभूमौ
सकलसालंबनसमाधिभूमिपर्य्यंतेस।
प्तप्रकाराभवतीति तत्रकार्य्यरूपामु
क्तिःचतुष्प्रकारा ज्ञातंमयाज्ञेयंनज्ञा

ज्ञेयंकिंचिदस्ति क्षीणामेक्लेशानमेकिंचि
त्क्षेतव्यमस्ति अधिगतंमयाज्ञानंप्राप्तंम
याविवेकख्यातिरितिप्रत्ययान्तरपरिहारेण
तस्यामवस्थायामीदृश्येवप्रज्ञाजायते
ईदृशीप्रज्ञाकार्य्यविषयंनिर्मलज्ञानंवि
मुक्तिरित्युच्यते चित्तविमुक्तिस्त्रिधाच
रितार्थाममबुद्धिः गुणाः कृताधिका
राः गिरिशिखरनिपतिता इवग्रावाणोन
पुः स्थितिंयास्यन्ति स्वकारणेप्रलयाभि
मुखानां महामोहाभिधानमूलकार
णाभावान्निष्प्रयोजनत्वाच्चामीषांकुतः
प्ररोहः स्वात्मीभूतश्चमेसमाधिः तस्मि
न्सतिस्वरूपप्रतिष्ठाहमिति ईदृशीवि

यो॰सू॰वृ॰ तस्यस्वरूपविमुक्तिः तदेवमीदृश्यांस
२९ प्तविधप्रांतभूमीप्रज्ञायामुपजातायांपु
31 रुषःकेवलइत्युच्यते विवेकख्यातिः
संयोगाभावहेतुरित्युक्तंभवति तस्या
स्तूत्पत्तौकिंनिमित्तमित्यतआह योगांगा
नुष्ठानादविशुद्धिक्षयेज्ञानदीप्तिराविवे
कख्यातेः २८ योगांगानिवक्ष्यमाणा
नितेषामनुष्ठानात् ज्ञानपूर्वकादभ्यासा
दाविवेकख्यातेरविशुद्धिक्षयेचित्तसत्वस्य
प्रकाशावरणलक्षणक्लेशरूपाविशुद्धि
क्षयेयाज्ञानदीप्तिस्तारतम्येनसात्विकपरि
णामोविवेकख्यातिपर्य्यंतः तस्याःख्या
तेर्हेतुरित्यर्थः योगांगानुष्ठानादविशुद्धि

क्षयेयाज्ज्ञानदीप्तिराविवेकख्यातेः । तस्यां ज्ञानदीप्तिस्तारतम्येन सात्त्विकप
परिणामो विवेकख्यातिपर्य्यन्ता । तस्याः
ख्यातेर्हेतुरित्यर्थः योगांगानुष्ठानादशुवि
शुद्धिक्षयइत्युक्तं कानियोगांगानीति
तेषामुद्देशमाह यमनियमासनप्राणा
यामप्रत्याहारधारणाध्यानसमाधयोष्टा
गानि २९ इहकानिचित्समाधेःसाक्षा
दुपकारकेनांतरंग्यंगानि यथाधार
णादीनि कानिचित्प्रतिपक्षप्रमथनहिंसा
वितर्कोन्मूलनद्वारेणसमाधिमुपकु
र्वंति यथायमादयः तत्रासनादीनामु
त्तरोत्तरमुपकारकत्वम् तथासत्या
सनजयेप्राणायामस्थैर्य्यं एवमुत्तर

यो·सू·वृ· त्रापियोजनम् २९ क्रमेणतेषांस्वरूपमा
४० ह अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्र
40 हाः यमाः ३० तत्रप्राणवियोगप्रयो
जनव्यापारोहिंसा साचसर्वानर्थहेतुः
तदभावोऽहिंसाहिंसायाः सर्वकालमे
वपरिहार्य्यत्वात्प्रथमंतदभावरूपाया
अहिंसायानिर्देशः सत्यंवाधनानाम
स्वीकारः एतेऽहिंसादयः पंचयमश
ब्दवाच्याभवंतियोगांगत्वेननिर्दिष्टा
३० एषांविशेषमाह एतेजातिदेश
कालसमयानवच्छिन्नाः सार्वभौमाम
हाव्रतं ३१ जातिर्ब्राह्मणत्वादिः देश
स्तीर्थादिः कालश्चतुर्दश्यादिः समयो

ह्मणप्रयोजनादिः एतैश्चतुर्भिरनवच्छि
न्नाः पर्वोक्ताअहिंसादयोयमाः सर्वासु
क्षित्यादिषुवितथमिथुभवामहाव्रतमित्यु
च्यंते तद्यथाब्राह्मणंनहनिष्यामितीर्थे
कंचैननहनिष्यामि चतुर्दश्यां न ह नि।
ष्यामि देवब्राह्मणप्रयोजनमतिरेकेण
कमपिनाहनिष्यामि इत्येवंचतुर्विधा
वच्छेदव्यतिरेकेणाकेंचित्कचित्कदाचि
त्कस्मिंश्चित् अर्थेनहनिष्यामीत्यन
वच्छिन्नाः एवंसत्यादिषुयथायोग्यंयो
ज्यः इत्थमनियतीकृताः सामान्येनै
वप्रवृत्तामहाव्रतमित्युच्यंते नपुनः
परिच्छिन्नावधारणम् ३१ नियममा

३ शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधा
नानि नियमाः ३२ शौचं द्विविधं वाह्यमा
भ्यंतरंच वाह्यं मृज्जलादिभिः कायादिप्र
क्षालनं आभ्यंतरं मैत्र्यादिभिश्चित्तमला
नां प्रक्षालनं संतोषस्तुष्टिः शेषाः प्रागेव
कृतव्याख्याना एते शौचादयो नियम
पदवाच्याः ३२ कथमेषां योगांगत्वमि
त्याह वितर्कवाधने प्रतिपक्षभावन
म् ३३ वितर्क्यंत इति तर्काः योगपरि
पंथिनो हिंसादयः तेषां प्रतिपक्षभाव
ने सति यदा वाधा भवति तदा योगः
सुकरो भवतीति भवत्येवं यमनियमानां
योगांगत्वं ३३ इदानीं वितर्काणां स्वरू

पुंभेदं प्रकारं कारणं फलं च क्रमेणाह
तितक्रोहिंसादयः कृतकारितानुमोदि
तालोभक्रोधमोहप्रत्येकाश्चतुर्मध्याधि
मात्रादुःखज्ञानानंतफला इति प्रतिप
क्षभावनम् ३४ एते पूर्वोक्ता हिंसाद
यः प्रथमं त्रिधाभिद्यंते कृतकारिता
नुमोदितभेदेन तत्र स्वयं निष्पादिताः
कृताः कुरु कुर्विति प्रयोजकव्यापारे
णसमुत्पादिताः कारिताः अन्येन क्रि
यमाणाः साधु साध्विति संगीकृताः अनु
मोदिताः एतच्च त्रैविध्यं परस्परव्यामो
हनिवारणायोच्यते अन्यथा मंदमति
रेवं मन्येत न मया स्वयं हिंसा कृतेति न मे

द्वेषइति एतेषांकारणप्रतिपादनायाह
लोभक्रोधमोहपूर्विकाइति यद्यपिलो
भः प्रथमनिर्दिष्टः तथापिसर्वक्लेशानांमो
हस्यानात्मन्यात्माभिमानलक्षणस्यनिदा
नत्वात्तस्मिन्सतिस्वपरविभागपूर्वकत्वेनलो
भक्रोधादीनांसमुद्भवान्मूलत्वमवसेयंमोह
पूर्विकासर्वदोषजातिरित्यर्थः भोगस्यलोभ
स्तृष्णाक्रोधःकृत्याकृत्यविवेकोन्मूलिकःप्र
ज्वलनात्मकश्चित्तधर्मः प्रत्येकंकृतादिभे
देनत्रिप्रकारा अपिहिंसादयोमोहादिकारण
त्वेनत्रिधाभिद्यन्ते सर्वेषामेवपुनरवस्थाभे
देनत्रैविध्यमाह मृदुमध्याधिमात्राः मृदवो
मंदाः नतीव्रानापिमध्याः नमंदानापिती

व्रामध्याः अधिमात्रास्तीव्रानमध्यानापि
मंदाः लोभजादीनांकृतादिभेदेनत्रैविध्या
त्साश्वासानंर्भेदाः स्वयंत्रैविध्येसतिसप्तविंश
तिर्भेदाभवंति मृद्वादीनामपिप्रत्येकंमृदुम
ध्याधिमात्रभेदात्त्रैविध्यंसंभवति तद्यथायो
गेयोज्यंतद्यथामृदुःमृदुः मृदुमध्योमृदु
स्तीव्रइति एषांफलमाह दुःखाज्ञानानंत
फलाइति दुःखंप्रतिकूलतयावभासमानो
राजसश्चित्तधर्मः अज्ञानंमिथ्याज्ञानंसंश
यविपर्ययरूपंते दुःखाज्ञानेआनंत्तमपरिछि
न्नंफलंयेषांतेतथोक्ताः इत्थंतेषांस्वरूप
कारणादिभेदेनज्ञातानांप्रतिपक्षभावन
यायोगिनापरिहारः कार्य्यइत्युपदिष्टंभ

यो·सू·वृ· वति ३४ एषामभ्यासात्प्रकर्षमागच्छता
४३ मनुनिष्पादिन्यःसिद्धयोयथाभवंति तथा
43 क्रमेणप्रतिपादयितुमाह अहिंसाप्रति
ष्ठायांतत्सन्निधौवैरत्यागः ३५ तस्याहिं
साभावयतःसन्निधौसहजविरोधिनामहि
नकुलानांवैरत्यागः निर्मत्सरतयावस्थानं
भवति हिंसारताःहिंस्रत्वंपरित्यजंतीत्यर्थः
३५ सत्याभ्यासवतःकिंभवतीत्याह स
त्यप्रतिष्ठायांक्रियाफलाश्रयत्वम् ३६
क्रियमाणाहिक्रियायागादिकाःफलंस्व
र्गादिप्रयच्छंति तस्यतुसत्याभ्यासवतोयो
गिनस्तथासत्यंप्रकृष्यतेयथाकृताया
मपिक्रियायांयोगीफलमाश्रयति तद्व

चनाद्यस्यकस्यचित्क्रियामकुर्वतोऽपिफलं
भवतीत्यर्थः ३६ अस्तेयमभ्यसतः फल
माह अस्तेयप्रतिष्ठायांसर्वरत्नोपस्थानम्
३७ अस्तेयंयदाभ्यस्यतियोगीतदात
स्यतत्प्रकर्षान्निरभिलाषस्यापिसर्वतोदि
क्कानिरत्नान्युपतिष्टंते ब्रह्मचर्य्याभ्या
सस्यफलमाप्तह ब्रह्मचर्य्यप्रतिष्ठायांवी
र्यलाभः ३८ यः किलब्रह्मचर्यमभ्यस्य
तितत्प्रकर्षान्निरतिशयंवीर्यंसामर्थ्यमा
विर्भवति वीर्य्यनिरोधोब्रह्मचर्य्यंतस्यत
त्प्रकर्षाच्छरीरेंद्रियमनस्सुवीर्य्यंप्रकर्षमा
गच्छति ३९ अपरिग्रहाभ्यासफलमा
ह अपरिग्रहस्थैर्येजन्मकथंतासंबो

यो·सू·वृ·
४५
45

सत्वंप्रकाशसुखाद्यात्मकं तस्यशुद्धीरज
स्तमोभ्यामनभिभवः सौमनस्यंखेदा
ननुभवेनमानसीप्रीतिः एकाग्रतानि
यतेविषयेचेतसःस्थैर्यंइंद्रियजयोवि
षयपराङ्मुखानामिंद्रियाणांस्वात्मन्यव
स्थानं आत्मदर्शनेविवेकख्यातिरूपे
चित्तस्ययोग्यत्वंसामर्थ्यं शौचाभ्यासव
तएतेसत्वशुद्ध्यादयःक्रमेणप्रादुर्भवं
ति तथाहि शौचात्सत्वशुद्धिःसत्वशुद्धेः
सौमनस्यंसौमनस्यादेकाग्रता एका
ग्रतयाइंद्रियजयइंद्रियजयादात्मदर्श
नयोग्यतेति संतोषाभ्यासमाह संतोषा
दनुत्तमःसुखलाभः ४२ संतोषप्रक

र्षेणयोगिनस्तथाविधमांतरंसुखमावि
र्भवति यस्यबाह्यंसुखंशतांशेनापिनस
मं ४२ तपसःफलमाह कायेंद्रियशु
द्धिरशुद्धिक्षयात्तपसः ४३ तपसःस
मभ्यस्यमानंचेतसःक्लेशादिलक्षणाशु
द्धिक्षयद्वारेणकायेंद्रियाणांशुद्धिमुत्क
र्षमादधाति अयमर्थः चांद्रायणादिना
चित्तक्लेशक्षयस्ततक्षयादिंद्रियाणांसू
क्ष्मव्यवहितविप्रकृष्टप्रदर्शनादिसाम
र्थ्यमाविर्भवति कायस्ययथेष्टमणुत्व
महत्वादीनि ४४ स्वाध्यायस्यफलमा
ह स्वाध्यायादिष्टदेवतासंप्रयोगः ४५
अभिप्रेतमंत्रजपादिलक्षणेस्वाध्यायेप्र

कृष्यमाणेयोगिनः इष्टयाभिप्रेतयादे
वतयासंप्रयोगोभवति सास्यदेवताप्रत्यक्षी
भवतीत्यर्थः ४५ ईश्वरप्रणिधानस्यफल
माह समाधिसिद्धिरीश्वरप्रणिधानात् ४६
ईश्वरेयोयंभक्तिविशेषस्तस्मात्समाधेरुक्त
लक्षणस्याविर्भवति तस्मात्सभगवानी
श्वरः प्रसन्नःसन्नंतरायरूपान्क्लेशा
न्परिहृत्यसमाधिमुद्बोधयति ४६ नि
यमानुक्त्वाऽऽसनमाह तत्रस्थिरसुखमास
नम् ४७ आस्यतेऽनेनेतिआसनंपद्मा
सनंदंडासनस्वस्तिकादितद्यदास्थिरंनि।
ष्कंपंसुखमनुद्वेजनीयंचभवति तदायो।
गांगतांभजते तस्यैवस्थिरसुखप्राप्त्यर्थं

मुपायमाह प्रयत्नशैथिल्यानंतसमाप
त्तिभ्याम् ४८ तदासनंप्रयत्नशैथिल्ये
नानंतसमापत्याचस्थिरंसुखंचभवतीति
संवंधः यदासनंवध्नामीतीछांकरोतिप्र
यत्नस्यशैथिल्येप्यक्लेशेनैवचत्तदासनंनि
ष्पद्यते यदाकाशादिगतेआनंतेचेतसास
मापत्तिः क्रियतेअवाधेनतादात्म्यमाघते
तदादेहाहंकाराभावान्नासनंदुःखजनकं
अस्मिंश्चासनजयेसतिसमाध्यंतरायभू
तानप्रभवंसंगमेजयस्यादयः ४८ त
स्यैवानुनिष्पादितंफलमाह ततोद्वंद्वा
नभिघातः ४९ तस्मिन्नासनजयेसा
तिद्वंद्वैःशीतोष्णक्षुधातृष्णादिभिर्यो।

यो० सू० वृ०
४७
47

गीनाभिहन्यतइत्यर्थः आसनजयानंतरंप्रा
णायाममाह तस्मिन्सतिश्वासप्रश्वासयो
र्गतिविच्छेदःप्राणायामः ५० आसनस्थै
र्येसतितन्निमित्तकः प्राणायामलक्षणोयो
गांगविशेषोनुष्ठेयोभवति कीदृशः श्वास
प्रश्वासयोर्गतिविच्छेदलक्षणः श्वासप्रश्वा
सौक्तलक्षणौतयोः त्रेधारेचकपूरक
पूरककुंभकद्वारेणवाह्याभ्यंतरेषुगतेःप्र
वाहस्यविच्छेदोधारणंप्राणायामउच्यते
तस्यैवसुखावगमायविभज्यस्वरूपंकथय
ति सतुवाह्याभ्यंतरस्तंभवृत्तिर्देशकाल
संख्याभिःपरिदृष्टोदीर्घसूक्ष्मः ५१
वाह्यवृत्तिःश्वासोरेचकःआंतरवृत्तिःप्र

श्वासपूरकः स्तंभवृत्तिः कुंभकः तस्मिं
जलमिव कुंभे निश्चलतया प्राणोवस्था
प्यत इति त्रिविधोयं प्राणायामो देशेन का
लेन संख्यया चोपलक्षितो दीर्घसूक्ष्मसंज्ञो
भवति देशेनोपलक्षितो यथा नासाग्रद्वा
दशांतादौ नासामारभ्य द्वादशांगुलपर्य्यं
तमित्यर्थः कालेनोपलक्षितो यथा षट्त्रिं
शन्मात्रादिप्रमाणः संख्ययोपलक्षितो
यथा इयतो वारान्कृतैरेतावद्भिः श्वासप्र
श्वासैः प्रथम उद्घातो भवतीति एतद्वा
नायसंख्याग्रहणमुपात्तं उद्घातो नाभि
मूलात्प्रेरितस्य वायोः शिरस्यभिहननम्
५१ त्रीन्प्राणायामानभिधाय चतुर्थम

भिधातुमाह बाह्याभ्यंतरविषयापेक्षी
चतुर्थः ५२ प्राणस्यबाह्योविषयः द्वाद
शांतादिः आंतरोविषयःहृदयनाभिचक्रा
दिः तौद्वौविषयौआक्षिप्यपर्यालोच्ययः
स्तंभरूपोगतिच्छेदः सचतुर्थःप्राणायामः
तृतीयस्मात्कुंभकाख्याद्यमस्यविशेषः
सबाह्याभ्यंतरौविषयावपर्यालोच्यैवस
हसाततप्तोपलनिपतितजलन्यायेनयु
गपत्स्तंभवृत्त्यानिष्पाद्यते अस्यतुविष
यद्वयापेक्षकोनिरोधः अयमपिपूर्वव
द्देशकालसंख्याभिरुपलक्षितोद्रष्टव्यः
५२ चतुर्विधस्यास्यफलमाह ततः
क्षीयतेप्रकाशावरणम् ५३ तस्मात्प्रा

णायामात् प्रकाशस्य चित्तसत्वगतस्य य
दावरणं क्लेशरूपं तत्क्षीयते विनश्यती
त्यर्थः फलांतरमाह धारणासु च यो
ग्यतामनसः ५४ धारणावक्ष्यमाण
लक्षणास्तासु प्राणायामैः क्षीणदोषं म
नो यत्र यत्र धार्यते तत्र तत्र स्थिरीभवति
न विक्षेपं भजते ५४ प्रत्याहारस्य ल
क्षणमाह स्वस्वविषयासंप्रयोगे चित्त
स्य स्वरूपानुकार इवेंद्रियाणां प्रत्याहा
रः ५५ इंद्रियाणि स्वस्वविषयेभ्यः
प्रतीपमाह्रियंते ऽस्मिन्निति प्रत्याहारः
स च कथं निष्पद्यते इत्याह चक्षुरादी
नामिंद्रियाणां स्वः स्वो विषयो रूपादि

यो·सू·वृ· स्तेनसंयोगस्तदाभिमुख्येनवर्त्तनं तदभा
४९ वस्तदाभिमुख्यंपरित्यज्यस्वरूपमात्र
५१ ऽवस्थानंतस्मिंसतिचित्तमात्रानुकारी
णीन्द्रियाणिभवंति यतश्चित्तमनुवर्त्त
मानानिमधुकरराजमिवमक्षिकाःस
र्वाणींद्रियाणिप्रतीयंते अतश्चित्तनिरो
धेतानिप्रत्याहृतानिभवंति तेषांतत्स्व
रूपानुकारःप्रत्याहारःउक्तः ५५
फलमाह ततःपरमावश्यतेंद्रियाणां
५६ अभ्यस्यमानेहिप्रत्याहारेतथा
वश्यान्यायत्तानींद्रियाणिसंपद्यंते य
थाबाह्यविषयाभिमुखतांनीयमानान्य
पिनयांतीत्यर्थः तदेवंप्रथमपादोक्त

लक्षणस्यंयोगस्यांगभूतंक्लेशतनूकरा · पा·यो·वि
णफलंक्रियायोगमभिधायक्लेशानामु ०५
द्देशंस्वरूपंकारणंक्षेत्रंफलंचोक्त्वाकर्मा
णामपिभेदंकारणंस्वरूपंफलंचाभिधा
य विपाकस्यस्वरूपंकारणंचाभिहितं
ततस्त्याज्यत्वात्क्लेशादीनांज्ञानव्यति
रेणत्यागस्याशक्यत्वात् ज्ञानस्यचशा
स्त्रायत्तत्वात् शास्त्रस्यहेयाहेयकारणो
पादेयोपादानकारणत्वेनचतुर्व्यूहत्वा
त् हेयस्यचहानव्यतिरेकेणस्वरूपानि
ष्पत्तेर्हानमहितंचतुर्व्यूहंस्वस्वकारण
सहितमभिधायोपादेयकारणभूताया
विवेकख्यातेःकारणभूतानामंतरंग

यो॰सू॰वृ॰
५०
50

वहिरंगभावेन स्थितानां योगांगानां यमादीनां रूपं फलसहितं व्याकृत्य धारणापर्य्यंतानां चासनादीनां परस्परमुपकार्योपकारकभावेनावस्थितानामुद्देशमभिधाय प्रत्येकं लक्षणकारणपूर्वकं फलमभिहितं तदयं योगो यमनियमादिभिः प्राप्तबीजभावः आसनप्राणायामैरंकुरितः प्रत्याहारेण पुष्पितो। ध्यानधारणासमाधिः फलिष्यतीति व्याख्यातः साधनपादः २ इति श्रीमहाराजाधिराजश्रीभोजदेवविरचितायां राजमार्त्तंडाभिधायां पातंजलयोगशास्त्रवृत्तौ द्वितीयः साधनपादः २ प्रत्या

द्यप्रसरणादणिमादिविभूतयः भ
वंतिभवतामस्तुभूतनाथः सभूतये १
तदेवंपूर्वोद्दिष्टंधारणाद्यंगत्रयंनिर्णे
तुंसंयमसंज्ञाभिधानपूर्वकंवाह्याभ्यंत
रादिसिद्धिप्रतिपादनायलक्षयितुमुपक्र
मते तत्रधारणायाःस्वरूपमाह देशवं
धश्चित्तस्यधारणा १ देशनाभिचक्रा
दौचित्तस्यबंधोविषयांतरपरिहारेणय
स्थिरीकरणं साचित्तस्यधारणेत्युच्य
ते अयमर्थोमैत्र्यादिचित्तपरिवासितां
तःकरणेनयमनियमवताजितासनेनप
रिहृतप्राणविच्छेदेनप्रत्याहृतेंद्रियग्रा
मेणनिर्वाधेदेशेऋजुकायेनजितद्वं

यो०सू०वृ० ढेनयोगिनानानासाग्रादौसंप्रज्ञातस्य
५१ समाधेरभ्यासायचेतसः स्थिरीकरणंक
51 र्तव्यमितिधारणामभिधायध्यानमाह
तत्रप्रत्ययैकतानताध्यानम् २ तत्रतस्मि
न्देशेयत्रचित्तंधृतंतत्रप्रत्ययस्यज्ञानस्य
याएकतानताविसदृशपरिणामपरिहारे
णयदेवधारणायामालंबनीकृतंतदा
लंबनतयैवनिरंतरमुत्पत्तिःसाध्यानमि
त्युच्यते चरमंयोगांगंसमाधिमाह तदे
वार्थमात्रनिर्भासंस्वरूपशून्यमिवस
माधिः ३ तदेवोक्तलक्षणंध्यानंय
त्रार्थमात्रनिर्भासमर्थाकारसमावेशादु
द्भूतार्थरूपंन्यग्भूतज्ञानस्वरूपत्वेनस्व

रापेक्षयावहिरंगत्वमाह तदपिवहिरं
गं निर्वीजस्य ८ निर्वीजस्ययोगस्यनिरालं
वनस्यशून्यभावनाऽपरपर्य्यायस्यस
माधेरेतदपियोगांगत्रयंवहिरंगंपारं
पर्य्येणोपकारकत्वात् इदानींयोगांग
सिद्धीराख्यातुंकामःसंयमस्यविषयपरिशु
द्धिंकर्त्तुंक्रमेणपरिणामत्रयमाह व्युत्था
ननिरोधसंस्कारयोरभिभवप्रादुर्भावौ
निरोधलक्षणचित्तान्वयोनिरोधपरि
णामः ९ व्युत्थानंक्षिप्तमूढविक्षिप्ता
ख्यंभूमित्रयं निरोधःप्रकृष्टसत्वस्यां
गितयाचेतसःपरिणामः ताभ्यांव्युत्था
ननिरोधाभ्यांयोजनितौसंस्कारौतयो

यथाक्रममभिभवप्रादुर्भावौयदाभवतः
अभिभवोन्यग्भूततयाकार्यकरणासाम
र्थ्येनावस्थानं प्रादुर्भावोवर्त्तमानेऽध्वनि
व्यक्तिरूपतयावस्थानं तदानिरोधल
क्षणेचित्तस्योभयवृत्तित्वादन्वयोयःसनि
रोधपरिणामइत्युच्यते अयमर्थः यदा
व्युत्थानसंस्काररूपोधर्मस्तिरोभवति
निरोधसंस्काररूपश्चाविर्भवति धर्मिरू
पतयाचित्तमुभयत्रान्वयित्वेनावस्थितंप्र
तीयते तदासनिरोधपरिणामशब्देनाभि
धीयते चलत्वाद्गुणवृत्तस्ययद्यपिचेत
सोनिश्चलत्वंनास्तितथाप्येवंभूतःपरि
णामःस्थैर्य्यमुच्यते अस्यैवफलमाह

रूपशून्यतामिवापद्यते स समाधिरित्युच्य
ते सम्यगाधीयते एकाग्रीक्रियते विक्षेपा
न्परिहृत्य यत्र मनः स समाधिः उक्तल
क्षणस्य योगांगत्रयस्य व्यवहाराय स्वशा
स्त्रे तांत्रिकिं संज्ञां कर्तुमाह त्रयमेकत्र संय
मः ४ एकस्मिन्विषये धारणाध्यान
समाधिलक्षणं त्रितयं प्रवर्तमानं संयमसं
ज्ञया शास्त्रे व्यवह्रियते। तस्य फलमाह तज्ज
यात्प्रज्ञालोकः ५ तस्य संयमस्य जया
दभ्यासेन सात्म्यसादनात् प्रज्ञाया ज्ञात
व्यविवेकरूपाया आलोकः प्रसरो भव
ति प्रज्ञा ज्ञेयं सम्यगवभासयतीत्यर्थः
तस्योपयोगमाह तस्य भूमिषु विनियोगः

यो०सू०वृ० ६ तस्यसंयमस्यभूमिषुस्थूलसूक्ष्मालं
५२ वनभेदेनस्थितासुचित्तवृत्तिषुविनियोगः
कर्त्तव्यः अधरामधरांचित्तभूमिंजितांजि
तांज्ञात्वोत्तरस्यांभूमौसंयमःकार्य्यः न
ह्यनात्मीकृताधरभूमिरुत्तरस्यांभूमौसं
यमंकुर्वाणःफलभाग्भवति साधन
पादेयोगांगान्यष्टावुद्दिश्यपंचानांलक्ष
णंविधायत्रयाणांकथंनकृतमित्या
शंक्याह त्रयमंतरंगंपूर्वेभ्यः ७ पूर्वे
भ्योयमादिभ्योयोगांगेभ्यःपारंपर्य्येण
समाध्युपकारकेभ्योधारणादियोगांग
त्रयंसंप्रज्ञातस्यसमाधेरंतरंगंसमा
धिस्वरूपनिष्पादनात्तस्यापिसमाध्यंत

तस्यप्रशांतवाहितासंस्कारात् १० तस्य
चेतसः उक्तान्निरोधसंस्कारात्प्रशांतवा
हिताभवतिपरिहृतविक्षेपतयासदृशप्र
वाहपरिणामिचित्तंभवतीत्युक्तं निरोध
परिणाममभिधायसमाधिपरिणाम
माह सर्वार्थतैकाग्रतयोःक्षयोदयौचि
त्तस्यसमाधिपरिणामः ११ सर्वार्थताच
लत्वान्नानाविधार्थग्रहणंचित्तस्यविक्षे
पोधर्मः एकस्मिन्नेवावलंबनेसदृशप
रिणामिताएकाग्रत्वंतदपिचित्तस्यध
र्मः तयोर्यथाक्रमंक्षयोदयौ सर्वार्थ
तालक्षणस्यधर्मस्यक्षयोऽसंतमभि
भवः एकाग्रतालक्षणस्यधर्मस्यप्रा

यो॰ सू॰ वृ॰ दुर्भावोभिव्यक्तिः चित्तस्योद्रिक्तसत्वस्या
५४ न्वयितयातस्यावस्थानंससमाधिपरि
54 णामइत्युच्यते पूर्वस्मात्परिणामाद
स्यायंविशेषः तत्रसंस्कारलक्षणयोर्ध
र्मयोरभिभवप्रादुर्भावौ पूर्वस्यव्युत्था
नसंस्काररूपस्यधर्मस्याभिभव उत्त
रस्यनिरोधसंस्काररूपस्योद्भवोऽनभि
भूतत्वेनावस्थानं इहतुक्षयोदयाविति
सर्वार्थतारूपस्यविक्षेपस्याऽत्यंततिरस्का
रादनुत्पत्तिरतीतेऽध्वनिप्रवेशः क्षयः
एकाग्रतालक्षणस्यधर्मस्योद्भवोवर्त्त
मानेध्वनिप्रकटत्वं तृतीयमेकाग्रता
परिणाममाह शांतोदितौतुल्यप्रत्य

यो.सू.टी.
५५

योचित्तस्यैकाग्रतापरिणामः १२ समा
हितस्यैवचित्तस्यैवचित्तस्यैकःप्रत्ययोवृ
त्तिविशेषःशांतोऽतीतमध्वानंप्रविष्टः
अपरस्तूदितोवर्त्तमानेध्वनिस्फुरतःद्वा
वपिसमाहितचित्तस्यतुल्यावेकरूपालं
वनत्वेनसदृशौप्रत्ययोउभयत्रापिसमा
हितस्यैवचित्तस्यान्वयित्वेनावस्थानंय
सएकाग्रतापरिणामइत्युच्यतेचित्तपरि
णामोक्तंरूपंमन्यत्रातिदिशन्नाह एतेन
भूतेंद्रियेषुधर्मलक्षणावस्थापरिणा
माव्याख्याताः १३ एतेनत्रिविधोक्तेन
चित्तपरिणामेनभूतेषुस्थूलसूक्ष्मेंद्रिये
षुबुद्धिःकर्मांतःकरणाभेदेनवस्थितेषु

यो॰सू॰वृ॰
५५
55

धर्मलक्षणावस्थाभेदेनत्रिविधपरिणा
मोव्याख्यातोऽवगंतव्यः अवस्थितस्य
धर्मिणः पूर्वधर्मनिवृत्तौधर्मांतरापत्तिः
धर्मपरिणामः यथामृल्लक्षणस्यधर्मि
णःपिंडरूपधर्मपरित्यागेनघटरूपध
र्मांतरस्वीकारोधर्मपरिणामइत्युच्यते
लक्षणपरिणामोयथातस्यैवघटस्या
नागताध्वपरित्यागेनवर्त्तमानाध्वस्वी
कारस्तत्परित्यागेनवातीताध्वपरिग्र
हः अवस्थापरिणामोयथातस्यैवघट
स्यप्रथमद्वितीययोःसदृशयोःक्षण
योअन्वयित्वेनस्वतश्चलंगुणवृत्तंनाप
रिणाममात्रंक्षणमप्यास्ते ननुकोयं

धर्मीइत्याशंक्यधर्मिणोलक्षणमाह शां पा॰सू॰टि॰
तोदिताऽव्यपदेश्यधर्मानुपातीधर्मी ३५
१४ शांतायेकृतस्वस्वव्यापाराअतीतेऽ
ध्वन्यनुप्रविष्टाः उदितायेऽनागतमऽ
ध्वानंपरित्यज्यस्वस्वव्यापारंकुर्वंतिअ
व्यपदेश्यायेशक्तिरूपेणास्थीताव्यप
देष्टुंनशक्यंते यथासर्वंसर्वात्मकमित्ये
वमाशयः नियतकार्य्यकारणरूपयो
ग्यतयावच्छिन्नाशक्तिरेवेहधर्मशब्देना
भिधीयते तंत्रिविधमपिधर्मंयोऽनुप
तसनुवर्त्तते अन्वयित्वेनस्वीकरोति
सशांतोदिताऽव्यपदेश्यधर्मानुपाती
धर्मीत्युच्यते यथासुवर्णरुचकरूपध

यो० स०वृ० र्मिरूपतया सामान्यात्मना धर्मरूपतया
५६ विशेषात्मना स्थितं अनुपातीत्वेनावभास
५८
ते एकस्य धर्मिणः कथमनेकपरिणामा
इत्याशंकामपनेतुमाह क्रमान्यत्वं परि
णामान्यत्वे हेतुः १५ धर्माणामुक्तलक्ष
णानां यः क्रमस्तस्य यत्प्रतिक्षणमन्यत्वं
परिदृश्यमानं परिणामस्योक्तलक्षणस्यान्य
त्वे नानाविधत्वे हेतुर्लिंगं ज्ञापकं भवति
अयमर्थः योयं नियतः क्रमो मृच्चूर्णान्मृ
त्पिंडस्ततः कपालानि तेभ्यश्च घट इत्येवं
रूपः परिदृश्यमानः परिणामस्यान्यत्व
मावेदयति तस्मिन्नेव धर्मिणि यो लक्ष
णपरिणामस्यावस्थापरिणामस्ताम

स्यचक्रमः सोप्यनेनैवन्यायेनपरिणामान्य
त्वेगमकोऽवगंतव्यः सर्वएवभावानियतेनै
वक्रमेणप्रतिक्षणंपरिणममानाःपरि
दृश्यंते अतः सिद्धंक्रमान्यत्वात्परिणामा
न्यत्वं सर्वेषांचित्तविषयादीनांपरिणममा
नानां केचित् धर्माःप्रत्यक्षेणैवोपलभ्यं
ते यथासुखादयः संस्थानादयश्चकेचि
त्तैकांतेनानुमानगम्याः यथाधर्मसंस्का
रशक्तिप्रभृतयः धर्मिणश्चभिन्नाभि
न्नरूपतयासर्वत्रानुगमः १५ इदानी
मुक्तस्यसंयमस्यविषयदर्शनद्वारेणसि
द्धीप्रतिपादयितुमाह परिणामत्रयसं
यमादतीताऽनागतज्ञानं १६ धर्मल

क्षणावस्थाभेदेनयत्परिणामत्रयमुक्त
म् तत्रसंयमात्तस्मिन्विषयेपूर्वोक्तस्यसं
यमस्यकरणात् अतीतानागतज्ञानंयो
गिनःसमाविर्भवति इदमत्रतात्पर्यम्
अस्मिन्धर्मिणिअयंधर्मइदंलक्षणमिय
मवस्थाचानागताद्ध्वनःसमेत्यवर्त्तमानेऽ
ध्वनिस्वव्यापारंविधायातीतमध्वानंप्र
विशत्येवंपरिहृतविक्षेपतयायदासंय
मंकरोतितदायत्किंचिदतिक्रांतमनुत्पन्नं
वातत्सर्वंयोगीजानाति यतश्चित्तस्यशु
द्धसत्त्वप्रकाशरूपत्वात्सर्वार्थग्रहणसा
मर्थ्यमविद्यादिभिर्विक्षेपैरपह्रियते य
दातुतैस्तैरुपायैर्विक्षेपाःपरिह्रियंते त

दानिवृत्तमलस्येवाऽऽदर्शस्य सर्वार्थग्रह
णसामर्थ्यमेकाग्रतावलादाविर्भवति १६
सिध्यंतरमाह शब्दार्थप्रत्ययानामितरेत
राध्यासात्संकरस्तत्प्रविभागसंयमात्सर्व
भूतरुतज्ञानम् १७ शब्दः श्रोत्रेंद्रिय
ग्राह्यो नियतक्रमवर्णात्मको नियतैकार्थ
प्रतिपत्त्यवछिन्नः यदा वाक्रमरहितः स्फो
टात्मा ध्वनिसंस्कृतबुद्धिग्राह्यः उभयथा
पि पदरूपो वाक्यरूपश्च तयोरेवार्थप्रति
पत्तौ सामर्थ्यात् अर्थो जातिगुणक्रियादिः
प्रत्ययो ज्ञानं विषयाकारा बुद्धिवृत्तिः एषां
शब्दार्थज्ञानानां व्यवहारे इतरेतराध्यासा
त् भिन्नानामपि बुद्ध्येकरूपतया संपा

यो०सू०वृ०
५८
58

दनात्संकीर्णत्वं तथाहि गामानयेत्युक्तेक
श्चिद्गोलक्षणमर्थंगोत्वजात्यवच्छिन्नंसा
स्नादिमत्पिंडरूपंशब्दंचतद्वाचकंज्ञानंच
तद्ग्राहकमभेदेनैवाध्यवस्यति नत्व
स्यगोशब्दोवाचकोयंशब्दस्यवाच्यस्तयो
रिदंग्राहकंज्ञानमितिभेदेनव्यवहरति
तथाहिकोयमर्थः कोयंशब्दः किमिदंज्ञा
नमितिपृष्टः सर्वत्रैकरूपमेवोत्तरंददाति
गौरिति सयद्येकरूपतांनप्रतिपद्यते
तदाकथमेकरूपमुत्तरंप्रयच्छति एवं
तस्मिन्नवस्थितेयोयंप्रविभागः इदं
शब्दस्यतत्वंयद्वाचकत्वंनामइदमर्थ
स्ययद्वाच्यत्वं इदंज्ञानस्ययत्प्रकाश

त्वमितिश्रविभागं विधायतस्मिन्श्रविभा यो.सू.टि.
गेयः संयमं करोतितस्यसर्वेषांभूतानां ११
मृगपक्षिसरीसृपाणांयद्रुतंयः शब्दत
त्रज्ञानमुत्पद्यते अनेनाभिप्रायेणैतेनप्रा
णिनायंशब्दःसमुच्चारितइतिसर्वंजानाति
सिद्धांतरमाह संस्कारसाक्षात्करणात्पू
र्वजातिज्ञानम् १८ द्विविधाश्चित्तवास
नारूपाःसंस्काराः केचित्स्मृतिमात्रोत्पा
दनफलाः केचिज्जात्यायुर्भोगलक्षण
विपाकहेतवो यथा धर्म्माद्याख्येषुसंस्का
रेषुयदासंयमंकरोति एवंमयासोर्थो
नुभूतएवंमयासाक्रियानिष्पादितेति
पूर्ववृत्तंसर्वमनुसंदधानोभावनयैवप्रबो

धकमंतरेणोद्बुद्धसंस्कारः सर्वमतीतंस्म
रति क्रमेणसाक्षात्कृतेषूद्बुद्धेषुसंस्कारे
षुपूर्वजन्मानुभूतानपिजात्यादीन्प्रत्यक्षे
णपश्यति सिद्ध्यंतरमाह प्रत्ययस्यप
रचित्तज्ञानम् १९ प्रत्ययस्यपरचित्तस्य
केनचिन्मुखरागादिनालिंगेनगृहीतस्य
यदासंयमंकरोति तदापरकीयचित्त
स्यज्ञानमुत्पद्यते सरागमस्यचित्तंवीत
रागंवेति परचित्तगतान्सर्वानेवधर्मा
न्जानातीत्यर्थः अस्यैवपरचित्तज्ञान
स्यविशेषमाह नचतत्सालंबनंतस्याविष
यीभूतत्वात् २० तस्यपरस्ययच्चित्तंत
त्सालंबनंस्वकीयेनालंबनेनसहितंतन्न

शक्यतेज्ञातुं आलंवनस्यकेनचिल्लिंगेना
विषयीकृतत्वात् लिंगाच्चित्तमात्रंपरस्या
वगतं नतुनीलविषयमस्यचित्तंपीतविष
यमितिवायच्चनगृहीतं तत्रसंयमस्यकर्तु
मशक्यत्वान्नभवतिपरचित्तस्ययोविषयस्त
ज्ज्ञानं तस्मात्परकीयच्चित्तमालंवनरहि
तंनगृह्यतेतस्यालंवनस्यागृहीतत्वात्
चित्तधर्माःपुनर्गृह्यंतएव यदातुकिम
नेनालंवितमितिप्रणिधानंकरोति तदा
तत्संयमात्तद्विषयमपिज्ञानमुत्पद्यते ए
वंसिद्ध्यंतरमाह कायरूपसंयमात्तद्ग्राह्य
शक्तिस्तंभेचक्षुःप्रकाशासंयोगेंतर्द्धान
म् २१ कायशरीरंतस्यरूपंचक्षुर्ग्राह्यो

गुणविशेषतस्मिंल्लेतस्मिन्कायेरूपमि
तिसंयमात्तस्यरूपस्यचक्षुर्ग्राह्यत्वधर्म्म
स्यासंयोगेनतद्ग्रहणव्यापाराभावेयोगि
नोंतर्द्धानंभवति नकेनचिदसौदृश्यते
इत्यर्थः एतेनशब्दाद्यंतर्द्धानमुक्तम् २१
एतेनैवरूपाद्यंतर्धानोपायप्रदर्शनेन
शब्दादीनांश्रोत्रादिग्राह्यमंतर्द्धानमु
क्तंवेदितव्यम् सिद्ध्यंतरमाह सोपक्र
मंनिरूपक्रमंचकर्मतत्संयमादपरांत
ज्ञानमरिष्टेभ्योवा २२ आयुर्विपाकं
यत्पूर्वकृतंकर्मतद्द्विःप्रकारंसोपक्रमंनि
रुपक्रमंच तत्रसोपक्रमंयत्फलजनना
यसहोपक्रमेणकार्यकरणाभिमुखं

नवर्त्तते यथोष्णप्रदेशेप्रसारितमार्द्रंवा
सः शीघ्रमेवशुष्यति उक्तविपरीतंनिरु
पक्रमं यथातदेवार्द्रंवासः संवर्त्तितम
नुष्णंदेशेचिरेणशोषतेति तदस्मिंद्वि
धेकर्मणियः संयमंकुरोति किंममकर्म
शीघ्रविपाकंकिंचिरविपाकमिति ध्या
नदार्ढ्यादऽपरांतज्ञानमस्योत्पद्यतेऽप
रांतः शरीरवियोगस्तस्मिन् ज्ञानंअमुष्मि
न्कालेऽमुष्मिन्देशेममशरीरवियोगोभ
विष्यतीतिनिःसंशयंजानाति अरिष्टेभ्यो
वाअरिष्टानि त्रिधाऽध्यात्मिकाधिभौ
तिकाधिदैविकाभेदेन तत्राध्यात्मिका
निपिहितकर्णःकोष्ठस्यवायोर्घोषंनशृ

यो०सू०वृ०
६१
61

योति इत्येवमादीनि आधिभौतिकानि
अकस्माद्विकृतपुरुषदर्शनादीनि आधि
दैविकानि अकाल एवद्रष्टुमशक्यस्व
र्गादिपदार्थदर्शनादीनितेभ्यःशरीरवि
योगकालंजानाति यद्यप्यऽयोगिनाम
परिष्टेभ्यःप्रायेणज्ञानमुत्पद्यतेतथा
पितेषांसामान्याकारेण तत्संयमरूपं
योगिनांपुनर्नियतदेशकालतयाप्रत्य
क्षवदव्यभिचारिपरिकर्मनिष्पंदभूताः
सिद्धीःप्रतिपादयितुमाह मैत्र्यादिषुबला
नि २४ मैत्रीकरुणामुदितासुयोविहि
तःसंयमःतस्यबलानि तासांमैत्र्यादीनां
संबंधीनिप्रादुर्भवंति मैत्रीकरुणामुदि

नातथास्यप्रकर्षंगछंति यथासर्वस्यमित्र
त्वादिकमर्थंप्रतिपद्यते सिद्धांतरमाह
बलेषुहस्तिबलादीनि २५ हस्त्यादिसं
बंधिषुबलेषुकृतसंयमस्यतद्बलानिहस्त्या
दिबलान्याविर्भवंति तदयमर्थोयस्मिन्ह
स्तिबलेवायुवेगेसिंहवीर्येवातन्मयीभाव
नसंयमंकरोति तत्रतत्सर्वसामर्थ्ययुक्तत्वा
त्सर्वमस्याविर्भवतीत्यर्थः सिद्ध्यंतरमाह
प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहितविप्र
कृष्टज्ञानम् २६ प्रवृत्तिविषयवतीज्यो
तिष्मतीचप्रागुक्तातस्यांयोसावालोकः
सात्विकप्रकाशप्रसरस्तस्यनिखिलेषुविष
येषुन्यासात्तद्वासितानांविषयाणांभा

यो॰ सू॰ वृ॰
६२
68

वनात् सांतःकरणेष्विंद्रियेप्रकृष्टशक्ति
तामापन्नेषु सूक्ष्मस्य परमाण्वादेर्व्यव
हितस्य भूम्यंतर्गतस्य निधानादेर्विप्रकृ
स्य मेरुपरपार्श्ववर्त्तिनो रसायनादेर्ज्ञा
नमुत्पद्यते एतत्समानवृत्तांतं सिद्ध्यं
तरमाह भुवनज्ञानं सूर्य्ये संयमात्
२६ सूर्ये प्रकाशमये यः संयमं करोति
तस्य सप्तसु भूर्भुवःस्वः प्रभृतिषु लो
केषु यानि भुवनानि तत्तत्सन्निवेशभा
जि पुराणि तेषु यथावदस्य ज्ञानमुत्पद्य
ते पूर्वस्मिन्सूत्रे सात्त्विकप्रकाशः सा
लंबनतयोक्तः इह तु भौतिक इति विशे
षः भौतिकप्रकाशांतरालंबनद्वारे यो

वसिद्ध्यंतरमाह चंद्रे ताराव्यूहज्ञानम्
२७ ताराणांज्योतिषांयोव्यूहोविशिष्ट
सन्निवेशस्तस्मिंश्चंद्रेकृतसंयमस्यज्ञान
मुत्पद्यते सूर्यप्रकाशेनहततेजस्कात्ता
राणांसूर्येसंयमात्तज्ज्ञानेनशक्योभवि
तुमितिपृथगयमुपायोभिहितः सिद्ध्यं
तरमाह ध्रुवेतद्गतिज्ञानम् २८ ध्रु
वेनिश्चलेज्योतिषांप्रधानेकृतसंयमस्य
तासांताराणांयागतिः प्रत्येकंनियतका
लानियतदेशाच तस्याज्ञानमुत्पद्यते
इयंताराअयंग्रहइयताकालेनामुंराशि
मिदंनक्षत्रंयास्यतीतिसर्वंजानातीत्यर्थः
इदंकालज्ञानमस्यफलमित्युक्तंभवति

यो०सू०वृ०
६२
63

वाद्यासिद्धीः प्रतिपाद्यांतारः प्रतिपादयि
तुमुपक्रमते नाभिचक्रेकायव्यूहताज्ञानम्
२९ शरीरमध्यवर्तिनाभिसंज्ञकं षोड
शारंयच्चक्रं तस्मिन्कृतसंयमस्ययोगिनः
कायगतोयासोव्यूहोविशिष्टंरसमलधा
तुनाड्यादीनामवस्थानं तत्रज्ञानमुत्प
ते इदमुक्तंभवति नाभिचक्रंशरीर
स्यमध्यवर्तिसर्वतःप्रसृतानांनाड्यादी
नांअवस्थानेमूलभूतंतत्रकृतावधान
स्यसमग्रःसन्निवेशोयथावदवभाति
सिद्ध्यंतरमाह कंठकूपेक्षुत्पिपासानि
वृत्तिः ३१ कंठेगलेकूपःकंठकूपः
जिह्वायाःमूलेजिह्वातोऽधस्तात्कूप

इवकूपो गर्त्ताकारः प्रदेशः प्राणादेर्यत्स
र्शात्क्षुत्पिपासादयः प्रादुर्भवंति तस्मिन्कृ
तसंयमस्य योगिनस्तत्क्षुत्पिपासादयो नि
वर्त्तंते घंटकोऽधस्तात्स्रोतस्यैव धार्यमा
णे तस्मिन्भाविते भवत्येवंविधा सिद्धिः सि
द्ध्यंतरमाह कूर्मनाड्यां स्थैर्य्यं ३१ कंठकू
पस्याऽधस्तात् या कूर्माख्या नाडी तस्यां
कृतसंयमस्य चित्तस्य स्थैर्यमुत्पद्यते तस्या
नमनुप्रविष्टस्य चपलता न भवतीत्यर्थः ॥
यद्वा कायस्य स्थैर्य्यमुत्पद्यते न केचित्स्पंद
यितुं शक्यत इत्यर्थः सिद्ध्यंतरमाह मू
र्द्धज्योतिषि सिद्धदर्शनम् ३२ शिरःक
पाले ब्रह्मरंध्राख्यं छिद्रं प्रकाशाधारत्वा

यो० सू० वृ०
६४
64

ज्योतिर्यथा गृहाभ्यंतरस्थस्य मणेः प्र
सरंती प्रभाऽऽकुंचिताविवरप्रदेशे संघट
ते तथा हृदिस्थः सात्विकप्रकाशः प्रसृ
तस्तत्रसंपिंडितत्वं लभते तत्रकृतसंयम
स्य ये द्यावापृथिव्योरंतरालवर्तिनः सिद्धाः
दिव्याः पुरुषास्तेषामितरप्राण्यऽदृश्या
नां तस्य दर्शनं भवति तान्पश्यति तैश्च सं
भाषत इत्यर्थः सर्वज्ञत्वे उपायमाह प्रा
तिभाद्वा सर्वम् ३४ सर्वनिमित्तान
पेक्षं मनोमात्रजन्यमविसंवादिकं झ
टित्युत्पद्यमानं ज्ञानं प्रतिभा तस्यां सं
यमे क्रियमाणे प्रातिभं विवेकख्यातेः
पूर्वभावितारकं ज्ञानमुदेति यथोदे

ष्यतः सवितुः पूर्वं प्रभा प्रादुर्भवति तद्व
द्विवेकख्यातेः पूर्वं तारकं ज्ञानमाविर्भव
ति तस्मिन्सति संयमांतरानपेक्षः स
र्वं जानातीत्यर्थः सिद्धांतरमाह हृद
ये चित्तसंवित् ३५ हृदयं शरीरस्य प्र
देशविशेषस्तस्मिन्नधोमुखस्वल्पपु
ण्डरीकाभ्यंतरें तःकरणसत्वस्य स्थानं
तत्र कृतसंयमस्य स्वपरचित्तज्ञानमुत्प
द्यते स्वचित्तगताः सर्वा वासनाः पर
चित्तगतांश्च रागादीन्जानातीत्यर्थः सि
द्धांतरमाह सत्वपुरुषयोरसंतासंकी
र्णयोः प्रत्ययाविशेषोभोगः परार्थोन्य
स्वार्थसंयमात्पुरुषज्ञानम् ३६ सत्वं

यो०सू०वृ०
६५
65

प्रकाशसुखात्मकंप्राधानिकःपरिणा
मविशेषःपुरुषोभोक्ताधिष्ठातृरूपस्तयो
र्भोग्यभोक्तृस्वरूपत्वाच्चेतनाचेतनत्वा
च्चात्यंताऽसंकीर्णत्वंभिन्नत्वमित्यर्थः
तयोर्यःप्रत्ययस्याविशेषोभेदेनाप्र
तिभासनात्तस्मात्सत्वस्यैवकर्तृताप्रत्य
येनयासुखदुःखसंवित्साभोगःसत्त
त्वस्यस्वात्मनैरपेक्ष्येणपरार्थःपुरुषा
र्थःतस्मादन्योयःस्वार्थःपुरुषस्वरू
पमात्रालंबनेपरित्यक्ताहंकारेसत्वेयाचि
च्छायासंक्रांतिस्तत्रकृतसंयमस्यपुरुष
विषयंज्ञानमुत्पद्यते तदेवंरूपंस्वालं
बनंसत्वनिष्ठंपुरुषोजानातिनपुनः

पुरुषो ज्ञाता ज्ञानस्य विषयभावमापद्यते यो०सू०टि०
ज्ञेयत्वापत्तेः ज्ञातृज्ञेयत्वयोश्चासंत ३३
विरोधादस्यैव संयमस्य फलमाह ततः
प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जा
यंते ३६ ततः पुरुषसंयमादभ्यस्यमा
नात् व्युत्थितस्यापि ज्ञानानि जायंते तत्र
प्रातिभं पूर्वोक्तं ज्ञानं तस्याविर्भावनात् सू
क्ष्मादिकमर्थं पश्यंति श्रावणं श्रोत्रेंद्रि
यजं ज्ञानं तस्माच्च प्रकृष्टाद्दिव्यं दिवि भ
वं शब्दं जानाति वेदना स्पर्शनेंद्रियजं ज्ञा
नं वेद्यते अनयेति कृत्वा तांत्रिक्या संज्ञया
व्यवह्रियते तस्माद्दिव्यस्पर्शविषयं ज्ञान
मुत्पद्यते आदर्शश्चक्षुरिंद्रियजं ज्ञानं

आसमंताद्दृश्यतेऽनुभूयते रूपमनेने
तिकृत्वा तस्य प्रकर्षो दिव्यं रूपज्ञानमु
त्पद्यते आस्वादो रसनेन्द्रियजं ज्ञानं आ
स्वाद्यतेऽनेनेति कृत्वा तस्मिन्प्रकृष्टे दि
व्ये रसे संविदुपजायते वार्त्ता गंधसंवित्तिः
वृत्ति शब्देन तांत्रिक्या परिभाषया घ्राणेंद्रि
यमुच्यते वर्त्तते गंधविषय इति कृत्वा
वृत्ते घ्राणेंद्रियाज्जाता या वार्त्ता गंधसं
वित्तिः तस्यां प्रकृष्यमाणायां दिव्यो गं
धोनुभूयते एतेषां फलरूपविशेषाणां वि
षयविभागमाह ते समाधावुपसर्गा
व्युत्थाने सिद्धयः ३७ ते प्राक्प्रतिपादि
ताः फलविशेषाः समाधौ प्रकर्षंगच्छ

तः उपसर्गाः उपद्रवा विघ्नाः तत्रहर्ष
भयादिकरणेनसमाधिशिथलीभवति
व्युत्थानेपुनर्व्यवहारदशायांविशिष्टफ
लदायकत्वात्सिद्धयोभवंति सिद्ध्यंतर
माह बंधकारणशैथिल्यात्प्रचारसंवेद
नाच्चचित्तस्यपरशरीरप्रवेशः ३८ व्या
पकत्वादात्मचित्तयोर्नियतकर्मवशादे
वशरीरांतर्गतयोरेवभोक्तृभोग्यभावे
नसंवेदनमुत्पद्यते सएवचशरीरबंध
इत्युच्यते तद्यदासमाधिवशाद्बंधका
रणंधर्माधर्माख्यंकर्मशिथिलंभवति
तानवमापद्यते चित्तस्यचयोसौप्रचा
रोहृदयप्रवेशादिंद्रियद्वारेणविष

यो॰सू॰वृ॰
६७
67

याभिमुख्येनप्रसरतस्तस्यसंवेदनंज्ञानं
चित्तवहानाडी अनयाचित्तंवहतिइयं
चरसप्राणादिवहाभ्योनाडीभ्योविलक्ष
णाइतिस्वपरशरीरयोर्यदाशरीरस्य
संचारंजानाति तदापरकीयंमृतंजी
वच्छरीरंवाचित्तसंचारद्वारेणप्रविशति
चित्तंचपरशरीरेप्रविशदिंद्रियाण्यनु
वर्त्तते मधुकरराजमिवमक्षिकाः अ
तःपरशरीरंप्रविष्टोयोगीस्वशरीरवत्ते
नव्यवहरति यतोव्यापकयोश्चित्तपुरु
षयोर्भोगसंकोचेमाभूत्तत्रकर्मकार
णं तच्चेत्समाधिनाक्षिपितं तदास्वा
तंत्र्यात् सर्वत्रैवभोगनिष्पत्तिः सि

ध्यंतरमाह उदानजयाज्जलपंककंटका
दिष्वसंगउत्क्रांतिश्च ४० समस्तानामिं
द्रियाणांतुषज्वालावत् यायुगपदुत्थिता
वृत्तिःसाजीवनशब्दवाच्यातस्याःक्रियाभे
दात्प्राणापानादिसंज्ञाभिर्व्यपदेशः तत्र
हृदयान्मुखनासिकादिद्वारेणवायोप्र
णयनात्प्राणइत्युच्यते नाभिप्रदेशात्पा
दांगुष्ठपर्यंतमपनयनादपानः नाभि
प्रदेशंपरिवेष्ट्यसमंतान्नयनात्समानः
कृकाटिकादेशादाशिरोवृत्तेरुन्नयना
दुदानः व्याप्यनयनात्सर्वशरीरव्या
पीव्यानः उदानस्यसंयमद्वारेणज
यादितरेषांवायूनांनिरोधादूर्ध्वगति

यो०सू०वृ०
६८
68

तेन जलेमहानद्यादौमहतिचाकर्द्दमेती
क्ष्णेषुकंटिकेषुवानसज्जतेतिलघुत्वा
तूलपिंडवज्जलादावपिनिमज्जन्नुपरि
तरत्याप्लुतीत्यर्थः सिद्ध्यंतरमाह समा
नजयाज्ज्वलनम् ४१ अग्निमावेष्ट्यव्यव
स्थितस्यसमानाख्यस्यवायोर्जयात्तंप्रयत्ने
नवशीकरणान्निरावरणस्यअग्नेरुद्भूत
तेजसाज्वलन्निवयोगीप्रतिभाति सिद्ध्यं
तरमाह श्रोत्राकाशयोः संबंधसंय
माद्दिव्यश्रोत्रं ४२ श्रोत्रंशब्दग्राहक
माहंकारिकमिंद्रियमाकाशंव्योमश
ब्दतन्मात्रकार्यंतयोःसंबंधोदेशदेशि
भावलक्षणः तस्मिन्कृतसंयमस्ययो

गिनो दिव्यं श्रोत्रं प्रवर्त्तते युगपत्सूक्ष्म
व्यवहितविप्रकृष्टशब्दग्रहणसमर्थो भव
तीत्यर्थः सिद्ध्यंतरमाह कायाकाशयोः
संवंधसंयमाल्लघुतूलसमापत्तेश्चाका
शगमनम् ४२ कायः पांचभौतिकंश
रीरं तस्याकाशेनावकाशदायकेन यः सं
वंधस्तत्र संयमं विधाय लघुनि तूलादौ
समापत्तिं तन्मयीभावलक्षणां तां विधाय
प्राप्तात्यंतलघुभावो योगी प्रथमं यथा
रुचि भुवि संचारपाक्रमेणोर्णनाभतंतु
जालेन संचरमाणः आदित्यरश्मिभि
श्च विहरन् यथेष्टमाकाशेन गच्छति
सिद्ध्यंतरमाह वहिरकल्पिता वृत्तिर्म

यो०सू० वृ०
६९
69

हाविदेहाविदेहाततः प्रकाशावरणक्ष
यः ४४ शरीराद्बहिर्यामनसः शरीर
नैरपेक्ष्येणवृत्तिः सामहाविदेहानाम
विगतशरीराहंकारदार्ढ्यद्वारेणोच्य
ते ततस्तस्यांकृतात्संयमात्प्रकाशाव
रणाक्षयः सात्विकस्यचित्तस्ययः प्रका
शावरणक्षयः ४४ शरीराद्बहिर्याम
नसः शरीरनैरपेक्ष्येणवृत्तिः सामहा
विदेहानामविगतशरीराहंकारदार्ढ्य
द्वारेणोच्यते ततस्तस्यांकृतात्संयमात्प्र
काशावरणक्षयः सात्विकस्यचित्त
स्ययः प्रकाशस्तस्ययदावरणं क्लेश
कर्मादितस्यक्षयः प्रविलयोभवति

अयमर्थः शरीराहंकारेस्मतियामन
सोवहिर्वृत्तिस्साकल्पितेत्युच्यते यदा
पुनः शरीराहंकारभावंपरित्यज्यस्वा
तंत्र्येणमनसोवृत्तिः सालकल्पितात्र
स्यांसंयमात् योगिनः सर्वैचित्तमलाः
क्षीयंते तदेवं पूर्वोक्तविषयाःपरंतवि
षयामध्यमवाश्चसिद्धीःप्रतीपाद्यानं
तरंभुवनज्ञानादिरूपाबाह्याःकायव्यू
हादिरूपाआभ्यंतराः परिकर्मभूता
श्चमैत्र्यादिषुबलानीसेवमाद्याः समा
धुपयोगिनीश्चांतः करणबहिःक
रणलक्षणेंद्रियभवाः प्राणादिवायु
भवाश्चसिद्धीश्चितदार्ल्यीयसमाधेः

समाश्वासोऽस्यतयेप्रतिपाद्येदानींस्वद
र्शनोपयोगिसवीजनिर्वीजसमाधि
सिद्धये विविधोपायदर्शनायाह
स्थूलस्वरूपसूक्ष्मान्वयार्थवत्वसंय
माद्भूतजयः ४४ पंचानांपृथिव्या
दीनांभूतानांयेपंचावस्थाविशेषरूप
धर्माः स्थूलत्वादयस्तत्रकृतसंयमस्य
भूतजयोभवति भूतानिवश्यान्यस्य
भवंतीत्यर्थः तथाहि भूतानांपरिदृ
श्यमानंविशिष्टाकारवत्स्थूलंरूपं
स्वरूपंचैषांयथाक्रमंकाठिन्यस्नेहो
ष्णताप्रेरणावकाशदानलक्षणं सू
क्ष्मंचयथाक्रमंभूतानांकारणत्वेना

वस्थितानि गंधादितन्मात्राणि अन्व
यिनो गुणाः प्रकाशप्रवृत्तिस्थितिरू
पतया सर्वत्रैवान्वयित्वेन समुपलभ्यंते
अर्थवत्वं तेष्वेव गुणेषु भोगापवर्गसंपा
दनाख्या शक्तिस्तदेवं भूतेषु पंचसूक्त
धर्मलक्षणावस्थाभिन्नेषु प्रत्यवस्थं संय
मं कुर्वन् योगी भूतजयी भवति तद्यथा
प्रथमं स्थूलरूपे संयमं विधाय तदनु
स्वरूपे इत्येवं क्रमेण तस्य कृतसंयम
स्य संकल्पानुविधायिन्यो वत्सानुसारि
ण्य इव गावो भूतप्रकृतयो भवंति ४५
तस्यैव भूतजयस्य फलमाह ततोणि
मादिप्रादुर्भावः कायसंपत्तद्धर्मान

यो॰सू॰वृ॰
५१
७।

निघातश्च ॥४५॥ अणिमापरमाणुरूपा
पत्तिः महिमामहत्त्वं लघिमालघुत्वं
तूलपिंडवत् लघुत्वप्राप्तिः गरिमागु
रुत्वं प्राप्तिरंगुल्यग्रेणाचंद्रादिस्पर्शन
शक्तिता प्राकाम्यमिच्छानभिघातः श
रीरांतःकरणेश्वरत्वंईशित्वं सर्वत्रप्रभ
विष्णुतावशित्वं सर्वाण्येवभूतानिअ
नुगामित्वात्तदुक्तंनातिक्रामंति यत्र
कामावसायित्वं यत्रकामावसायोय
स्मिन् विषयेऽस्यकामःस्वेच्छाभवति
तस्मिन्विषयेयोगिनोऽवसायोभवति
तंविषयंस्वीकारद्वारेणाभिलाषसमाप्ति
समर्पयंतनयतीत्यर्थः तएतेऽणिमा

घाः समाध्युपयोगिभूता अथात्र योगि
नः प्रादुर्भवंति यथा परमाणुत्वं प्राप्तो
वज्रादीनप्यंतः प्रविशति एवं सर्वत्रा।
यो ऽयं एते ऽणिमादयो ऽष्टौ गुणा महासि
द्धय उच्यंते कायसंपत वक्ष्यमाणगु
णां प्राप्नोति तद्धर्मानभिघातश्च तस्य
कायस्य ये धर्मा रूपादयस्तेषामभिघा
तो नाशो नास्य कुतश्चिदपि भवति ना
स्य रूपमग्निर्दहति न च वायुः शोषयति
इत्यादि योऽयं ४६ कायसंपदमाह
रूपलावण्यबलवज्रसंहननत्वादि
नि कायसंपत् ४७ रूपलावण्यब
लानि प्रसिद्धानि वज्रसंहननं वज्रवत्

यो॰सू॰वृ॰
~~२२~~

कठिनासंहतिरस्य शरीरे भवतीत्यर्थः
इति कायस्याविर्भूतसंपत् ४७ एवं
भूतजयमभिधाय प्राप्तभूमिकस्येंद्रि
यजयमाह ग्रहणस्वरूपास्मिता‌ऽ
न्वयार्थवत्वसंयमादिंद्रियजयः ४८
ग्रहणमिंद्रियाणां विषयाभिमुखी वृ
त्तिः स्वरूपं सामान्येन प्रकाशकत्वं अ
स्मिताहंकारानुगमः अन्वयार्थवत्वे च
पूर्ववत् एषामिंद्रियाणामवस्था पंचके
षु पूर्ववत्संयमं कृत्वा इंद्रियजयी भवति
४८ तस्य फलमाह ततो मनोजवित्वं
विकरणभावः प्रधानजयश्च ४९ श
रीरस्य मनोवदनुत्तमो गतिलाभो मनो

नवित्वं कायनिर्पेक्षाणामिंद्रिणावृत्तिला
भोविकरणभावः सर्ववशित्वंप्रधानजयः
एताःसिद्धयो जितेंद्रियस्यप्रादुर्भवंति ता
श्चास्मिन्शास्त्रेमधुप्रतिकाइत्युच्यंते
यथामधुनएकदेशोपिस्वदते तथाप्र
येकमेताः सिद्धयःस्वदंतइतिमधुप्रती
काः ४९ इंद्रियजयमभिधायांतःक
रणःजयमाह सत्वपुरुषान्यताख्या
तिमात्रस्यसर्वभावाधिष्ठातृत्वंसर्वज्ञात
त्वंच ५० तस्मिंशुद्धसात्विकपरिणा
मेकृतसंयमस्ययासत्वपुरुषयोरुपप
द्यते विवेकख्यातिर्गुणानांकर्तृत्वाभिमा
नशिथलीभावस्वरूपा तन्महात्म्यात्

यो०सू०वृ०
७३
73

त्रैवावस्थितस्य योगिनः सर्वभावाधि
ष्ठातृत्वं सर्वज्ञातृत्वं च समाधिर्भवति
सर्वेषां गुणपरिणामानां भावानां स्वा
मिवदाक्रमणं सर्वभावाधिष्ठातृत्वं तेषा
मेव च शान्तोदिताव्यपदेश्य धर्मित्वेन स्थि
तानां यथावद्विवेकजं ज्ञानं सर्वज्ञातृत्वं
एतस्यां चास्मिन् शास्त्रे परस्यां वशीका
रसंज्ञायां प्राप्तायां विशोका नाम सिद्धि
रित्युच्यते ५० क्रमेणानुभूमिकांतरमा
ह तद्वैराग्यादपि दोषबीजक्षये कैव
ल्यं ५१ तस्यामपि विशोकायां सिद्धौ
यदा वैराग्यमुत्पद्यते योगिनस्तदा तस्मा
द्दोषाणां रागादीनां यद्बीजं अविद्या तस्याः

क्षये निर्मूले कैवल्यं आत्यंतिकी दुःखनि ॰यो॰सू॰टि॰
वृत्तिः पुरुषस्य गुणानामधिकारसमा ४८
प्तौ स्वरूपनिष्ठत्वं ५१ अस्मिन्नेव समा
धौ स्थित्युपायमाह स्थान्युपनिमंत्रणे
संगस्मयाऽकरणं पुनरनिष्टप्रसंगात्
५२ चत्वारो योगिनो भवंति तत्राभ्यास
वान्प्रवृत्तमात्रज्योतिः प्रथमः ऋतंभ
रप्रज्ञो द्वितीयः भूतेंद्रियजयी तृतीयः
अतिक्रांतभावनीयश्चतुर्थः तत्र चतुर्थ
स्य समाधेः संजातसप्तविधप्रांतभूमि
कस्यासां मधुमती संज्ञां भूमिकां साक्षा
त्कुर्वतः स्थानिनो देवा उपनिमंत्रयिता
रो भवंति दिव्यस्त्रीरसायनादिकमुप

कपंतीति तस्मिन् उपनिमंत्रणेनानेन
संगः कर्त्तव्यः नापिस्मयकर्त्तव्यः सं
गतिकरणेपुनर्विषयभोगेपततिस्मय
करणेकृतकसमात्मानंमन्यमानोन
समाधावुत्सहते अतः संगस्मययोस्त
नवर्जनंकर्त्तव्यं ५२ अस्यामेवफल
भूतायांविवेकख्यातौपूर्वोक्तसंयमव्यति
रिक्तमुपायांतरमाह क्षणतत्क्रमयोः
संयमाद्विवेकजंज्ञानं ५३ क्षणः सर्वो
त्सः कालावयवोयस्यकलाप्रविभक्तुं
नशक्यते तथाविधानांकालक्षणा
नांयः क्रमः पौर्वापर्येणपरिणामस्त
त्रसंयमात्प्रागुक्तंविवेकजंज्ञानंमुत्प

घते अयमर्थः अयंकालक्षणो ऽमुष्मा
कालक्षणादुत्तरोयमस्मात्पूर्व इति
एवंविधेक्रमेकृतसंयमस्यात्यंतसूक्ष्मे
पिक्षणक्रमेयदाभवतिसाक्षात्कार
स्तदान्यदपिसूक्ष्मंमहदादिसाक्षात्क
रोतीतिविवेकज्ञानोत्पत्तिः ५३ अ
स्यैवसंयमस्यविषयविवेकोपयोगमा
ह जातिलक्षणदेशैरन्यतानवछेदात्तु
ल्ययोस्ततःप्रतिपत्तिः ५४ पदार्था
नांभेदहेतवोजातिलक्षणदेशाभवंति
क्वचिद्भेदहेतुर्जातिर्यथागौरियंमहषी
यमिति जात्यातुल्ययोर्लक्षणंभेदहे
तुरियंकर्बुरा इयमरुणेति जात्याल

यो०सू०वृ० क्षणेनचाभिन्नयोर्भेदहेतुर्देशोदृष्टः

७५ यथातुल्यप्रमाणयोरामलकयोर्भि

75 न्नदेशस्थितयोः यत्रपुनर्भेदोवधार

यितुंनशक्यते यथाएकदेशस्थितयोः

शुक्लयोः पार्थिवयोः परमाण्वोस्तथा

विधविषयेभेदायकृतसंयमस्यभेदेन

ज्ञानमुत्पद्यते ततस्तदभ्यासात्सूक्ष्मा

ण्यपितत्वानिभेदेनप्रतिपद्यंते एतदु

क्तंभवति यत्रकेनचिदुपायेनभेदोना

वधारयितुंशक्यस्तत्रसंयमादेव

भेदप्रतिपत्तिः ततःसूक्ष्माणांतत्वा

नांबुद्ध्यादीनांविवेकेनप्रतिपत्तिः

५४ उक्तस्यविवेकजन्यज्ञानस्य

संज्ञां विषयस्वभावं व्याख्यातुमाह तार
कं सर्वविषयं सर्वथाविषयमक्रमं चेति वि
वेकजं ज्ञानं ५५ उक्तसंयमबलादंत्याया
म्भूमिकायामुत्पन्नं ज्ञानं तारयति अगा
धात्संसारसागरात् योगिनं इत्यन्वर्थिक्या
संज्ञया तारकमित्युच्यते अस्य विषय
माह सर्वविषयमिति सर्वाणि तत्वा
नि महदादीनि विषयो यस्येति सर्वविष
यं स्वभावश्चास्य सर्वथा विषयं सर्वाभि
रवस्थाभिः स्थूलसूक्ष्मादिभेदे
नैतैस्तैश्च परिणामैः सर्वेण प्रकारेण
ऽवस्थितानि तत्वानि विषयो यस्येति स
र्वथाविषयं स्वभावांतरमाह अक्रमं

यो॰ सू॰ वृ॰
७६
76

चेति निःशेषनानाऽवस्थापरिणाम
न्यूनाधिकभावग्रहणे नास्यक्रमो
विद्यतेइत्यक्रमं सर्वकरतलामलक
वद्युगपत् पश्यतीत्यर्थः ५५ तस्मा
त्त्वविवेकज्ञानात् तारकाख्यात् ज्ञाना
त् किंभवतीत्याह सत्वपुरुषयोःशुद्धि
साम्येकैवल्यं ५६ सत्वपुरुषौउक्त
लक्षणौतयोःशुद्धिसाम्येकैवल्यंचि
तसत्वस्यसर्वकर्तृत्वाभिमाननिवृत्या
स्वकारणेअनुप्रवेशः शुद्धिः पुरुषस्य
शुद्धिरुपचारितभोगाभावः इतिद्वयोः
समानायांशुद्धौपुरुषस्यकैवल्यमुत्य
द्यतेमोक्षोभवतीत्यर्थः ५६ तदेव

मंतरंगयोगांगत्रयमभिधायतस्यसं
यमसंज्ञांकृत्वा संयमस्यचविषयदर्श
नार्थंपरिणामत्रयमुपपाद्यसंयमब
लोत्पद्यमानाः पूर्वांतापरांतामध्यभा
वाःसिद्धीरूपदर्श्यसमाध्याश्वासोत्प
तयेवाह्याभुवनज्ञानादिरूपा अभ्यं
तराश्चकायव्यूहज्ञानादिरूपाः प्रदर्श्य
समाध्युपयोगायेंद्रियजयप्राणजया
यादिपूर्विकाः परमपुरुषार्थसिद्धये
यथाक्रममवस्थासहितजयेंद्रियस
त्वजयोद्भवाश्चव्याख्यायविवेकज्ञा
नोत्पत्तये तांस्तानुपायानुपन्यस्यता
रकस्यसर्वसमाध्यवस्थापर्यंतमव

यो०सू०वृ० स्यस्वरूपसमभिधायतत्समापत्तेः कृ
७७ ताधिकारस्यचित्तसत्वस्यस्वकारणानु
77 प्रवेशात्कैवल्यमुत्पद्यतेइत्यभिहितमि
ति निर्णीतोविभूतिपादस्तृतीयः इ
तिश्रीमहाधिराजश्रीभोजदेवविरचि
तायांराजमार्त्तंडाभिधायांपातंजलयोगशास्त्रवृत्तौविभूतिपादस्तृतीयः
समाप्तः ३ यदात्रयैवकैवल्यंविनोपा
यैः प्रजायते तमेकमजमीशानंचिदा
नंदमयंस्तुमः १ इदानींविप्रतिपत्ति
समुत्थितभ्रांतिनिराकरणेनयुक्त्याकै
वल्यस्वरूपावस्थापनायकैवल्यपादो
यमारभ्यते तत्रेयाः पूर्वमुक्ताः सिद्ध

द्धयस्तासांनानाविधजन्मादिनिमित्तका
रणप्रतिपादनद्वारेणैवबोधयति या
तताः सिद्धयः सर्वाः पूर्वजन्माभ्यस्त
समाधिबलाज्जन्मादिनिमित्तमात्रवे
नाभिव्यप्रवर्तंते ततश्चानेकभवसाध
नसाध्यस्यसमाधेर्नक्षतिरस्तीसाश्वा
सोत्साहनायसमाधिसिद्धेश्चप्राधान्य
ख्यापनार्थंकैवल्योपयोगार्थंवा
ह जन्मौषधिमंत्रतपःसमाधिजाः
सिद्धयः १ काश्चनजन्मनिमित्ता
एवसिद्धयः यथापक्ष्यादिनामाका
शगमनादयः यथावाकपिलमहर्षिप्र
भृतीनांजन्मसमनंतरमेवोपजायमा

यो०सू०वृ० नाग्नानारयः सांसिद्धिकाः गुणाः औ
७८ षधिसिद्धिर्यथा पातालादौ रसायना
78 भ्युपयोगात् मंत्रसिद्धिर्यथा मंत्रजपात्के
षांचिदाकाशगमनादिः तपःसिद्धिर्यथा
विश्वामित्रादीनां समाधिसिद्धिर्यथा प्राक्
प्रतिपादिताः एताः सिद्धयः पूर्वज
न्मनिक्षपितक्लेशानामेवोपजायंते
तस्मात्समाधिसिद्धावितरान्यासां सिद्धीनां
समाधिरेव जन्मांतराभ्यस्तः कारणं
मंत्रादीनितु निमित्तमात्राणि ननु नंदी
श्वरादीनां जात्यादिपरिणामोऽस्मिन्ने
व जन्मनि दृश्यते तत्कथं जन्मांतराभ्य
स्तस्य समाधेः कारणत्वमुच्यते इत्या

शंकयाह जात्यंतरपरिणामः प्रकृत्यापू
रात् २ योयमिहैवजन्मनिनंदीश्वरादी
नांसोत्रादिपरिणामःसप्रकृत्यापूरा
त् पाश्चात्याएवहिप्रकृतयोऽस्मिन्
जन्मनिविकारानापूरयंति जात्यंतराका
रेणपरिणामयंति ननुचधर्मादय
स्तत्रक्रियमाणाउपलभ्यंतेतत्कथंप्रकृ
तीनामापूरणेकारणत्वमित्याह नि
मित्तमप्रयोजकंप्रकृतीनांवरणभेद
स्तुततःक्षेत्रिकवत् ३ निमित्तंधर्मा
दितत्प्रकृतीनामर्थांतरपरिणामेनप्र
योजकं नहिकार्येणकारणंप्रवर्त्तते
कुतःतर्हितस्यधर्मादेर्व्यापारइत्याह

॰पा॰प्र॰टि
१८

वरणभेदस्तु ततः क्षेत्रिकवत् ततः त
स्मादनुष्ठीयमानाद्धर्मादेर्यद्वरणमा
वरकमधर्मादि तस्यैव विरोधित्वाद्भे
दः क्षयः क्रियते तस्मिन्प्रतिबंधके
क्षीणे प्रकृतयः स्वयमभिमतकार्या
यप्रभवंति दृष्टांतमाह क्षेत्रिकवत्
यथा क्षेत्रिकः कृषीवलः केदारात्केदा
रांतरं जलं निनीषुः जलप्रतिबंधका
वरणभेदमात्रं करोति तस्मिन्भिन्ने
जलं स्वयमेव प्रसरद्रूपं परिणामं
गृह्णाति न तु जलप्रसरणे तस्य क
श्चिद्व्यापारः एवं धर्मादेर्बोद्धव्यं य
दा साक्षात्कृततत्त्वस्य योगिनो युगप

तकर्मफलभोगायात्मीयनिरति
शयविभूत्यनुभवाययुगपदनेक
शरीरनिर्मित्सोपजायते तदाकुतस्ता
निचित्तानिप्रभवंतीत्याह निर्माणचि
त्तान्यस्मितामात्रात् ४ योगिनः
स्वयंनिर्मितेषुकायेषुयानिचित्तानि
तानिमूलकारणादस्मितामात्राद
वतदिच्छयाप्रसरंति अग्नेर्विस्फुलिं
गाइवयुगपत्परिणमंते ननुबहू
नांचित्तानांभिन्नाभिप्रायत्वान्नैकका
र्यकर्तृत्वंस्यादित्यतआह प्रवृत्तिभे
देप्रयोजकंचित्तमेकमनेकेषाम्
५ तेषामनेकेषांचेतसांप्रवृत्ति

यो॰सू॰वृ॰
८०
80

भेदेव्यापारनानात्वेएकंयोगिनश्चित्तं
प्रयोजकंप्रेरकं अधिष्ठातृत्वेनतेन
नभिन्नंमंतव्यं अयमर्थः यथास्वी
येशरीरेमनश्चक्षुःपाण्यादीनियथे
च्छंप्रेरयति अधिष्ठातृत्वेन तथाका
यांतरेष्वपीति जन्मादिप्रभवत्वात्
सिद्धीनांचित्तमपितत्प्रभवंपंचविधमे
व ततोजन्मादिप्रभवाच्चित्तात् समा
धिप्रभवस्यवैलक्षण्यमाह तत्रध्या
नजमनाशयं ६ ध्यानजंसमाधिजंय
च्चित्तंतत्पंचसुमध्येऽनाशयंकर्मवास
नारहितमित्यर्थः यथेतरचित्तेभ्योयो
गिनश्चित्तंक्लेशादिरहितंविलक्षणं

तथा कर्मापि विलक्षणमित्याह कर्माशु
क्लकृष्णं योगिनस्त्रिविधमितरेषां ७
शुभफलदं कर्म यागादि शुक्लं अशुभफलं
दं ब्रह्महत्यादि कृष्णं उभयसंकीर्णं शुक्ल
कृष्णं तत्र शुक्लं कर्म विचक्षणानां दान
तपःस्वाध्यायादिमतां पुरुषाणां कृष्णं
कर्म नारकिणां शुक्लकृष्णं मनुष्याणां
योगिनां तु संन्यासवतामिव एवंविध
कर्मविलक्षणं यत्फलत्यागानुसंधानेनै
वानुष्ठानान्न किंचित्फलमारभते अस्यै
व कर्मणः फलमाह ततस्तद्विपाकानु
गुणानामेवाभिव्यक्तिर्वासनानाम्
८ इह हि द्विविधाः कर्मवासनाः स्मृ

यो॰ सू॰ वृ॰
८१
8

तिमात्रफलाः जात्यायुर्भोगफलाश्च
तत्रजात्यायुर्भोगफलाएकानेकजन्म
भवास्तनेनपूर्वमेवंकृतनिर्णयाः
यास्तुस्मृतिमात्रफलास्ताः ततः कर्मणः
येनकर्मणायादृक्शरीरमारब्धंदे
वमनुष्यतिर्यगादिभेदेनतस्यविपा
कस्यअनुगुणाअनुरूपावासनास्ताए
मेवतस्मादभिव्यक्तिंवासनानांभवति
अयमर्थः येनकर्मणापूर्वंदेवता
दिशरीरमारब्धंजात्यंतरशतव्यव
धानेनपुनस्तथाविधस्यैवशरीरस्यारं
भेतदनुरूपाएवस्मृतिफलाःवा
सनाःप्रकटीभवंति लोकांतरेष्वा

थैषु तस्य स्मृत्यादयो जायंते तदंतरास्तु ससो ०पु०अ०टि
पिन्यस्भूतास्तिष्ठंति नतस्यां दशायां ८३
नारकादिशरीरस्योपभोगभवावासना
भिव्यक्तिमायांति आसामेव वासनानां
कार्यकारणभावानुपपत्तिमाशंक्यस
मर्थयितुमाह जातिदेशकालव्यवहिता
नामप्यानंतर्यं स्मृतिसंस्कारयोरेकरूप
त्वात् ९ इह नानायोनिषु भ्रमतां संसा
रिणां काश्चिद्योनिमनुभूय यदा योन्यंत
रसहस्रव्यवधानेन पुनस्तामेव योनिं प्र
तिपद्यंते तदा तस्यां पूर्वानुभूतायां योनौ
तथाविधशरीरादिव्यंजकापेक्षया यावं
सनाः प्रकटीभूता आसंस्तास्तथावि

धर्म्मव्यंजकाभावात्तिरोभूताः पुनस्तथा
विधव्यंजकशरीरादिलाभेप्रकटीभ
वंति जातिदेशकालव्यवधानेपिता
सांस्वानुरूपस्मृत्यादिफलसाधनेआ
नंतर्यंनैरंतर्यमेव कुतः स्मृतिसंस्का
रयोरेकरूपत्वात् तथाहि अनुष्ठी
यमानात्कर्मणश्चित्तसत्वेवासनारूप
संस्कारः समुत्पद्यते सचस्वर्गनरका
दीनांफलानामांकुरीभावः कर्मणां
वायागादीनांशक्तिरूपतयावस्थानं
कर्तुर्वातथाविधभोगभोक्तृत्वरूपंसा
मर्थ्यंततः संस्कारादनुस्मृतिः स्मृते
श्चसुखदुःखोपभोगस्तदनुभवाच्चपु

नरापिसंस्कारस्मृत्यादयः एवंसतियस्य ०६.५.०१३
स्मृतिसंस्कारयोर्भिन्नाः तस्यानंत ६३
र्याभावेदुर्लभः कार्यकारणभावः अ
स्माकंतुयदानुभवएवसंस्कारीभवति सं
स्कारश्चस्मृतिरूपतयापरिणमतेतदैक
स्यैवचित्तस्यानुसंधातृत्वेनस्थितत्वात् का
र्यकारणभावोनदुर्घटः भवतांनंतर्यका
र्यःकारणभावश्चवासनानां यदातूभय
ममेवानुभवः प्रवर्तेततदा किंवासनानि
मित्तकं उत निर्निमित्तक इति शंकामपनेतु
माह तासामनादित्वमाशिषोनित्यत्वा
त् १० तासांवासनानामनादित्वंनवि
द्यतेआदिर्यासांतासांभावस्तत्वं आ

सामादिर्नास्तीत्यर्थः कुत इत्यत आह
आशिषो नित्यत्वात् येयमाशीर्महामो
हरूपा सदैव सुखसाधनानि मे भूया
सुः मा कदाचन तैर्वियोगो मम भूयादि
ति यः संकल्पविशेषो वासनानां कार
णं तस्य नित्यत्वादनादित्वमित्यर्थः
एतदुक्तं भवति कारणसंनिहितत्वा
दनुभवसंस्कारादीनां कार्योन्मुखप्रवृ
त्तिः केन वार्यते अनुभवसंस्काराद्यनु
विद्धं संकोचविकाशधर्मि चित्तं तत्तद
भिव्यंजकविपाकलाभात् तत्फल
रूपतया परिणमत इत्यर्थः आ
सामानंत्याद्धानं कथं संभवतीत्याशं

कच हानोपायमाह हेतुफलाश्रयालं
बनैः संगृहीतत्वादेषामभावे तदभावः
११ वासनानामनंतरानुभवो हेतुः
तस्यानुभवस्य रागादयस्तेषामविद्येति
साक्षात्पारंपर्येण च हेतुः फलं शरीस
दिस्मृत्यादयश्च आश्रयो बुद्धितत्वं आ
लंबनं यदेवानुभवस्य तदेव वासनानाम
तस्मै हेतुफलाश्रयालंबनैरनंतानामपि
वासनानां संगृहीतत्वात्तेषां हेत्वादीना
मभावे ज्ञानयोगाभ्यां दग्धबीजकल्पत्वे
विहिते निर्मूलत्वान्न वासनाः प्ररोहमु
पयांति न कार्यमारभंत इति तासामभा
वः ननु प्रतिक्षणं चितस्य नश्वरत्वाय

लब्धेर्वासनानांतत्फलानांचकार्यका
रणभावेनायुगपद्भावित्वाद्भेदेकथमेक
त्वमित्याशंक्याकलसमर्थनायाह
अतीतानागतंस्वरूपतोस्त्यध्वभेदा
द्धर्माणाम् १२ इहासंतमसतांभावा
नामुत्पत्तिर्नयुक्तिमतीतेषांसत्वसंबंधा
योगात् नहिशशविषाणादीनांक्व
चिदपिसत्वसंबंधोदृष्टः निरुपाख्ये
चकार्येकिमुद्दिश्यकारणानिप्रवर्त्तेर
न् नहिअसंतंविषयमनालोच्यका
श्चित्प्रवर्त्तते सतामपिविरोधान्नाभाव
संबंधोस्ति यत्स्वरूपेणलब्धसत्ताकंत
त्कथंनिरुपाख्यतामभावस्वरूपतांभजते

नविरुद्धंरूपंस्वीकरोतीत्यर्थः तस्मात्त्र
तामभावासंभवादसतांचात्यसंभवा
त्तैस्तैर्धर्मैर्विपरिणममानोधर्मीसदै
करूपतयावतिष्ठते धर्मास्तुत्र्यध्वक
त्वेनव्यवस्थिताः स्वस्मिन्स्वस्मिन्नध्व
निव्यवस्थितानस्वरूपंत्यजंति वर्त्त
मानेअध्वनिव्यवस्थिताःकेवलंभोग्य
तांभजंते तस्माद्धर्माणामेवातीतानाग
ताधध्वभेदाः तेनैवचस्वरूपेणका
र्यकारणभावोऽस्मिन्दर्शनेप्रतिपाद्य
ते तस्मादपवर्गपर्यंतमेकमेवचितंध
र्मितयानुवर्त्तमानंननिह्नोतुंपार्यते ए
तेधर्मधर्मिणःकिंरूपाइत्यतआह

यो॰सू॰वृ॰
८५
85

तेव्यक्तसूक्ष्मागुणात्मानः १३ यदाते
धर्मधर्मिणः प्रोक्तास्तेव्यक्तसूक्ष्मभेदे
नव्यवस्थिताः येगुणाः सत्वरजस्तमो
रूपास्तदात्मनस्तत्स्वभावास्तत्परिणा
मरूपाइत्यर्थः यतः सत्वरजस्तमोभिः
सुखदुःखमोहरूपैः सर्वासांवाह्याभ्यं
तरभेदभिन्नानांभावव्यक्तीनामन्वयो
नुगमोदृश्यते यद्यदन्वयितत्तत्परिणा
मरूपंदृष्टं यथाघटादयोमृदन्विता
मृत्परिणामरूपाः यद्येतेत्रयोगुणाः
सर्वत्रमूलकारणंकथमेकोधर्मीतिव्यप
देशइत्याशंक्याह परिणामैकत्वाद्वस्तु
तत्वं १४ यद्यपित्रयोगुणाः तथापिते

वामंगानि भावरामनलक्षणोयः परिणा
मः क्वचित्सत्वमंगिक्वचिद्रजः क्वचित्तमइसे
वस्तुपलस्यैकत्वाद्वस्तुनः सत्वमेकलक्ष्
णते यथाऽयं पृथिवी अयं वायुरित्यादि
ननु विज्ञानव्यतिरिक्ते सत्येव वस्त्वेकमने
कं वा वक्तुं युज्यते यदा विज्ञानमेव बाह्या
वस्था तत्कार्यकारणभावेनावस्थितं त
था तथा प्रतिभाति सदा कथमेकं वस्त्व
वयते वक्तुं इत्याशंक्याह वस्तुसाम्ये चि
त्तभेदात्तयोर्विविक्तः पंथाः १५ त
योर्ज्ञानज्ञेययोर्विविक्तः पंथाः विविक्तो
मार्गो भेद इति यावत् कथं वस्तुसाम्ये
चित्तभेदात् समाने वस्तुनि स्त्र्यादौ

उपलभ्यमानेज्ञानानाप्रमात्रृएकंचित्तस्य
भेदःसुखदुःखमोहरूपतयासमुप
लभ्यते तथाहिएकस्यारूपलावण्य
वत्यांयोषित्युपलभ्यमानायांसरागस्य
सुखमुत्पद्यते सपत्न्यास्तुद्वेषः परि
व्राजकादेर्घृणेत्येकस्मिन्नपिवस्तुनि
नानाविधचित्तोत्पत्त्यात्कथंचैकचित्तका
र्यत्वंवस्तुनः एकचित्तकार्यत्वेवस्त्वेक
रूपतयैवावभासेत किंचचित्तकार्य
त्वेवस्तुनोयस्यचित्तस्ययद्वस्तुकार्यंतस्मि
न्नर्थांतरव्यासक्तेचित्तेतद्वस्तुनकिंचि
त्स्यात् भवतीतिचेन्नतदेवकथमन्यै
र्बहुभिरुपलभ्येत उपलभ्यतेचतस्मान्

वित्तकार्ये अर्थविद्भिः युगपद्बहुभिः
सोर्थः क्रियते तदा बहुभिर्निमित्तस्य
कार्यस्यैकनिमित्ताद्वैलक्षण्यं स्यात् य
दि वैलक्षण्यं नेष्यते तदा कारणभेदेस
ति कार्यभेदस्याभावे निर्हेतुकमेकरूपं
वा जगत्स्यात् एतदुक्तं भवति सत्स्वपि
भिन्नेकारणेषु यदि कार्यभेदस्तदा समग्रं
जगन्नानाविधकारणजन्यमेकरूपं स्या
त् कारणभेदाननुगमात्वातंत्र्येनिर्हेतुकं
वा स्यात् यद्येवं कथं तेनात्रिगुणात्मना
येन एकस्यैव प्रमातुः सुखदुःखमोहम
यानि ज्ञानानि जन्यंते नैवं यथाऽयं त्रि
गुणः तथा चित्तमपि त्रिगुणं यस्य चित्त

स्यअर्थप्रतिभासोस्यतो धर्मादयः सहका
रिकारणं तदुद्भवाभिभववशात् कदाचित्
चित्तस्य तेन तेन रूपेणाभिव्यक्तिः तथा
चकामुकस्य सन्निहितायां योषिति धर्म
सहकृतं चित्तं सत्वस्यांगितया परिणममा
नं सुखमयं भवति तदेवाधर्मसहकारि
रजसोंगितया दुःखरूपं सपत्न्यो मात्रा
स्य भवति तीव्राधर्मसहकारि तया तम
सोंगित्वेन कोपनायाः सपत्न्या मोहमयं
भवति तस्माद्धि ज्ञानव्यतिरिक्तोस्ति बा
ह्यार्थः तदेवं विज्ञानवस्तुनो स्वरूप
विरोधान्नापि कार्यकारणभावः कारणभेदे
ऽमत्यपि कार्यभेदेऽतिप्रसंगादिति ज्ञाना

व्यतिरिक्तत्वमर्थस्य व्यवस्थापितं यद्येवं
ज्ञानं चेत्स्वप्रकाशकत्वाद्ग्रहणस्वभावं अर्थ
श्च प्रकाश्यत्वात् ग्राह्यस्वभावस्तत्कथं युग
पत्सर्वानर्थान्न गृह्णाति नत्वंगात् आ
कारसमर्पणाद्विनैवाद्यं वस्तु ज्ञातमज्ञातं
च भवति अयमर्थः सर्वेऽपदार्थाः स्वात्म
लाभसामग्रीमपेक्षते नीलादिज्ञानं चो
पजायमानं इंद्रियप्रणालिकया समागत
मर्थोपरागं सहकारिकारणत्वेनापेक्षते
व्यतिरिक्तस्य अर्थस्य संबंधाभावात् ग्रही
तुमशक्यत्वात् ततश्चायं नैवार्थेन यस्य
ज्ञानस्य स्वस्वरूपोपरागः कृतस्तमेवार्थं
तज्ज्ञानं व्यवहारयोग्यतां नयति ततश्च

यो०स०वृ० ८८

58

सोऽर्थोऽज्ञातइत्युच्यते येनाकारेणसमर्पि तःसोऽज्ञाततेनव्यवह्रियते यस्मिंस्त्वनु भूतेऽर्थेसदृशादिरर्थःसंस्कारमुद्बोधय न्सहकारिकारणत्वंप्रतिपद्यते तस्मिं वार्थेस्मृतिरुपजायतइति नसर्वत्रज्ञानं नापिसर्वत्रस्मृतिरितिनकश्चिद्विरोधः यद्येवंप्रमातापिपुरुषोयस्मिन्कालेनी लंसंवेदयति नतस्मिन्नेवकालेपीतमंत श्चितवत्तस्यापिकादाचित्कत्वं गृहीतरू पत्वादाकारग्रहणेपरिणामित्वंप्राप्तंइ स्याशंकापरिहर्तुमाह सदाज्ञाताश्चित्त वृत्तयस्तत्प्रभोःपुरुषस्यापरिणामित्वात् १८ या एताश्चित्तस्यप्रमाणविपर्ययादिरूपावृ

तयस्मात्तत्प्रभोस्तस्यचित्तस्यगृहीतुःपुरुष
स्यसदासर्वकालमेवज्ञेयास्तस्यचिद्रूपतया
ऽपरिणामात् परिणामित्वाभावादित्यर्थः
यद्यसौपरिणामीस्यात् तथापरिणाम
स्यकादाचित्कत्वात्तासांचित्तवृत्तीनांसदा
ज्ञातत्वंनोपपद्येत अयमर्थः पुरुष
स्यचिद्रूपस्यसदैवाधिष्ठातृत्वेनव्यवस्थि
तस्ययदंतरंगंज्ञेयंनिर्मलंसत्वं तस्यापि
सदैवावस्थितत्वात्तद्येनयेनार्थेनोपरक्तं
भवति तथाविधस्यदृश्यस्यसदैवचिच्छा
संक्रांतिसद्भावस्तस्यांसत्यांसिद्धंसदाज्ञा
तृत्वमितिनकदाचित्परिणामित्वाशंका
ननुचित्तमेवसत्वोत्कर्षाद्यदिप्रकाशकं

प्रकाश्यं च तदा स्वपरप्रकाशकत्वादात्म
नमर्थं च प्रकाशयतीति तावतैव व्यवहार
समाप्तेः कृतं गृहीत्रन्तरेणेत्याशंकामपने
तुमाह न तत्स्वाभासं दृश्यत्वात् १८ न
चित्तं स्वाभासं स्वप्रकाशकं न भवति पुरु
षवेद्यं भवतीति यावत् कुतः दृश्यत्वात्
यत्किल दृश्यं द्रष्टृवेद्यं दृष्टं यथा घटादि
वेद्यं च चित्तं तस्मान्न स्वाभासं ननु च साध्या
विशिष्टोयं हेतुः दृश्यत्वमेव चित्तस्यासिद्धं
किं च स्वबुद्धिसंवेदनद्वारेण पुरुषाणां
हिताहितप्राप्तिपरिहाररूपाः वृत्तयो दृ
श्यन्ते तथा हि क्रुद्धोहं भीतोहमत्र न मे
रागः इत्येवमाद्याः संविदो बुद्धेरसंवेदने

नोपपन्नाइत्याशंकानिराकर्तुमाह एक
समयेद्वोभयानवधारणम् १९ अर्थस्य
संवित्तिरिदंतयाव्यवहारसमर्थाऽपादनं॰
एवंविधंचव्यापारद्वयमर्थग्रहणकाले
नयुगपत्कर्तुंशक्यंविरोधात् नहिविध
योर्व्यापारयोर्युगपत्संभवोस्ति अतएके
स्मिन् कालेउभयस्यस्वस्वरूपस्यार्थस्य
वावधारयितुमशक्यत्वात् नचित्तस्यसंवे
दनादर्थेतिष्टमेवफलंनस्वनिष्टमित्यर्थः
ननुमाभूदेकः स्वयंग्रहणंबुद्ध्यंतरेणभवि
ष्यति इत्याशंक्याह चित्तांतरदृश्येबुद्धि
बुद्धेरतिप्रसंगःस्मृतिसंकरश्च २० य
दिहिबुद्धिर्बुद्ध्यंतरेणवेद्येततदासापि

बुद्धिः स्वयं अबुद्धा बुद्ध्यंतरं प्रकाशयितु
मसमर्थेति तस्य ग्राहकं बुद्ध्यंतरकल्पनी
यं तस्याप्यन्यदित्यनवस्थाना पुरुषायुषे
णाप्यर्थे प्रतीतिर्न स्यात् नहि प्रतीतावप्र
तीतायामर्थः प्रतीतो भवति स्मृतिसंकर
श्च प्राप्नोति रूपे रसे वा समुत्पन्नायां बु
द्धौ तद्ग्राहिकाणामनंतानां बुद्धीनास
मुत्पत्ते बुद्धिजनितैः संस्कारैर्यदा युगप
द्बह्व्यः स्मृतयः क्रियंते तदार्थबुद्धेरपर्य
वसानाद्बुद्धिस्मृतीनां युगपदुत्पत्तेः क
स्मिन्नर्थे स्मृतिरियमुत्पन्नेति ज्ञातुमशक्य
त्वात् स्मृतीनां संकरः स्यादियं रूपस्मृतिरि
यं रसस्मृतिरिति न ज्ञायेत ननु बुद्धेः स्व

प्रकाशत्वाभावे बुद्ध्यंतरेणचासंवेदनं कथं
मयं विषयसंवेदरूपो व्यवहार इत्याशंक्य
स्वसिद्धांतमाह चितेरप्रतिसंक्रमायास्त
दाकारापत्तौ स्वबुद्धिसंवेदनं २२ पुरुष
श्चिद्रूपत्वाच्चितिशक्तिः अप्रतिसंक्रमा न विद्य
ते प्रतिसंक्रमोऽन्यत्रगमनं यस्याः सा तथो
क्ता अन्येनासंकीर्णेति यावत् यथा गुणाः
अंगांगिभावगमनलक्षणपरिणामेंगिनं
गुणमुपसंक्रामंति तद्रूपतामिवापद्यंते
यथा वा लोके परमाणवः प्रसरंतो विषय
मारूपयंति नैवं चितिशक्तिः तस्याः स
र्वदैकरूपतया स्वप्रतिष्ठत्वेन व्यवस्थि
तत्वात् अतस्तत्सन्निधाने यदा बुद्धिस्त।

दाकारतामापद्यते चेतनेवोपजायते बु
द्धिवृत्तिसंक्रांता च यदा चिच्छक्तिर्बुद्धिवृत्त्या
विशेषेणतयासंपद्यते तदाबुद्धेः स्वस्यात्मनो
वेदनंभवतीत्यर्थः इत्थंस्वसंविदितंचित्तं
सर्वार्थग्रहणसामर्थ्येनसकलव्यवहार
निर्वाहक्षमंभवतीत्याह द्रष्टृदृश्योपरक्तं
चित्तंसर्वार्थं २२ द्रष्टा पुरुषः तेनोपर
क्तंतत्संनिधानेनतद्रूपतामिवापन्नं दृ
श्योपरक्तंगृहीतविषयाकारपरिणामं
यदाभवति तदातदेवसर्वार्थग्रहण
समर्थंजायते यथानिर्मलंस्फटिकद
र्पणाद्येवप्रतिबिंबग्रहणसमर्थमेवंर
जस्तमोभ्यांअनभिभूतंसत्वंशुद्धत्वाच्चि

छायाग्रहणासमर्थं भवति न पुनरशुद्ध
त्वाद्रजस्तमसी तदभिभूतरजस्तमोरूप
मंगितया सत्वं निश्चलप्रदीपशिखाकारंस
दैवैकरूपतया परिणाममानं चिच्छायाग्र
हणसामर्थ्यादामोक्षप्राप्तेरवतिष्ठते यथा
यस्कांतसन्निधाने लोहस्य चलत्वमाविर्भ
वति एवं चिद्रूपपुरुषसन्निधाने सति स
त्वस्याभिव्यंग्यमभिव्यज्यते चैतन्यं अ
तएवास्मिन्दर्शने हि चिच्छक्तिर्नित्योदिता
भिव्यंग्या च नित्योदिता चिच्छक्तिः पुरुष
स्तत्सान्निध्यानात् अभिव्यनक्ति अभिव्यं
ग्यं चैतन्यं सत्वमभिव्यंग्या चिच्छक्तिः त
दत्यंतसन्निहितत्वादंतरंगं पुरुषस्य भो

यो॰सू॰वृ॰

९२

९२

स्यतां प्रतिपद्यते तदेव शांतब्रह्मवादिभि
भिः सांख्यैः पुरुषस्य परमात्मनोधिष्ठे
यं कर्मानुरूपं सुखभोक्तृतया व्यपदिश्य
ते यत्र संततानुद्रिक्तत्वादेकस्यापि गुणस्य
कदाचित्कस्यचिदंगित्वात्त्रिगुणं प्रतिक्षणं
परिणममानं सुखदुःखमोहात्मकमपि नि
र्मलं तत्तस्मिन्कर्मानुरूपे शुद्धे सत्त्वे स्वा
कारसमर्पणद्वारेण संवेद्यतामापादयति
तच्छुद्धमाद्यं चित्तसत्त्वमेकतः प्रतिसंक्रां
तचिच्छायमन्यतो गृहीतविषयाकारेण
चित्तेनोपढौकितस्वाकारं चित्संक्रांतिवशा
च्चैतन्यायमानं वास्तवचैतन्याभावेपि सुख
दुःखरूपं भोगमनुभवति स एव भोगो

यत्सान्निध्येनविवेकाग्रहणादभोक्तुर
पिपुरुषस्यभोगइतिव्यपदिश्यतेअनेनै
वाभिप्रायेणविंध्यवासिनोक्तंसत्वतप्तत्व
मेवपुरुषस्यतप्तत्वमिति अन्यत्रापिप्रति
बिंबमानच्छायाव्यापारसादृश्यंछायांतरोद्भ
वः प्रतिबिंबशब्देनोच्यते एवंसत्वेपिपौरु
षेयचिच्छायासदृशसत्वकीयचिच्छायांतरा
भिव्यक्तिः प्रतिबिंबशब्दार्थः ननुप्रतिबिं
बिनंनामनिर्मलस्यनियतपरिमाणस्यनि
र्मलेदृष्टं यथामुखस्यदर्पणे असंतनिर्म
लस्यव्यापकस्यचपुरुषस्य तस्मादसंतनि
र्मलात्पुरुषादनिर्मलेसत्वेकथंसंप्रति
बिंबनमुपपद्यते उच्यते प्रतिबिंबनस्य

स्वरूपमनवगच्छताभवतेदमभ्यधायि ये
वसत्वगतायाअभिव्यंग्यायाश्चित्शक्तेः
पुरुषस्यसान्निध्येऽभिव्यक्तिः सैवप्रतिबिं
वनमुच्यते यादृशीपुरुषगताचिच्छक्ति
स्तच्छायातत्राप्याविर्भवति यद्यप्युक्तमसं
तनिर्मलः पुरुषः कथमनिर्मलेसत्वेप्रति
त्तिसंक्रामति तदप्यनैकांतिकंनैर्मल्याद
पकृष्टेपिजलादावादित्यादयः प्रतिसं
क्रांताः समुपलभ्यंते यदप्युक्तमनवच्छि
न्नस्यनास्तिप्रतिसंक्रांतिरितितदप्यनुप
पन्नं व्यापकस्याप्याकाशस्यादर्पणादौ
प्रतिसंक्रांतिदर्शनात् एवंसतिनकाचि
दनुपपत्तिर्विवर्णोनस्य ननुसात्विकप

यिणामरूपेबुद्धिसत्वेपुरुषसन्निधादभि
भिव्यंग्यायाः चिच्छक्तेर्बोद्धार्थाकारसंक्रां
तोपुरुषस्यसुखदुःखरूपोपभोगइत्युक्तं
तदनुपपन्नं तदेवचित्तसत्वेप्रकृतावपरि
णतायांकथंसंभवतिकिमर्थश्चतस्याः
परिणामः अथोच्यते पुरुषस्यार्थाय।
भोगसंपादनंतयाकर्तव्यमतःपुरुषार्थ
कर्तव्यतयातस्यास्सुखएवपरिणामःत
च्चानुपपन्नंपुरुषार्थकर्तव्यतायाएवा
नुपपत्तेः पुरुषार्थोमयाकर्तव्यइत्येवं
विधोध्यवसायः पुरुषार्थकर्तव्यतो
च्यते नन्वस्याःप्रकृतेःकथंप्रथममेवै
वंविधोध्यवसायः अस्तिचेदध्य

यो०सू०वृ०
९४
94

वसायः कथं जडत्वं अत्रोच्यते अनुलो
मप्रतिलोमलक्षणपरिणामद्वये सहजं
शक्तिद्वयमस्ति तदेव पुरुषार्थकर्तृत्वमुच्
च्यते साच शक्तिरचेतनाया अपि प्रकृतेः
सहजैव तत्र महदादिमहाभूतपर्यन्तो।
अस्य बहिर्मुखतयानुलोमपरिणामः पु
नः स्वकारणानुप्रवेशद्वारेणास्मितान्तः
प्रतिलोमः परिणामः इत्थं पुरुषस्य भोग
परिसमाप्तेः सहजशक्तिद्वयक्षयात्कृता
र्था प्रकृतिर्न पुनः परिणाममारभते ए
वंविधायां च पुरुषकर्तृत्वमतायां जडाया
अपि प्रकृतेः न काचिदनुपपत्तिः ननु य
दीदृशी शक्तिः सहजैव प्रधानस्यास्ति

तत्किमर्थं मोक्षार्थिभिर्मोक्षाय यत्नः क्रि
यते मोक्षस्यानर्थनीयत्वे तदुपदेशकशा
स्त्रस्याप्यानर्थक्यं उच्यते योयं प्रकृति
पुरुषयोरनादिर्भोग्यभोक्तृभावलक्षणः
संबंधः तस्मिन्सत्यभिव्यक्तचेतनायाः प्रकृ
तेः कर्तृत्वाभिमानात् दुःखानुभवे सतिक
मियं दुःखनिवृत्तिरात्यंतिकी मम स्यादिति
भवत्येवाध्यवसायः अतो दुःखनिवृत्त्युपा
योपदेशशास्त्रोपदेशापेक्षास्त्येव प्रधा
नस्य तथाभूतमोक्षधर्मानुरूपं बुद्धिसत्त्व
शास्त्रोपदेशस्य विषयः दर्शनांतरेष्वेवं
विध एवंविधास्वभावः शास्त्रेऽभिधीयते
सत्त्वमोक्षाय प्रयतमान एवंविधमेव शा

यो०सू०वृ०
९५
55

स्योपदेशं सहकारिणमपेक्ष्य मोक्षाख्यं
फलमासादयति सर्वाण्येव च कार्याणि
प्राणापानसामग्र्यामात्मानं लभंते अस्य
च प्रतिलोमपरिणामद्वारेणास्याद्यस्य मो
क्षाख्यस्य कार्यस्य दृश्येव सामग्री प्रमाणे
न निश्चिता प्रकारांतरेणानुपपत्तेः अ
नलां विना कथं भवितुमर्हति अतः स्थि
तमेतत् संक्रांतविषयोपरागमभिव्यक्तचि
त्तायं बुद्धिसत्त्वविषयनिश्चयद्वारेण स
मग्रां लोकयात्रां निर्वाहयतीति एवंविध
मेव चित्तं पश्यंतो भ्रांताः स्वसंवेदनं चित्तं
चित्तमात्रं च जगदित्येवं ब्रुवाणाः प्रतिबो
धिता भवंति ननु यद्येवंविधादेव चित्ता

सकलव्यवहारनिर्वृत्तिः कथंप्रमाणशून्यो

दृष्टाऽभ्युपगम्यते इत्साशंक्य द्रष्टरि प्रमाण

माह तदसंख्येयवासनाभिश्चित्रमपिपरा

र्थंसंहसकारित्वात् २३ तदेवंचित्तसंख्यातु

मशक्याभिर्वासनाभिश्चित्रमपि नानारूप

मपिपरार्थंपरस्यस्वामिनोभोक्तुर्भोगापवर्ग

लक्षणमर्थंसाधयतीति कुतः संहत्यकारि

त्वात्संहत्यसंभूयमिलित्वार्थक्रियाकारित्वा

त् यत्संहत्यार्थक्रियायाकारितत्परार्थं

दृष्टं यथाशयनासनादि सत्वरजस्तमां

सिचचित्तलक्षणपरिणामभांजिसंहत्यका

रीणिअतः परार्थानियश्चपरः सपुरुषः

ननुयादृश्येनशयनासनादीनांपरेण शरी

खतापरार्थत्वमुपलब्धं दृष्टांतबलेन तादृ
श एव परः सिध्यति यादृशश्च भवतांपरो
ऽसंहतरूपोऽभिप्रेतस्तद्विपरीतस्य सिद्धेरय
मिष्टविषयविघातको हेतुः उच्यते यद्य
पि सामान्येन परार्थमात्रत्वेन व्याप्तिगृहीता
तथापि सत्वादिविलक्षणधर्मिपर्यालोचन
या तद्विलक्षण एव भोक्ता परः सिध्यति य
था चंदने घनवति शिखरिणि विलक्षणा
द्धूमाद्वह्निरनुमीयमान इतरवह्निविलक्षण
श्चंदनप्रभवः प्रतीयते एवमिहापि विल
क्षणस्य सत्वाख्यस्य भोग्यस्य पारार्थ्येनुमी
यमाने तथाविध एव भोक्ता अधिष्ठाता यश्चि
मात्ररूपोऽसंहतः सिध्यति यदि वा तस्य च

एवं सर्वोत्कृष्टत्वमेव प्रतीयते तथाहि ता यो.सू.टि.
मसेभ्यो विषयेभ्यः प्रकृष्यते शरीरं प्रका ६१
शरूपेंद्रियाश्रितत्वात् तस्मादपि प्रकृष्य
ते इंद्रियाणि ततोपि प्रकृष्टं सत्वं प्रकाशरू
पं तस्यापि यः प्रकाशकः प्रकाश्यविलक्ष
णः स चिद्रूप एव भवतीति कुतः तस्य स
त्वं इदानीं शास्त्रफलं कैवल्यं निर्णेतुं
दशभिः सूत्रैरुपक्रमति विशेषदर्शिन।
आत्मभावनाविनिवृत्तिः २५ एवं सत्व
पुरुषयोरन्यत्वे साधिते यस्तयोर्विशेषं
पश्यति अहमस्मादन्य इत्येवं रूपं तस्य
विज्ञात चित्तस्वरूपस्य चित्ते या आत्मभाव
भावना सा निवर्त्तते चित्त एव कर्तृ ज्ञातृ

भोक्तृत्वाभिमानो विवर्त्तते तस्मिन्सति किं
भवतीत्याह तदा विवेकनिम्नं कैवल्यप्राग्
भारं चित्तं २५ यदस्याज्ञाननिम्नमज्ञा
नमार्गवाहि बहिर्मुखं विषयोपभोगफलं
वा चित्तमासीत् तदिदानीं विवेकनिम्नं
विवेकमार्गवर्त्यन्तर्मुखं कैवल्यप्राग्भारं कै
वल्यफलं कैवल्यप्रारंभं वा संपद्यत इति
॥ अस्मिंश्च विवेकवाहिनि चित्ते येंतरायाः
प्रादुर्भवंति तेषां हेतुप्रतिपादनद्वारेण
त्यागोपायमाह तच्छिद्रेषु प्रत्ययांतराणि
संस्कारेभ्यः २६ तस्मिन्समाधौ स्थि
तस्यच्छिद्रेष्वंतरालेषु यानि प्रत्ययांत
राणि व्युत्थानरूपाणि ज्ञानानि तानि प्रा

क्तनेभ्यो व्युत्थानानुभवजेभ्यः संस्कारेभ्यो
हंममेत्येवंरूपाणिक्षीयमाणेभ्योपिप्रभ
वंति अतःकारणोच्छित्तिद्वारेणैतेषां
हानंकर्त्तव्यमित्युक्तंभवति हानोपायः
पूर्वमेवोक्त इत्याह हानमेषांक्लेशवदु
क्तम् २८ यथाक्लेशानामविद्यादीनांहा
नंपूर्वमुक्तंतथासंस्काराणामपिकर्त्तव्यं
यथातेज्ञानाग्निनाप्लुष्टादग्धबीजकल्पाः
नचित्तभूमौप्ररोहंलभंते तथासंस्कारा
अपिएवंप्रसंख्यानाग्नुदग्धेनस्थिरीभवंते
समाधौयादृशस्ययोगिनःसमाधेःप्रक
र्षप्राप्तिर्भवति तथाविधमुपायमाह
प्रसंख्यानेप्यकुसीदस्यसर्वथाविवेकख्या

तेधर्ममेघःसमाधिः २९ प्रसंख्यानेयाव
तांतत्त्वानांयथाक्रमंव्यवस्थितानांपरस्प
रविलक्षणस्वरूपपरिभावनं तस्मिन्न
प्यकुसीदस्यफलमलिप्सोःप्रत्ययां
तराणामनुदयेसर्वप्रकारविवेकख्यातेः
परिशेषाद्धर्ममेघःसमाधिर्भवति प्रकृ
ष्टमशुक्लकृष्णंधर्मपारपुरुषार्थसाध
कंमेहतिसिंचतीतिधर्ममेघः अने
नप्रकृष्टधर्मस्यैवज्ञानहेतुत्वमित्युपपा
दितंभवति तस्माद्धर्ममेघात्किंभवतीत्य
त आह ततःक्लेशकर्मविनिवृत्तिः ३०
क्लेशानामविद्यादीनामभिनिवेशांतानां
कर्मणांचशुक्लादिभेदेनत्रिविधानांत्वा

नोदयात्पूर्वं कारणानि वृत्तानि वृत्तिर्भवती
त्यर्थः निवृत्तेषु तेषु किं भवतीत्यत आह त
दा सर्वावरणमलापेतस्य ज्ञापेतस्य ज्ञानस्या
नंत्यात् ज्ञेयमल्पं ३० आव्रियते चित्तमे
भिरित्यावरणानि क्लेशाः तेभ्यो पेतस्यात
द्विरहितस्य ज्ञानस्य शरद्गगननिभस्या
नंत्यादनवच्छेदात् ज्ञेयमल्पं गणनास्पदं
भवत्यक्लेशेनैव सर्वं ज्ञेयं जानातीत्यर्थः
ततः किमित्यत आह ततः कृतार्थानां
परिणामक्रमसमाप्तिर्गुणानां ३१ कृ
तो निष्पादितो भोगापवर्गलक्षणः पुरु
षार्थः प्रयोजनं यैस्ते कृतार्थाः गुणाः
सत्वरजस्तमांसि तेषां परिणाम आपुरु

यो०सू०वृ०
९९
६१

पार्थसमाप्तेरानुलोम्येनप्रतिलोम्येनचांगां
गिभावस्थितिलक्षणः तस्ययोसौक्रमोव
क्ष्यमाणः तस्यसमाप्तिर्निष्ठानपुनरुद्
वस्तस्यार्थः क्रमस्योक्तस्यलक्षणमाह क्ष
णप्रतियोगीपरिणामापरांतनिर्ग्राह्यः
क्रमः ॥३२॥ क्षणोऽल्पीयान्कालस्तस्ययो
सौप्रतियोगीएकक्षणविलक्षणः परि
णामापरांतनिर्ग्राह्यः अनुभूतेषुक्षणे
षुपश्चात्संकलनबुद्ध्यायोगृह्यतेसक्षणा
नांक्रमउच्यते नह्यननुभूतेषुक्षणेषु
क्रमः परिज्ञातुंशक्यः इदानींफलभूत
स्यकैवल्यस्यासाधारणंस्वरूपमाह पुरुषा
र्थशून्यानांगुणानांप्रतिप्रसवः कैवल्यं

स्वरूपप्रतिष्ठावाचितिशक्तेरिति ३३ समा
प्तभोगापवर्गलक्षणपुरुषार्थानांगुणानां
यः प्रतिप्रसवः प्रतिलोमस्यपरिणामस्य
समाप्तौविकारानुद्भवः यदिवाचितिशक्ते
र्वृत्तिसारूप्यनिवृत्तौस्वरूपमात्रेणावस्थानं
तत्कैवल्यमुच्यते नकेवलमस्मद्दर्शनेक्षे
त्रज्ञः कैवल्यावस्थायामेवंभूतश्चिद्रूपो
दर्शनांतरेष्वपिविमृश्यमानमेवंविधरूप
एवावतिष्ठते तथाहि संसारदशायामा
त्माकर्तृत्वभोक्तृत्वानुसंधातृत्वमयः प्र
तीयते अन्यथापद्यप्येकः क्षेत्रज्ञस्तथा
विधोनस्यात् तस्यज्ञानक्षणानामेवपू
र्वापरानुसंधातृशून्यानांभावेनियतः

कर्मफलसंबंधो न स्यात् कृतनाशाकृ
ताभ्यागमप्रसंगश्च यदि येनैव शास्त्रो
पदिष्टमनुष्ठितं कर्म तस्यैव भोक्तृत्वं भवे
त्तदा हिताहितप्राप्तिपरिहाराय प्रवृत्तिः
सर्वस्य घटते सर्वस्यैव व्यवहारस्य हानोपा
दानलक्षणस्यानुसंधानेनैव व्याप्तत्वात्
ज्ञानलक्षणानां परस्परभेदेनानुसंधान
शून्यत्वादनुसंधानाभावे कस्यचिदपि व्य
वहारस्यानुपपत्तेः कर्त्ता भोक्तानुसंधाता
यः स आत्मा निर्व्यवस्थाप्यते मोक्षदशा
यां तु सकलग्राह्यग्राहकलक्षणव्यवहाराभा
वाच्चैतन्यमात्रमेव तस्यावशिष्यते न
चैतन्यं चितिमात्रत्वेनैवोपपद्यते न पुनरा

त्मसंवेदनेन यस्माद्विषयग्रहणसमर्थत्व
मेवचितिरूपंनात्मग्राहकत्वं तथाहि अ
र्थश्चित्यागृह्यमाणोयमितिगृह्यते स्वरू
पंगृह्यमाणमहमितिनपुनर्युगपत्‌ व
हिर्मुखतांतर्मुखतालक्षणंव्यापारद्वयं
परस्परंविरुद्धंकुर्तुंशक्यं अतएकस्मि
न्समयेव्यापारद्वयस्यकर्तुमशक्यत्वाच्चि
द्रूपतैवावशिष्यते अतोमोक्षावस्था
यांनिवृत्ताधिकारेषुगुणेषुचिन्मात्ररू
पएवावतिष्ठतइत्येवंयुक्तं संसारदशा
यांतुएवंभूतस्यैवकर्तृत्वभोक्तृत्वमनुसंधा
तृत्वंचसर्वमुपपद्यते तथाहि योयंप्र
कृत्यासहानादिर्नैसर्गिकोऽस्य भोग्यभो

तृभावलक्षणः संबंधोऽविवेकख्याति
मूलस्तस्मिन्सतिपुरुषार्थकर्तव्यतारू
पशक्तिद्वयंसम्भाव्यामहदादिभावेन
परिणतिस्तस्यांसंयोगेसतियदात्मनो
धिष्ठातृत्वंचिच्छायासमर्पणसामर्थ्यं
बुद्धिसत्वस्यचसंक्रांतचिच्छायाग्रहण
सामर्थ्यं चिदवष्टब्धायाश्चबुद्धेर्योयंक
र्तृत्वभोक्तृत्वाध्यवसायस्ततएवसर्वस्या
नुसंध्यानपूर्वकस्यव्यवहारस्यनिष्पत्तेः
किमन्यैःफल्गुभिःकल्पनाजालैः य
दिपुनरेवंभूतमार्गव्यतिरेकेणपार
मार्थिकमात्मनःकर्तृत्वाद्यंगीक्रियते
तदास्यपरिणामित्वप्रसंगःपरिणामि

त्वात्त्वानित्यत्वे तस्यात्मत्वमेव न स्यात् न
ह्येकस्मिन्नेव समये एकेनैव रूपेणापर
स्परविरुद्धावस्थानुभवः संभवति तथा
हि यस्यामवस्थायामात्मसमवेतसुखे
समुत्पन्ने तस्यामनुभवितृत्वं न तस्यामेवा
वस्थायां दुःखानुभवितृत्वं अतोवस्थाना
नात्वात् तदभिन्नस्यावस्थावतोपि नानात्वं
नानात्वेन च परिणामित्वात् नात्मत्वं नापि
नित्यत्वं अत एव शांतब्रह्मवादिभिः सां
ख्यैरात्मनः सदैव संसारदशायां मोक्षद
शायां चैकरूपत्वमंगीक्रियते ये तु वेदां
तवादिनः सच्चिदानंदमयत्वमात्मनो मोक्षे
मन्यते तेषामयुक्तः पक्षः तथाहि

योःसू०वृ०
१०२
102

आनंदस्यसुखरूपत्वात्सुखस्यचसदैव
संवेद्यमानतयैवप्रतिभासात्संवेद्यमा
नत्वंचसंवेदनव्यतिरेकेणानुपपन्नमि
ति संवेदनसंवेद्ययोरभ्युपगमाद्द्वैत
हानिः अथसुखात्मकत्वमेवतस्योच्य
ते तद्विरुद्धधर्माध्यासादनुपपन्नं नहि
संवेद्यसंवेदनंचैकंभवितुमर्हति किंवा
द्वैतवादिभिःकर्मात्मपरमात्मभेदेना
त्माद्विविधइतिष्यते तत्रयेनैवरूपेण
सुखदुःखभोक्तृत्वंकर्मात्मनस्तेनैवरू
पेणयदिपरमात्मनः स्यात् तदाकर्मा
त्मवत्परमात्मनः परिणामित्वमविद्या
स्वभावत्वंचस्यात् अथयेनतस्यसाक्षात्

त्कृत्वं किंतु तटस्थो किंतूदासीनतया।
धिष्ठातृत्वेन स्वीकरोति तदास्मद्दर्शनानु
प्रवेशः आनंदस्वरूपता च पूर्वमेव निरा
कृता किं वा विद्यास्वभावत्वे निःस्वभावत्वा
त्कर्मात्मनां कः स्यात्साधिकारी न ता
वत्तस्य निर्मुक्तत्वात्परमात्मनाप्यविद्या
स्वभावात्कर्मात्मा तत्रश्च सकलशास्त्रवै
यर्थ्यप्रसंगः अविद्यामयत्वे च जगतोंगी
क्रियमाणे कस्याविद्येति विचार्यतां न ता
न्परमात्मनो निर्मुक्तत्वाद्विद्यास्वरूपत्वा
त्कर्मात्मनोपि निःस्वभावतया शशवि
षाणप्रख्यत्वे कथमविद्यासंबंधः अयो
ध्येतरात्रेवाविद्याया अविद्यात्वं यस्वि

यो०सू०वृ०
१०२
103

वारितरमणीयत्वं नाममयैव हि विचारेण
दिनकरकरस्पृष्टनीहारवत्क्षयं याति
सैवाविद्येत्युच्यते नैवं परं तु किंचित्का
र्यं करोति तद्वस्तु कुतश्चिद्भिन्नमभिन्नं
वावक्तव्यं अविद्यायाश्च संसारलक्षण
प्रपंचकार्यकर्तृत्वमवश्यमंगीकर्तव्य
म् तस्मिन्सत्यपि यदनिर्वाच्यत्वमुच्यते
तदा कस्यचिदपि वाच्यत्वं न स्यात् ब्रह्मणो
प्यवाच्यत्वप्रशक्तिस्तस्मादधिष्ठातृरू
पताव्यतिरेकेण नान्यदात्मनो रूपमु
पपद्यते ऽधिष्ठातृत्वं च चिद्रूपत्वमेव त
द्व्यतिरिक्तस्य धर्माधर्मादेः प्रमाणानुप
पत्तेः येरपि नैयायिकादिभिरात्मा चेतन

नायोगाच्चेतनद्रष्यते चेतनापितस्यमनः ·ष·प्र·टि·
संयोगजा तथाहि इच्छाज्ञानप्रयत्नास्त्यो ४०९
गुणास्तस्यव्यवहारदशायामात्ममनःसं
योगादुत्पद्यंते तैरेवचगुणैःस्वयंज्ञाताक
र्त्ताभोक्तेतिव्यपदिश्यतेमोक्षेतुमिथ्याज्ञा
ननिवृत्तौतन्मूलानांद्वेषाणामपिनिवृ
त्तेस्तेषांबुद्ध्यादीनांविशेषगुणानामत्यं
तोच्छित्तेःस्वरूपमात्रप्रतिष्ठत्वमात्मनों
गीकृतं तेषांनयुक्तःपक्षः यतस्तस्यांदशा
यांकिमात्मनःआत्मत्वंनित्यत्वंव्यापकत्वा
दयोगुणाआकाशादीनामपिसंति अतस्त
द्वैलक्षण्येनात्मनःकिंचिद्रूपमवश्यमंगी
कर्त्तव्यम आत्मत्वाज्जातियोगइतिचेत्त

वैस्यैव हि जातियोगः संभवति अतो जडे
ष्यो वैलक्षण्यमात्मनोऽवश्यमंगीकर्त्तव्यं
तच्चाधिष्ठातृत्वं चिद्रूपतयैव घटते नान्य
था येऽपि मीमांसकैः कर्मकर्तृरूपआ
त्मांगीक्रियते तेषामपि न युक्तः पक्षः
तथा हि अहंप्रत्ययग्राह्य आत्मा इति ते
षां प्रतिज्ञा अहंप्रत्यये च कर्तृत्वं चात्मनः
एवं न चैतद्विरुद्धत्वादुपपद्यते कर्तृत्वं
प्रमातृत्वं कर्मत्वं प्रमेयत्वं न चैतद्विरुद्ध
धर्माध्यासो युगपदेकस्य घटते यद्धि
रुद्धधर्माध्यस्तं न तदेकं यथा भावाऽभा
वौ विरुद्धे च कर्तृत्वकर्मत्वे अथोच्येत न
कर्तृत्वकर्मत्वयोर्विरोधः किंतु कर्तृत्व

करणत्वयोर्विरोधः केनैतदुक्तं विरुद्धध
र्मोध्यासस्य तुल्यत्वात् कर्तृत्वकरणयो
रेव विरोधो न कर्तृत्वाकर्मत्वयोः तस्माद
हंप्रत्ययग्राह्यत्वं परिहृत्यात्मनो धिष्ठातृ
त्वमेवोपपन्नं तच्चेतनत्वमेवं यैरपि द्रव्य
पर्यायभेदेनात्मनो व्यापकस्य शरीरपरि
णामस्य परिणामित्वमिष्यते तेषामुत्प
नयरहतएवपसः परिणामित्वे चिद्रूपता
हानिः चिद्रूपताभावे किमात्मन आत्मत्वं
तस्मादात्मन आत्मत्वमिच्छता चिद्रूपत्वमे
वात्मनोंगीकर्तव्यं तच्चाधिष्ठातृत्वमेवके
वलकर्तृत्वरूपमेवात्मानमिच्छंति तथा
हि विषयसन्निधानेयाज्ञानलक्षणाक्रि

यो·सू·वृ० याससमुत्पन्नातस्याविषयसंवित्तिः फलं
१०५ तस्यांचफलरूपायांसंवित्तौस्वरूपंप्रका
105 शचिद्रूपतयाप्रतिभासयते विषयश्चा
ग्राह्यतयाग्राह्यग्राहकतलेनघटमहंजाना
मीत्यनेनाकारेणातस्याःसमुत्पत्तेःक्रिया
याःकारणंकर्तृत्वंभवतीत्यतःकर्तृत्वंभो
क्तृत्वंचात्मनोरूपमितितदनुपपन्नं यस्मा
त्तासांसंवित्तीनांचकिंकर्तृत्वंयुगपत्प्रतिप
द्यते युगपत्कर्तृत्वे सर्वस्यकर्तृत्वंनस्यात्
अथक्रमेणाकर्तृत्वंतदेकरूपस्यघटते
एकेनरूपेणाचेतस्यकर्तृत्वं तदैकस्यरू
पस्यसदैवसन्निहितत्वात्सर्वैकरूपमे
कंस्यात् अथनानारूपतयातस्यकर्तृत्वं

तदापि रिणालाञ्चन चित्‌रूपत्वं अतश्चि
द्रूपत्वमात्मन इच्छद्भिः न साक्षात्कर्तृत्व
मंगीकर्तव्यं यादृशमस्माभिः कर्तृत्वमात्म
नः प्रतिपादितं कूटस्थनित्यस्य चिद्रूपस्य
तदेवोपपन्नं एतेन स्वप्रकाशस्यात्मनो
विषयसंवित्तिद्वारेण ग्राहकत्वमभिव्यक्त
तेइतियेवदंति तेऽप्यनेनैव निराकृताः के
चिद्विमर्शात्मकत्वेनात्मनः चिन्मयत्वमि
च्छंतीति ह्याहुः नविमर्शव्यतिरेकेणापि चि
द्रूपत्वमात्मनो निरूपयितुं शक्यं जडा
त्किल वैलक्षण्यं चिद्रूपत्वमुच्यते तच्च
विमर्शव्यतिरेकेण निरूप्यमाणं नान्यथा
वतिष्ठते तदनुपपन्नमिदमित्थमेव रू

यो०सू०वृ०

१०६

106

षमितियोविचारःसविमर्शइत्युच्यते सचा
स्मिताव्यतिरेकेणोत्थानमेवनलभते तथा
हि आत्मन्युपजायमानोविमर्शोहमेवं
भूतइत्यनेनाकारेणसंवेद्यते ततश्चा
हं शब्दस्याभिन्नस्यात्मलक्षणस्यार्थस्य
तत्रस्फुरणात् नविकल्परूपतातिक्रमः
विकल्पश्चाध्यवसायात्मकबुद्धिधर्मोनचि
द्धर्मःकूटस्थनित्यत्वेनचितेःसदैवैकस्व
रूपत्वान्नाहंकारानुप्रवेशः तदनेनवि
मर्शत्वमात्मनःप्रतिपादयताबुद्धिरेवात्म
त्वेनभ्रांत्याप्रतिपादितानप्रकाशात्मनः
परस्यपुरुषस्यस्वरूपमवगच्छति इत्थं
सर्वेष्वपिदर्शनेष्वधिष्ठातृत्वविहायना

स्यात्मनो रूपमुपपद्यते अधिष्ठातृत्वं
च चिद्रूपत्वं तच्च जडाद्वैलक्षण्यमेव चिद्रूप
तयापरंधितिष्ठति तदेव भोग्यतांनयति
यच्चेतनाधिष्ठितं तदेव सकलव्यवहारयो
ग्यं भवति एवं च सति कृतकृत्यत्वात्प्रधा
नस्य व्यापारनिवृत्तौ यदात्मनः कैवल्यम
स्माभिरुक्तं तद्विहायदर्शनांतराणामपि
नान्या गतिरस्ति तस्मादिदमेव युक्तमु
क्तं वृत्तिसारूप्यपरिहारेण स्वरूपप्रति
ष्ठा चितिशक्तिः कैवल्यं तदेवं सिद्ध्यंतरेभ्यो
विलक्षणां सर्वसिद्धिमूलभूतां समाधिसि
द्धिमभिधाय जात्यंतरपरिणामलक्षण
च सिद्धिविशेषस्य प्रकृत्यापूरणमेव का

रणमित्युपपाद्य धर्मादिनांप्रतिबंधनिवृ
त्तिमात्रसामर्थ्यमितिप्रदर्श्यनिर्माणचित्ता
मस्मितामात्रादुद्भवइत्युक्तातेषांयोगिचि
त्तमेवाधिष्ठात्रात्मकमितिप्रदर्श्यंते योगि
चित्तस्यचित्तांतरवैलक्षण्यमभिधायतत्
कर्मणामलौकिकत्वंचोपपाद्यविपाकानुगु
णानांवासनामभिव्यक्तिसामर्थ्यंकार्यकारण
योश्चैक्यप्रतिपादनेनव्यवहितानामपिवासना
नामानंतर्यमुपपाद्यतासामानंत्येपिहेतुफला
दिद्वारेणहानमुपदर्श्यातीतादिष्वध्वसुधर्मा
णांसद्भावमुपपाद्य विज्ञानवादिनंनिराकृत्यसा
कारवादंचप्रतिष्ठाप्य पुरुषस्यज्ञातृत्वमुक्त्वाचि
त्तद्वारेणसकलव्यवहारनिष्पत्तिमुपपाद्यपुरु

यो॰ सू॰ वृ॰ षसिद्धौप्रमाणमुपदर्श्यकैवल्यनिर्णयायपरा
१०८ भिः सूत्रैः क्रमेणोपयोगिनोर्थानभिधाय
शास्त्रांतरेप्येतदेवकैवल्यमुपपन्नमित्युप
पाद्य कैवल्यस्वरूपंनिर्णीतमितिव्याकृतः
कैवल्यपादः सर्वेप्यस्ययशःप्रतापवसतेः
पादांतसेवानताविभ्रश्यन्मुकुटेषुमूर्द्धसु
दधसाज्ञांधरित्रीभृतः यद्वक्रांवजमवा
पसर्वसुखदंकैंवाग्देवतापिश्रितासश्री
भोजमहीपतिःपणिपतेःसूत्रेषुवृत्तिंव्य
धात् १ इतिश्रीमहाराजाधिराजश्री
भोजदेवविरचितायांराजमार्त्तण्डाभि
धायांपातंजलयोगशास्त्रसूत्रवृत्तौकै
कस्यपादश्चतुर्थः ४ ॥ ॥

१०८
108

(ক) ২
(খ) ৫৭
(গ) ৭০২
২০৬